UPANIṢAD-VĀKYA-MAHĀ-KOŚA

(Prepared from 223 Upaniṣads)

VOL. I

(अ to न)

Prepared by

Shastri GAJANAN SHAMBHU SADHALE

PUBLISHERS :

THE "GUJARATI" PRINTING PRESS

FORT, BOMBAY

A. D. 1940

Rs. 12

This book can be had at :-
The "Gujarati" Printing Press
Sassoon Building
Elphinstone Circle, Fort Bombay

Printed and published by Natverlal Itcharam Desai B. A. at
THE "GUJARATI" PRINTING PRESS,
Sassoon Building, Elphinstone Circle, Fort, Bombay

ॐ

श्रीमद्वटोदरमहाराजाश्रयानुगृहीतः

उपनिषद्वाक्यमहाकोशः

[२२३ उपनिषदां वाक्यैः सम्भृतः]

[पूर्वार्धः]

कर्ता—

साधले इत्युपाह्वः शम्भुपुत्रो गजाननः

शकाब्दः १८६२ विक्रमाब्दः १९९६ खिस्ताब्दः १९४०

मूल्यं द्वाचत्वारिंशन्मुद्रात्मकम् (४२)

पुस्तकप्राप्तिस्थानम्:—
गुजराती प्रिन्टिंग प्रेस,
सासुन बिल्डिंग
एलफिन्स्टन सर्कल, कोट, मुंबई.

मुद्रकः प्रकाशकश्च—
देसाई इत्युपाह्वः श्रीमदिच्छारामसूनुर्नटवरलालः
मुद्रणस्थानम्—
'गुजराती प्रिन्टिंग' मुद्रणालयम् । मुम्बापुरी ।

श्रीमन्महाराजाधिराज प्रतापसिंह महाराज

सेनाखासखेल समशेर बहादुर, संस्थान बडोदें.



जन्म २९. जून १९०८

राज्यारोहण २९. एप्रील १९३९

अथ महाराष्ट्रकुलावतंसः प्रतापवानास इति प्रसिद्धम् ।

अतः प्रतापान्वितसिंहनामा ह्यन्वर्थको गूर्जरदेशपोऽभूत् ॥

श्री सयाजीविजय प्रेस- बडोदा.

अर्पणपत्रिका ।

—**—

श्रीमन्महाराष्ट्रीय–भारतीय–संस्कृतासंर कृतांग्लीयाद्यनेकभाषाभिज्ञानां सम्पादितोप-
युक्तविद्यानां वीर्यशौर्यधैर्यौदार्याद्यखिलगुणगणसम्पन्नानां स्वाचार–विचार–
विहार-सञ्चार-दक्षाणां शारद-नादेयतोयचयविशदहृदयानां पितृपिता-
महादिपूर्वजसम्पादिताः ' जिन घर-जिन तख्त- सेनाखासखेल
समशेर बहादुर ' इत्यादिपदवीरनुसृतानां गायकवाड-
वंशविभूषणानां राजाधिराजानां श्रीमद्युवराज-
फत्तेसिंहसुतानां श्रीमतां प्रतापसिंहेत्यभिधा-
नानां राज्ञां कमनीयकरकमलयोरयं
उपनिषद्वाक्यमहाकोषः
सानन्दं सादरं च
समर्प्यते

पितेव रक्षञ्जननीव पोषयन्स्वपुत्रवत्स्वीयजनं च पालयन् ।
अधीतविद्यां च विवर्धयन्सदा राजन्विवर्धस्व भव प्रजाधिभाक् ॥

UPANIŜAD VĀKYA-MAHĀKOŜA

PRESENTED TO

His Highness

Maharaja Pratapsinha Gaekwar

SENAKHASKHEL, SAMSHER BAHADUR

The noble and just king of Baroda, ever loved and honoured by his loyal subjects both rich and poor; A scholar of many languages, like Sanskrit, English, Hindi and Marathi; A gentleman endowed with all the good qualities and virtues, like honesty, valour, fortitude and generosity, and very proficient in Raj niti, politics and economics.

By the Author

श्रीमत्प्रतापसिंहनृपत्यभीष्टचिन्तनम् ।

वटोदराभिधे पुरेऽतिरम्यमन्दिरे पुरा
    प्रजाप्रियः सुनीतिमान्सुरम्यहर्म्यवासकृत् ।
श्रियान्वितः प्रजावनं विधाय धीरमानितः
    सयाजिभूपतिर्यथा शशास गौर्जरीमिलाम् ॥

प्रतापवान्सुबुद्धिमान्सुशीलवान्गुणोदधिः
    पितामहेन शिक्षितः सुराज्यसूत्रधारकः ।
श्रिया युतस्तथा सुखं प्रशास्तु गौर्जरीं क्षितिं
    प्रतापसिंहभूपतिः शतायुरस्तु वर्धताम् ॥

यद्वत्सयाजिराजः पुण्यश्लोकः स एव राजर्षिः ।
विद्यावदातचरितो विद्यादानव्रतोत्सुकस्त्वनिशम् ॥
वितरन्स्वान्तामोदं विमलीकुर्वन्महीं यशःकिरणैः ।
श्रीफत्तेसिंहसुतो गायकवाडान्वयाभ्रविमलेन्दुः ॥

राजा प्रतापसिंहः पैतामहव्रतपालनौत्सुक्यात् ।
भवतु प्रियः प्रजानां विनयाधानावनादिभिः सुतराम् ॥

सुराजराज्यलब्धतोषराजयः सुधीगणाः
    सुखं वसन्तु सद्गुणादिभिः सदा प्रपन्नया ।
श्रिया नता भवन्तु शीलशालिनः प्रजागणाः
    सुयोगलब्धिरीदृशी विना कृपां न चेशितुः ॥

PREFACE

The first volume of the Upaniśad Vākya Mahā-Kośa or a Concordance of Upaniśadic sentences is now presented to the Sanskrit knowing public. It will be interesting to note here the circumstances leading to the publication of this helpful but voluminous work.

While working as a Shastri in some leading printing houses of Bombay, I was entrusted by the Gujarati Printing Press to prepare an edition of the Bhagavad Gita with eleven commentaries, mostly unpublished. In making an attempt to trace the original sources of the quotations from the Upaniśads and the Puranas, I found Col. Jacob's concordance useful but not altogether satisfactory. This Concordance was compiled from forty-five Upaniśads only, and is therefore by no means exhaustive, and consequently a large nnmber of citations could not be traced with the help of Col. Jacob's work.

In the eleven commentaries on the Bhagavad Gita citations are made not only from the 108 well known Upaniśads, but also from many others which are either not known or very insufficiently known. This naturally necessitated a patient search for further manuscripts in the archives of the manuscript libraries throughout the length and breadth of India.

The search which proved very successful showed the existence of no less than 223 Upaniśads. These Upaniśads were collected, and a list of sentences occuring in them was made out in an alphabetical order after a sustained labour of several years. It is hardly necessay to mention that this list proved very helpful in tracing the citations occuring in the eleven commentaries on Gita to their original sources. The edition of the Bhagavad Gita was ultimately published by the Gujarati Printing Press, Bombay.

By the time I finished the list of sentences in the 223 Upaniśads in my collection, the number of sentences had already gone beyond forty thousand. Lest this labour of years may go in vain if it be not printed and published, I decided at the advice of my friends and well wishers to print the book as quickly as possible. Being already 72 years of age I was afraid I may not live to see the completion of the work unless I could make things move very fast.

But one thing was wanting, and that was finance. The estimate for printing the book in two volumes came to about six thousand rupees. Six thousand rupees is a staggering sum for a poverty stricken Shastri like myself. Feeling helpless I started for my Patron Deity at Garudeshwar. There I was inspired to approaeh the noble Prince His Highness the Maharaja Pratap Sinh Gaekwar for patronage towards this expensive undertaking.

By the grace of God Anant, the Eternal, the help came, and I was granted half of the full cost of production, a sum of three thousand rupees without a

moment's hesitation. It is by the bounty of this generous ruler that the first volume of the Upaniśad Vākya Mahā-Kośa sees the light of the day, to the infinite pleasure of Sanskrit scholars all over the world and the humble author. Officers of the Baroda State like Dr. S. M. Pagar, Dr. B. Bhattacharyya, Dr. S. S. Bhave, actively sympathised with my work, and I record here my deep appreciation of what they have done to further the cause of Indian scholarship.

It will not be out of place to mention here a few details of the life of my chief patron, His Highness the Maharaja Pratap Sinh Gaekwar to whom this work owes its origin, and to whom this work is dedicated as a token of profound gratitude.

× × ×

His Highness the Maharaja was born on the 29th June 1908 at the Motibag Palace in Baroda. He is the son of the late Prince Fateh Sinh Rao, and the grandson of the illustrious Maharaja the late Shri Sayaji Rao Gaekwar. In his early childhood, the young prince lost his parents, and it fell to the lot of his grandfather to replace them both and shoulder all responsibilities for the upbringing of the future king of Baroda.

The late Maharaja Sayaji Rao undertook this task with unparalleled thoroughness in order that the young prince may be well equipped and fitted for the great task of governing a first class State like Baroda.

The Prince's early education was supervised by a band of excellent Indian and European tutors, and his companions were carefully selected from the families of Sardars and officers of the State. He was sent for a time to the Rajkumar College at Rajkot, but was soon brought back to the Baroda High School to take his place as an ordinary school boy and to mix promiscuously with others over whom he was destined to rule.

After his matriculation, the Prince was given College education first at the Baroda College and then in the Deccan Callege, Poona. Finally the grandfather decided to send him out on a grand tour to Europe to see life at its various phases and gain experience of the world. During the whole tour the Prince led a simple, almost an ascetic life, and did not carry with him even the usual entourage. He worked for himself doing all kinds of odd jobs, even to the length of packing his own things. This tour made a lasting impression on his mind.

Almost immediately on his return he was introduced by his sagacious grandfather into the administration. As Yuvaraja he became the head of the Revenue Department. As experience grew he was given higher and higher importance and responsibility. While under training, he received continuous guidance and advice of able administrators such as Sir V. T. Krishnamachariar, Col. Kumar Shivaraj Singh, Mr. Ramlal H. Desai, Mr. R. S. Mane Patil and others. The Yuvaraja however made his own decisions and always accepted full responsibility for his actions.

Finally, the old Maharaja Sayaji Rao took the Yuvaraja as his own Private Secretary, when he attended such historic events as the Imperial Conference and the Coronation of His Majesty. This new and historic experience gave him wonderful insight into the various constitutional problems of India and his own State. The result of this great experience is already in the process of bearing fruit as is known to all by now.

Besides being an able administrator, the Maharaja is an excellent horseman and a keen Polo player. He takes an active interest in all forms of sports, physical training and hunting.

The new Maharaja is physically sturdy and strong. He is shrewd, observant, deep, thorough and self-reliant; he dislikes sycophancy and half truths. He has natural dignity and his manners are jovial and unassuming. Though quick in grasp and decision, he listens to all patiently and carefully. Endowed with a host of admirable qualities, His Highness the Maharaja Pratap Sinh Gaekwad is most fitted to succed to the noble heritage of his illustrious grandfather whose footsteps he is so scrupulous in following.

The new Maharaja ascended the throne on the 7th of February 1939, and within this short time, he has given ample proof of his future greatness. He gave away a crore of rupees for Village Uplift from his own privy purse, granted permanent remissions of land revenue, and invested his people with liberal constitutional reforms. May God bless the young Maharaja and grant him a long life, continuous fame, honour and prosperity.

× × ×

Besides the help received from His Highness the Maharaja Gaekwad, I have to acknowledge the financial assistance received from the University of Bombay. The authorities of this University granted a sum of Rs. 300/ in 1938 and Rs. 700/- in 1939 towards the cost of production. I am also thankful to the numerous professors, friends and well wishers for their continuous encouragement and sympathy shown in the publication of this work.

In conclusion, I offer this humble work to the lotus feet of Lord Shri Ananta Bhagawan who in his divine grace became instrumental in bringing to light this index of ancient Indian wisdom of the Upaniṡads for the use of the inquisitive readers. HARI : OM TAT SAT

Bombay, Guru-purnima day
19th July, 1940.

Shastri Gajanan Shambhu Sadhle

प्रस्तावः ।

' महान्तं कोशमुदचा नि षिञ्च स्यन्दन्तां कुल्या विषिताः पुरस्तात् ।
घृतेन द्यावापृथिवी व्युन्धि सुप्रपाणं भवत्वघ्न्याभ्यः ॥ '*

[—ऋ. मं. ५।८३।८]

अस्त्येतत् समेषां सुरभारतीपरिशीलनबद्धादराणां विपश्चिद्वराणां सुविदितमेव यत् सर्वेऽपि भारतीया आचार्या दार्शनिकादयश्च स्वसिद्धान्तोपष्टम्भकतया तत्र तत्र श्रुतिशिरोवचनान्येव भूम्नोपन्यस्यन्तीति । सर्वेषां हि समयिनामपौरुषेयत्वेनानादिनिधनत्वेन चाभ्युपगता भगवती श्रुतिरेव चरमं परमं च प्रमाणम् । तत्रापि शरीरिणां गात्रेष्विव शिरोभागा एव सर्वतः समुत्कृष्यन्ते श्रुतीनामपि । अक्षय्यश निधयः सकलेतरेऽनन्यलभ्यस्य भारतीयानां सविज्ञानस्य ज्ञानस्य । नैकोऽपि कोऽपि विद्यते चतुर्विधपुरुषार्थसाधनोपायेषु तथाविधो योऽस्मीभिरविमृष्टचर इति निर्देष्टुं शक्यः । एतेषु च रहस्यविद्यानां प्रतिपादनादुपनिषच्छब्देन व्यपदेशः । " उपेत्य नियमयुक्ताय साध्यते उपदिश्यत इत्युपनिषत् । उप-नि-पूर्वात् ' षद्लृ ' विशरणगत्यवसादनेषु (धा.पा.१.८५४) इत्यस्मात् सम्पदादित्वात् कर्मणि क्विप् । ' सदिरप्रतेः ' (पा. सू. ८.३.६६) इति षत्वम् । इति ह्युपनिषच्छब्दो निरुच्यते तेन रहस्यार्थस्योपनिषत्संज्ञत्वमुपपद्यते । अत एवार्थशास्त्रे कामशास्त्रे च रहस्यप्रयोगेष्वौपनिषदशब्दः प्रयुज्यते । तादर्थ्याच्च ग्रन्थोऽप्युपनिषदुच्यते । तथा च कश्चित् ' रसोपनिषत् ' ' कुचोपनिषत् ' इत्याद्यास्तत्तद्विषयप्रतिपादकग्रन्थानां संज्ञा अपि समुपलभ्यन्ते । परं निरुपाधिक उपनिषच्छब्दः सकलरहस्येभ्योऽपि रहस्यतमां ब्रह्मविद्यामेव मुख्यया वृत्त्याऽभिधत्ते, तत्प्रतिपादिकां च श्रुतिमेव भक्त्येति सर्वसम्प्रतिपन्नमिदम् ।

तथा चाहुः श्रीमद्भगवत्पादाचार्याः—' उपशब्दो हि सामीप्यमाह । तच्चासति सङ्कोचके प्रतीचि पर्यवस्यति । निशब्दश्च निश्चयार्थः । तस्मादैकात्म्य निश्चितम् । तद्विद्या सहेतुं संसारं सादयतीत्युपनिषदुच्यते ' (बृ. भा.) । ये मुमुक्षवो दृष्टानुश्रविकविषयवितृष्णाः सन्त उपनिषच्छब्दवाच्यं वक्ष्यमाणलक्षणां विद्यामुपसद्योपगम्य तन्निष्ठतया निश्चयेन शीलयन्ति तेषामविद्यादेः संसारबीजस्य विशरणात् हिंसनात् विनाशनादित्यनेनार्थयोगेन विद्योपनिषदित्युच्यते । पूर्वोक्तविशेषणान् मुमुक्षून् वा परं ब्रह्म गमयतीति ब्रह्मगमयितृत्वेन योगात् ब्रह्मविद्योपनिषत् । गर्भवासजन्मजराद्युपद्रववृन्दस्य लोकान्तरे पौनःपुन्येन प्रवृत्तस्यावसादयितृत्वेन शैथिल्यापादनेन धात्वर्थयोगाद्ब्रह्मविद्याऽप्युपनिषदित्युच्यते ॥

ननु—उपनिषच्छब्देनाध्येतारो ग्रन्थमप्यभिलपन्ति—उपनिषदमधीमहे—अध्यापयाम-इति च । एवम् , नैव दोषः; अविद्यादिसंसारहेतुविशरणादेः सदिधात्वर्थस्य ग्रन्थमात्रेऽसम्भवात् , विद्यायां च सम्भवात् ; ग्रन्थस्यापि

---

* भौमस्यात्रेरार्षम् । स खल्वृषिरनेन मन्त्रेण सकलजगज्जन्मादिविधायकं करुणावरुणालयं भगवन्तं जगतः कल्याणकामनायाशासानः प्रार्थयते—भो जगदीश्वर ! महान्तं कोशं इममुपनिषद्वाक्यमहाकोशम् , उदच उद्गमय, विद्वन्मान्यतापादनाविना सङ्कलनतत्परं कुरु । ' अञ्चु गतौ ' (धा. पा. ८६२) लोट् । किञ्च निषिञ्च स्वकृपामृतधारया सर्वश्रेयोऽभिवर्षिण्याऽभिषिक्तं कुरु ॥ अनेन कर्मणा च कोशप्रणेतुः पितॄणां पुरस्तात् अभिमुखं कुल्याः पयआदीनां नद्यः विषिताः अनवरुद्धाः स्यन्दन्ताम् , अस्य पितॄणामक्षय्या तृप्तिरस्त्वित्यर्थः । तथा चाश्वलायनः—' यदृचोऽधीते पयसः कुल्या अस्य पितॄन् स्वधा उपक्षरन्ति यद्यजूंषि घृतस्य कुल्या, यत्सामानि मध्वः कुल्या, यदथर्वाङ्गिरसः सोमस्य कुल्या, यद्ब्राह्मणानि कल्पान् गाथा नाराशंसीरितिहासपुराणानीत्यमृतस्य कुल्याः ' (गृ. सू. ३. ३. ३.) इति ॥ घृतेन अमृतरसेन गव्येन च द्यावापृथिवी दिवं च पृथिवीं च व्युन्धि विशेषेण क्लेदय ' उन्दी क्लेदने ' (धा.पा.७.२०) लोट् । कोशकर्त्रे स्वर्लोकेऽमृतं भूलोके घृतं तत्सहकृतं पयोदध्यादि च प्रभूतमुपतिष्ठतु; स इहामुत्र सुखमृच्छत्विति भावः । तथा चात्र मन्त्रान्तरम्—'घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥'(ऋ.सं.४.५८.१इति, ' तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम् । ' (ऋ. सं. ९. ६७. ३२) इति चानुसन्धेयम् ॥ अघ्न्याभ्यो गोभ्यः सुप्रपाणं सम्यक्पानकमुदकं भवतु । काले वर्षतु पर्जन्यः । गोभ्यः शिवं स्वस्ति चास्त्वित्यर्थः ॥

तादर्थ्येन तच्छब्दस्योपपत्तेः, 'आयुर्वै घृतम्' इत्यादिवत्। तस्मात् विद्यायां मुख्यया वृत्त्योपनिषच्छब्दो वर्तते, ग्रन्थे तु भक्त्या इति (कठभा.)। तैत्तिरीयोपनिषद्दीपिकायां सायणाचार्या अपि "अत्र ह्युपनिषच्छब्दो ब्रह्मविद्यैकगोचरः। तच्छब्दवाच्यार्थस्य विद्यायामेव सम्भवात्॥ उपोपसर्गः सामीप्ये तत्प्रतीचि समाप्यते। सामीप्यतारतम्यस्य विश्रान्तेः स्वात्मनीक्षणात्॥ त्रिविधस्य सदित्यर्थो विद्यायां सम्भविष्यति। श्रीमत्सुरेश्वराचार्यैर्निरुक्तमिदमीरितम्॥ उपनीयेममात्मानं ब्रह्मापास्तद्वयं ततः। निहन्त्यविद्यां तज्जं च तस्मादुपनिषद्भवेत्॥ निहत्यानर्थमूलां स्वाविद्यां प्रत्यक्तया परम्। गमयत्यस्तसम्भेदमतो वोपनिषद्भवेत्॥ प्रवृत्तिहेतून्निःशेषांस्तन्मूलोच्छेदकत्वतः। यतोऽवसादयेद्विद्या तस्मादुपनिषन्मता" इति॥ 'यथोक्तविद्याहेतुत्वाद्ग्रन्थोऽपि तदभेदतः। भवेदुपनिषन्नामा लाङ्गलं जीवनं यथा॥' इति। ताश्चैता उपनिषदो गीर्वाणसारस्वतसरस्वति महार्घा मणय इवापरिमिता एव विद्योतन्ते। परमिदानीं बहूनां श्रुतिशाखानामुच्छिन्नत्वात्; विद्यमानानामप्यङ्गुलीमेयानामचिरोऽन्तर्धीयमानत्वात्, अन्यैश्च तैस्तैः कलिकालमात्रसुलभैर्वेदोच्छेदकरैरुपप्लवैर्विप्लुतत्वाचादरणीयतरा अपि, अनादिनिधनत्वेन प्रसिद्धा अपि, प्रायो दुष्प्रापदर्शना एवैता वाङ्मय्यो भगवतस्तनवः।

यद्यप्यद्यत्वे क्वचिदष्टाविंशतिः, क्वचित् द्वात्रिंशत्, क्वचनैकसप्ततिः, अन्यत्राष्टोत्तरं शतम्, इत्याद्यनेकत्रोपनिषदः प्रकाशिता दृश्यन्ते; तथापि ताः प्रायशोऽशुद्धिबाहुल्यासंविभक्तत्वासम्पूर्णत्वादिदुरन्तदोषग्रस्ततया न मनीषिणां मनोरथान् पूरयितुं पारयन्ति।

न च तावता सर्वासां संग्रहोऽपि भवति, तत्रानुपलभ्यमानानां भूयसां वचसां ग्रन्थकृद्भिरुदाहृतत्वेन तदधिकोपनिषत्सत्त्वानुमानात्। दृश्यन्ते च वैदेशिकेन 'फारकर' नाम्नाऽनेकग्रन्थपर्यालोचनाद्विना 'रिलिजिअस लिटरेचर ऑफ् इंडिया' इत्यत्र प्रकाशितायां सूच्यां त्रयोविंशत्यधिकशतसंख्यान्युपनिषन्नामानि। उपलभ्यन्ते च क्वचित् क्वचित् तद्व्यतिरिक्तान्यपि पुस्तकानीत्यावश्यकस्तत्संग्रहे प्रयत्नः।

किञ्च प्रकाशितानामप्यासामिदानीमध्ययनाभावेन तदसम्भवेन चाभीष्टवाक्यप्रभवादीनां स्थानाज्ञानदौस्थ्यं तदवस्थमेव। तेन अतर्क्याध्यात्मविद्याविषयान् निबन्धान् श्रुत्येकोपष्टम्भानि शारीरादिभाष्याणि, भामतीश्रुतप्रकाशिकादिव्याख्याः, अन्यांश्चैवंविधान् प्रबन्धानधीयानाः, द्वैताद्वैतादिदार्शनिकग्रन्थांस्तुलनयाऽभ्यस्यन्तः, विशेषतस्तादृशग्रन्थानां संशोधकाश्च तत्रोदाहृतोपनिषद्वाक्यसन्दर्भशुद्धिवञ्चितास्तत्स्वार्थावधारणे कियत् क्लिश्नन्तीति तथाविधा एव बुधा बुध्येरन्। ईदृश्युपनिषदां विषमावस्थैव केषांचन दुर्दुरूढानां परमाप्ततया प्रतीतेष्वप्याचार्यपादादिभिरुदाहृतेषु वाक्येष्वमूलत्वारोपणे, अपरेषां साहसिकशिरोमणीनां स्वकपोलकल्पितवचसामपि श्रुतित्वेन ख्यापने चावसरं वितरतीति सर्वेषामेवास्तिकानामत्यावश्यकं तद्दूरीकरणम्। न च तत्र यावदुपलभ्यमानानामशेषाणामप्युपनिषदां संग्रह-संविभाग-संशोधनपूर्वकं प्रकाशनं; तदन्तर्गतनिखिलवाक्यानां वर्णानुक्रमानुसारिसूचीनिर्माणं चान्तराऽपरः कोऽप्युपाय इति सर्वसम्प्रतिपन्नम्। किंतु 'वक्तुं सुकरमेतत्, कर्तुं दुष्करम्' इति पश्यन्त अद्ययावत् केऽपि लब्धवर्णमणयोऽस्मिन् कर्मणि प्रावर्तिषत, परमिदानीं—मन्यामहे परिणाममुपेयुषां पण्डितानां पुण्यपुञ्जेन प्रेरितः—ता एता उपनिषदामौपनिषदानां चापद एकपद एवापाकर्तुं समनह्यत्संकल्पावधानमेवरः श्रीमान् 'शम्भुसूनुर्गजाननशास्त्री साथळे' महाभागः। व्यतानीच नातिचिरादेव भगवतः श्रुतिरक्षादीक्षितस्य क्षीरसागरसुताजानेरनुकम्पामात्रसहायः श्लाघनीयतमं बृहदुपनिषत्संग्रहमिममुपनिषद्वाक्यमहाकोशं चेति चिरायाधमर्णमस्य सकलमपि कृति कुलं जानीमः। वयसा स्थविरतरस्याप्यध्यवसायवता मनसा यूनोऽतिशयानस्य, धनेन दुर्गतानगण्यस्याप्यनवद्यया विद्यया लक्ष्मणस्य प्रापञ्चिकसुखवञ्चितस्यापि सदा स्वानन्दनिर्भरस्यास्य शास्त्रिमहोदयस्यात्र प्रवृत्तिवृत्तान्तस्य परिचयः 'न्यूनातिरिक्तं यत्किञ्चित्' इति तन्निवेदनतोऽवगन्तव्यः।

एवमित्थमेता यत्नेन सम्भृता अपि ता उपनिषदः काश्चिदतिजरत्तरमातृकतया करग्रहणमपि सोढुमक्षमः काश्चिदसंविभक्तवाक्यतया स्वार्थावबोधनेऽसमर्थाः, काश्चिदशुद्धजालजटिलतया पठनेऽप्यपर्याप्ताः, काश्चिच्च तैस्तैः

अनभिज्ञलिखितग्रन्थैकमुलभैर्दोषविशेषैराक्रान्ता अभूवन् । तान्यत्रभवता शास्त्रिप्रवीरेण सूक्ष्मेक्षिकया संशोध्य यथोचितं संविभज्य, तच्छुद्धपाठानुन्नीय, यावच्छक्यं पूर्वोदितं दोषजालमपनीय, तथा संस्कृता यथा मुद्रणयन्त्राधिरोहणं प्रतीक्षमाणास्तिष्ठन्ति । अयं च तत्रत्यानां सर्वेषामेव वाक्यानामकारादिवर्णक्रमेण विहितः कोशस्तद्गुणपरिमलवाहः पृषदश्व इव तत्रभवतः सहृदयानुपतिष्ठत इति कथं वायं महात्मा शास्त्रिशिरोमणिः स्वपितृद्धरणमात्रार्थमभिवसुधं समानीतसकललोकैकपावनसुरसरित्सलिलस्य नानुकरोतितरां भगीरथस्य ?

अथैवं सरस्वतीनिसर्गमात्सर्यशालिन्या लक्ष्म्या कदाचिदकटाक्षितेन, जठरपिठरपूरणाय व्यवसायान्तरं श्रितवता, स्वयशोराशिविशदपलितक्रान्तशिरसा, यस्यां जाग्रति भूतानि तस्यामिव या निशा सर्वभूतानां तस्यामपि जाग्रता, शास्त्रिमहाशयेन भूयसः क्लेशाननुभूय निर्माय निर्मायमुपहृतमिममुपनिषद्वाक्यकुसुमकोशं स्वकरकिसलयैः स्वीकृत्याश्वेव सफलीकरिष्यन्त्येतस्य परिश्रमान् कोविदकल्पद्रुमा इत्याशास्महे ।

ये चात्र केचिद्दोषाः सम्भवेयुस्ते कर्तुरसहायतां च जराशिथिलतां च साधनसामग्रीविकलतां च तथाऽस्य कर्मणोऽपि विशालतां च विषमतां च मानुषमनीषाया अल्पविषयतां च समालोच्य मर्षणीयाः करुणार्णवैर्लब्धवर्णवरेण्यैरिति तान् साञ्जलिबन्धमभ्यर्थयामः ।

अन्ततश्च वयसेव विद्यया तयेव नयविनयाभ्यां ताभ्यामिव गुणैश्च गरिष्ठमपि सौजन्यातिशयेन सुहृदायमानमीदृशानेककर्मसु व्यापृतं श्रीमन्तं शम्भुसूनुं गजाननशास्त्रिणमनामयेन द्राघीयसायुषा यशसा श्रिया च समेधयितुं भगवन्तमज्ञाननलिनभास्करं महेश्वरं सम्प्रार्थ्य तेन सपद्येवाविश्चिकीर्षितं 'बृहदुपनिषत्संग्रहं' प्रतीक्षमाणा एतावत्येव विरमामः ।

> 'दोषैर्द्विषन्तश्च गुणैर्महान्तस्तुष्यन्तु सन्तः सुखमस्मदीयैः ।
> अन्तर्द्वयेषामपि सन्तमेषां जानीमहे प्रीतमनन्तमेकम् ॥'

महाशालिक्षेत्रम्
शके १८६२ वटपूर्णिमा

दीर्घदर्शिनामाश्रवः—
धूपकरोपाह्वोऽनन्तयज्ञेश्वरशर्मा ।

न्यूनातिरिक्तं यत्किञ्चित् ।

> यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।
> यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु ॥

अनन्तकोटिब्रह्माण्डनायकस्यानन्तभक्तजनाज्ञानान्धतमसविध्वंसकरस्यानन्तार्तार्तिहरस्य सच्चिदानन्दमयस्यानन्तासनस्य भगवतः श्रीमदनन्तस्य कृपालवलेशात्स्वान्तःस्फुरितं तत्प्रसादभूतं श्रुतिमनोनयनाह्लादकरं कमनीयकमलकोशमिवेममुपनिषद्वाक्यमहाकोशं विद्वद्वरकरकमलेपूपहारीकर्तुं मम मनोभास्करोऽद्यानन्तानन्दोदयाचलं समुदितस्तत्प्रमोदसन्दोहावहमिति को न मन्येत ?

श्रीमद्विद्वद्मेसरैः परोपकृतिमद्धुर्यैर्धूपकरेत्युपाख्यैरनन्तशास्त्रिभिः स्वोद्यमभारं दूरतोऽपसार्यास्योपनिषद्वाक्यमहाकोशस्य प्रस्तावलेखनेनोपकृतोऽहं प्रभाकरप्रभया खद्योत इव लेखनासमर्थोऽपि तदनुज्ञया तच्छन्दैरेव किञ्चिल्लेखनधार्ष्ट्यं कर्तुमुद्युक्तः स्वोद्देश्यादि स्फुटीकर्तुम्, तत्क्षमापयितुमर्हन्ति ते क्षमाशीलाः ।

उपनिषद्वाक्यमहाकोशस्य प्रादुर्भावः परिचयश्च ।

नव वा दश वर्षाणि व्यतीतानि भवेयुस्तत्प्रागेव 'गुजराती' मुद्रणालयाधिपतिभिर्मामाहूयोक्तं 'शाङ्करभाष्याद्येकादशटीकोपेता श्रीमद्भगवद्गीता मुद्र्यतेऽस्माभिः । परं च तद्भाष्य-व्याख्यादि-प्रणेतृभिस्तत्र तत्र स्वस्वमतसमर्थनपराणि वेदवेदाङ्गश्रुतिस्मृतिपुराणेतिहासादिभ्यो यानि वाक्यानि समुद्धृतानि भवेयुस्तेषां मूलस्थलाङ्कनिवेशनेन तत्तदादर्शभूतप्रत्यन्तरादिभ्योऽशुद्धिनिरसनपूर्वकं विशेषाविशेषनिदर्शनेन च परिच्छेदस्वल्पास्वल्पविरामचिह्नैश्च तां विभूष्य सा मुद्रणीयेत्यस्माकं मनस्युत्कटा मनीषा समुद्भूता तां सफलीकर्तुमर्हथ' इति । तथेत्युक्त्वा तत्कर्तुमुद्युक्तोऽहं श्रीमद्भगवद्गीतायास्तट्टीकाकारैस्तत्र तत्र वेदादिग्रन्थेभ्यः समुद्धृत-

वाक्यानां स्थलनिदर्शनेन न तथा परिश्रान्तोऽस्मि यथोपनिषद्वाक्यस्थलाङ्कनिदर्शनेन। एवमस्मिन्नारब्धकार्ये मामगाधाव्यगाधचिन्ताम्बुधेरतितरतरलतरङ्गनिकरेषु निमग्नमानसोऽभूवम्।

तत एकस्मिन्दिने नयननाराचवसुविधुतमे (१८५२) शकाब्देऽनन्तप्रियायामनन्तचतुर्दश्यां कृतानन्तार्चनोपासनस्य "को मम चिन्तामहद्ग्रस्तस्य हस्तावलम्बदानेनास्मात्समुद्धर्ता भविता ? 'अनन्तसंसारमहासमुद्रमग्नं समभ्युद्धर वासुदेव ! । अनन्तरूपे विनियोजयस्व ह्यनन्तसूत्राय नमो नमस्ते ॥' इत्यनन्तभक्तैरनन्तस्तवैः स्तुतोपासितानन्तगुरो 'त्वमेवेदानीं ममाप्यनन्तापत्समुद्धर्ता गुरुः शरणं भव' इति प्रार्थयमानस्यार्धरात्रेऽर्धसुप्तस्यापि मम मनसि श्रीमदनन्तानुग्रहतश्चिन्तापद्धनध्वान्तविध्वंसकोऽयं चिन्तामणिः प्रादुरभूद्यदहमेवोपनिषद्वाक्यकोशस्य सम्यक्प्रणयनं कुर्यां तर्हि मदीयमप्यारब्धकार्यं सफलं भवेल्लोकसंग्रहश्चापीति। ततस्तदैवोत्थाय कृतानन्तानन्तप्रणामोऽहं मुद्रिताष्टोत्तरशतोपनिषद्गतामीशावास्योपनिषदमारभ्योपनिषद्वाक्यमहाकोशहेतोस्तद्वाक्यावलीलेखनं विधातुमुद्युक्तः।

चतुःपञ्चोपनिषदां वाक्यलेखनानन्तरं लिखितेषु वाक्येष्वपशब्दितं गलितादि च दृष्ट्वा तद्दूरीकर्तुमनसा पितृपितामहादिसंगृहीतग्रन्थेषु विचिन्वता मयाऽतिजीर्णं हस्तलिखितं भ्रष्टाक्षरमष्टोत्तरशतोपनिषद्भिन्नमुपनिषद्द्वयं समुपलब्धम्। तदवलोक्य 'एतदतिरिक्ता अन्या अप्युपनिषदोऽत्र मुम्बापुरस्थबृहत्पुस्तकालयेऽन्यत्र च स्युः' इत्याशाङ्कुरो मद्धृदाकाशेऽङ्कुरितः। परन्तु तल्लाभः प्रयत्नापेक्षः, प्रयत्नस्तु शक्त्यवसरद्रव्यापेक्षः, तद्धीनेनापि यथाशक्ति शनैः शनैः प्रयतितं मया। 'प्रसादचिह्नानि पुरःफलानि' (र. वं. २।२२) इति श्रीमन्महाकविकुलगुरोः कालिदासस्योक्तिस्तत्प्रसङ्गानुसारेण सूपयुक्तैव, तथापि 'प्रयत्नचिह्नानि पुरःफलानि' इत्यपि केनचित्कविवरेण यत्रकुत्रचिदुक्तं स्याच्चेत्तदपि युक्ततरमेवेत्यहं मन्ये, मत्कृतप्रयत्नामृतधारासिञ्चनेन मदाशांकुरस्य महावृक्षीभूतत्वात्। तासामत्यन्तायासलब्धानामुपनिषदां परिसङ्ख्यानं विंशोत्तरशतद्वयात्मकमभूत्तासामयमुपनिषद्वाक्यमहाकोशः समजनि, तत्प्रेक्षासमकालमेव प्रेक्षावतां विद्वद्वराणामामोदातिभूमिमारोहेदेवासंशयम्। तद्वत्तं पुरुषसूक्तं ऋग्यजुरादिवेदान्तर्गतमप्युपनिषदेवेति निर्विवादं निश्चितं मत्वा तद्वाक्यैरयं कोशः समलङ्कृतोऽस्माभिः "पुरा मत्पुत्र ! पुरुषसूक्तोपनिषद्रहस्यप्रकारं निरतिशयाकाराबलंबिना विराट्पुरुषेणोपदिष्टं रहस्यं ते विविच्योच्यते" इति नारदपरिव्राजकोपनिषदि (उप. २) ब्रह्मणा नारदायोक्तत्वात्। तथैव "त्रिसुपर्णोनिषदः पठनात् पंक्तिपावनः... त्रिसुपर्णश्रुतिर्ह्येषा निष्कृतौ त्रिदले रता" इति द्वितीयबिल्वोपनिषदि दृष्टत्वात्तद्वाक्यैरप्ययं विभूषित इति ज्ञातव्यं विचक्षणैः। अस्मत्सङ्कलितबृहदुपनिषत्संग्रहे सश्रीसूक्त एत आलोचयतामालोचनगतो भविष्यत एवेति।

अत्र केचिद्वदन्ति–'उपनिषदस्तु दशैव त्रयोदश वा, या अबोधशब्दसुबोधाय श्रीमच्छङ्कराचार्यवर्यैः प्रायशः शब्दशो व्याख्याताः, यदीतरास्तत्कालीना भवेयुस्तर्हि ता अपि कथं न तद्व्याख्याविभूषिता दृग्गोचरतामायान्ति?' इति। तदसत्। श्रीमच्छङ्करानन्द-नारायण-रामतीर्थादि-यतिवरैश्चत्वारिंशदधिकानामथर्वशिखाद्युपनिषदां कृतानि व्याख्यानानि दृश्यन्ते। तत्र श्रीमद्यतिवर-नारायणस्वामिपादैस्तु प्रत्युपनिषद्व्याख्यानस्यादावन्ते च 'नारायणेन रचिता श्रुतिमात्रोपजीविना' इत्यनेन पद्येन स्वीयाधारकृतयः श्रुतिपराः समर्थिताश्च दृश्यन्ते। अत ईशावास्यादित्रयोदशोपनिषदामिव तदितरासां श्रुतिमयत्वसिद्धेर्दर्शनात्॥ ॥ केचिद्वैयाकरणाचार्या नैयायिकादयश्च लिखितकतिपयोपनिषद्गतमपशब्दितं ह्रस्वदीर्घादिकं च लेखकप्रमादोद्भूतं स्यादिति जानन्तोऽपि नाङ्गीकुर्वन्ति तत्समीकर्तुं, कथयन्ति च यथादृष्टश्रुतमेव मुद्रणीयं, न वयं तत्र हस्तप्रक्षेपं कर्तुं शक्नुम इति। तथापि मया लेखकप्रमादोद्भूतो हस्तदोषोऽयमिति निश्चित्यादिमान्तिमसम्बन्धमनतिक्रम्य तद्गतामशुद्धिप्रचुरतां यथामति दूरीकृत्य तद्वाक्यान्यत्र समावेशितानि। आस्तां तावत्, प्रकृतमनुसरामः।

अत्रोल्लिखितानामुपनिषदां प्राचीनार्वाचीनत्वं, तद्व्याख्यातॄणां परिचयः, उपनिषद्गतास्फुटशब्दार्थपरिज्ञानं, अनेकार्थात्माविशङ्का यत्र यत्रोपयुक्तत्वेनोपनिषत्सु दृग्गोचरा भवन्ति तेषां स्थलनिर्देशः, उपनिषदुपलब्धिस्थानादि चैतद्विषयाणामत्रोल्लेखनमावश्यकमपि तद्यथावसरं यथामत्यस्योत्तरार्धे विद्वदग्रेसराणामग्रे निधापयिष्यामः, उत्तरार्धस्याप्यविलम्बिततया मुद्रणावश्यकत्वात्। बृहदुपनिषत्संग्रहेण साकमचिरादेव तत्सर्वं प्रकाशीभविष्यत्येव।

आदिमपाठ्यविषयाः ।

एतदुपनिषद्वाक्यकोशोपयुक्ताजिज्ञासुभिः संस्कृतसाररसतोपासकैः पण्डितवरैः शास्त्रि-पौराणिक-प्रवचनकर्त्रादिभिश्च प्रथमं ज्ञातृज्ञेयज्ञानात्मानात्मात्मीय-चित्तचिन्तनीय-ध्यातृध्येयध्यान-स्वमहमादिशब्दारम्भिवाक्यानि शुद्धसत्त्वान्तःकरणेन प्रविचार्यास्योपयोगिता निर्धार्या ।

१–अत्र सर्वाणि वाक्यान्यकारादिवर्णक्रमेणैव लिखितानि; किन्तु ' ओङ्कारं प्रथमं कृत्वा ततो ब्रह्म प्रवर्तयेत् । अन्यथा विपरीतं तद्ब्रह्म स्यान्नात्र संशयः (प्रयोगपारिजाते यमः) इति धर्मशास्त्रानुशासनात्, श्रुत्यध्ययनस्य सर्वस्योङ्कारपूर्वकत्वात्, उपनिषदामपि श्रुतिविशेषत्वाच्च प्रणवादीनि वाक्यानि प्रथमं निवेश्य ततोऽकारादिक्रम आदृतः । २–(?) ईदृक् चिह्नाङ्कितवाक्यं ' जेकब् ' महोदयकृतोपनिषच्छब्दकोशादुपात्तम् । एवंविधानि वाक्यानि च ' घ ' वर्णादिवाक्यपर्यन्तमेव संगृहीतानि । ३– + इति चिह्नं प्रकृतस्य वाक्यस्यान्यत्रापि निर्दिश्यमानस्थानसूचकम् । ४– एतच्चिह्नमुपात्तवाक्यस्य तस्यामेवोपनिषदि निर्दिष्टस्थानेष्वाम्रेडनबोधकम् । ५ –...इदं विस्तारभयात् त्यक्तानां शब्दानां सूचकम् । ६–अत्र क्वचित् पदच्छेदः पङ्क्त्यायतिपरिजिहीर्षया न विहितः । ७–दूरान्वयवन्ति द्राघिष्ठानि च वाक्यानि– यथाऽऽचार्यैरुदाह्रियन्ते तथा– द्विधा त्रिधा वा कृत्वाऽत्र निवेशितानि । समप्राण्यपि च तानि तत्तदादिवर्णानुसारेण सङ्गृहीतान्येवेति न केनचनात्र विप्रतिपत्तव्यम् । ८–वाक्यारम्भप्रधानपदाद्यवर्णमनुसृत्यैव सन्निवेशनं विधाय, तदारम्भगतानि ' अथ– अतः–खलु ' प्रभृतीनि पदानि क्वचित् ( ) ईदृक् चिह्नान्तरे लिखितानि । ९–अत्र निर्दिष्टाः खण्डाध्यायादयश्च प्रकाश्यमानं बृहदुपनिषत्संग्रहमनुसरन्ति । १०–उपनिषदां नामादिसङ्केताश्च सुस्पष्टत्वात् कोशानुशीलनावसर एव बुध्येरन् । ११ मुद्रितामुद्रितोपनिषत्सु कियन्त्यो निरङ्का अपि सन्ति ता यथावसरं यथामति च साङ्काः कृत्वैव तत्तदुपनिषद्वाक्यमत्र लिखितम्, यतस्तद्वाक्योपलब्धिः सुकरा स्यात्तथा यतितमिति वाचकवृन्दपथं यास्यत्येव ।

उपनिषद्वाक्यकोशस्यास्य प्रणयनं केन प्रकारेण कथं जातं तदादावेव निर्दिष्टम् । तत्कार्यसमारम्भे प्रसिद्धाप्रसिद्धा (मुद्रितामुद्रिताः) उपनिषन्मूलभाष्यादिग्रन्था इतस्ततो य उपलब्धास्ते सर्वेऽद्वैतपन्थीयानामेव । ततोऽस्याखिलसाम्प्रदायिकानामप्युपयुक्तासिद्धिं चिकीर्षुणा मया तत्तत्साम्प्रदाय्युपनिषद्ग्रन्था बहुशोऽन्वेषितास्तदा केवलं माध्वापरपर्यायद्वैतपन्थीयाः सभाष्येशावास्यादयो दशोपनिषदः समासादिताः । तदन्तर्गताः पाठभेदास्तन्मूलत एवात्र सङ्कलिताः, माध्वभाष्यस्य गद्यपद्यात्मकत्वात्; पद्यात्मके भाष्ये पाठान्तरव्याकृतेरसंभवाच्च । विशिष्टाद्वैतपन्थीयास्ताः सभाष्याः क्वचिन्मुद्रिता इति केवलं शुश्रुमः । शुद्धाद्वैतीयानां पुष्टिमार्गीयाणां तु दशोपनिषत्पाठान्तराण्यपि सन्तीति किंवदन्त्याकर्ण्यते, क्वचिद्दृष्टान्यपि मया तद्ग्रन्थेषु, परंतु तदाप्तिः सुदुर्लभैव । तथापि यदि तानि मद्भागधेयवशाद्धस्तगतानि भवेयुः, यथोचितस्थलदानेन चात्र विभूषितानि भवेयुस्तर्हि कृतार्थो भवेयम् ।

अन्यच्च " यैः सङ्कलितसकलसकलविधैर्विद्याभिकाषिभिर्विद्याधनदानशौण्डैः श्रीमत्कर्णोर्वीपसुतैः प्रतापसिंहमहाराजैर्दरराजर्षेरिव्स्य दशैकादशवार्षिकैः कृतायासखण्डितायासस्य कल्पवृक्षेणेव स्वच्छायाश्रितस्य तवेप्सिततमं पूरयित्वा स्वश्रमपीव उपनिषद्वाक्यमहाकोशोऽङ्गीकृतः, तेषां कीर्तिकीर्तने सगुणगणधन्यवादवदाने च कथं त्वं समविकासकारितयशोभास्करकरैराकलितचित्तकमलहस्तो जरठः समर्थो भवितुमिच्छसि " इति मम मानसं मां हसति, उपदिशति च मूलसिञ्चनेन वृक्षाग्रं यथोल्लसति सफलीभवति च तथा त्वमपि यैः साधनभूतैर्महाराजः प्रसादितस्तानुपकर्तॄन्स्मर " इति । अतस्तानेव सौजन्यशालिनः परोपकृतिपरांस्तत्तदधिकाराधिकृतान् धन्यवादार्हान् रा. रा. शं. म. पगारोपाभिधानान्, ' डॉ. लेले ' इत्युपाख्यान् डॉ. भट्टाचार्यान्, प्रो. श्री. स. ' भावे ' इत्युपाख्यान्, वि. पा. ' नेने ' इत्याख्यांश्चाहं तत्कृतोपकारभारेण नम्रीभूतः सादरं सप्रेम च संस्तूय निवेदयामि तत्तदुपकारजातानिमहत्यनुकम्पा नहि शक्या कदापि विस्मर्तुमित्यलमतिपल्लवितेन ।

भावत्पादपांसुः—

साधले इत्युपाख्यो गांधुस्तुर्णजातवः

उपनिषन्नामादिसूची ।

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
१ अक्षमालोपनिषत्	अ. मा.	वाक्यात्मकः मंत्रात्मकश्च		
२ अक्ष्युपनिषत्	अक्ष्युप. अक्ष्यु.	*वाक्यात्मकः *पद्यात्मकश्च		
३ अथर्वशिखोपनिषत्	अ.शिखो.,अ.शि.	वाक्यात्मकः		
० अथर्ववेदसंहिता	अथर्व.,अथर्व.सं.	कांडात्मकः		
४ अथर्वशिरउपनिषत् (शिवोप. रुद्रोप.)	अ. शिरः.	खंडात्मकः	वाक्यात्मकः मंत्रात्मकश्च	
५ अद्वयतारकोपनिषत्	अद्वयता.,अ.ता.	वाक्यात्मकः पद्यात्मकश्च		
६ अद्वैतप्रकरणम् (मांडू.)	अद्वैत.	पद्यात्मकः		
७ अद्वैतोपनिषत्	अद्वैतो.	वाक्यात्मकः		
८ अद्वैतभावनोपनिषत्	अद्वैत.भा.	वाक्यात्मकः		
९ अध्यात्मोपनिषत्	अध्यात्मो.	वाक्यात्मकः पद्यात्मकश्च		
१० अनुभवसारोपनिषत्	अनु. सा.	वाक्यात्मकः पद्यात्मकश्च		
११ अन्नपूर्णोपनिषत्	अ. पू.	अध्यायात्मकः	पद्यात्मकः	
१२ अमनस्कोपनिषत्	अमन.	अध्यायात्मकः	पद्यात्मकः	
१३ अमृतनादोपनिषत्	अमृतना.,अ.नादो.	पद्यात्मकः		
१४ अरुणोपनिषत्	अरुणो.	मंत्रात्मकः		
१५ अलातशान्तिप्र. (माण्डूक्योपनिषत्कारिकाः)	अ. शां.	पद्यात्मकः		
१६–१ अवधूतोपनिषत्	१ अवधू.	वाक्यात्मकः पद्यात्मकश्च		
१७–२ अवधूतोपनिषत्	२ अवधू.	पद्यात्मकः		

* गद्यं पद्यमिति प्राहुर्वाङ्मयं द्विविधं बुधैः । वर्णमात्राप्रभेदेन पद्यं चतुर्विधं स्मृतम् ॥ पद्यं चतुष्पदी, तच्च वृत्तं जातिरिति द्विधा । वृत्तमक्षरसङ्ख्यातं जातिर्मात्राकृता भवेत् ॥ वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः । वाक्योच्चयो महावाक्यमित्थं वाक्यं द्विधा मतम् ॥ स्वार्थबोधसमाप्तानामङ्गाङ्गित्वव्यपेक्षया । वाक्यानामेकवाक्यत्वं पुनः संभूय जायते ॥ ॥ वह्निपुराणे— प्राप्यते ज्ञानकथनं परलोकानुभाषितम् । स्वर्गापवर्गसिद्ध्यर्थं भाषितं यत्सुशोभनम् ॥ वाक्यं मुनिवरैः शान्तैस्तद्विज्ञेयं सुभाषितम् ॥ रागद्वेषानृतक्रोधकामतृष्णानुसारि यत् ॥ वाक्यं निरयहेतुत्वात्तदभाषितमुच्यते ॥ संस्कृतेनापि किं तेन मृदुना ललितेन वा ॥ अविद्यारागवाक्येन संसारक्लेशहेतुना ॥ यच्छ्रुत्वा जायते पुण्यं रागादीनां च संक्षयः । विरूढमपि तद्वाक्यं विज्ञेयमतिशोभनम् ॥ [इति श. चिं. कोशः]

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
१८ अव्यक्तोपनिषत्	अव्यक्तो.	वाक्यात्मकः		
१९ आगमप्रकरणम्	आगम.	पद्यात्मकः		
(मांडूक्योपनिषत्कारिकाः)				
२० आचमनोपनिषत्	आचम.	वाक्यात्मकः		
(आचमनीयो.)				
२१ आत्मपूजोपनिषत्	आ. पू.	वाक्यात्मकः		
२२ आत्मप्रबोधोपनिषत्	आत्मप्र.	वाक्यात्मकः		
(आत्मबोधो.)		पद्यात्मकश्च		
२३–१ आत्मोपनिषत्	१ आत्मोप.	वाक्यात्मकः		
२४–२ ,,	२ आत्मो.	पद्यात्मकः		
२५ आथर्वणद्वितीयोपनिषत्	आथ. द्वि.	वाक्यात्मकः		
	आथर्व. द्वि.	मंत्रात्मकश्च		
० आपस्तम्बश्रौतसूत्रम्	आप. श्रौ.सू.			
२६ आयुर्वेदोपनिषत्	आयुर्वे.	पद्यात्मकः		
२७ आरुणिकोपनिषत्	आरुणि.,आरु.	वाक्यात्मकः		
(आरुणेय्युप.)				
२८ आर्षेयोपनिषत्	आर्षे.,आर्षेयो.	खण्डात्मकः	वाक्यात्मकः	
२९ आश्रमोपनिषत्	आश्रमो.	वाक्यात्मकः		
३० इतिहासोपनिषत्	इतिहा.	वाक्यात्मकः		
		पद्यात्मकश्च		
३१ ईशावास्योपनिषत्	ईशावा.,ईशा.	मंत्रात्मकः		
३२ उपनिषत्स्तुतिः	[शिवरहस्यान्तर्गताऽप्यलभ्या.		अध्या. ५४]	
३३ ऊर्ध्वपुण्ड्रोपनिषत्	ऊर्ध्वपु.	वाक्यात्मकः		
	ऊर्ध्वपुं,ऊ.पुं.	पद्यात्मकश्च		
० ऋग्वेदसंहिता	ऋक्सं.,	अष्टकात्मकः	अध्यायात्मकः	वर्गात्मकः
अष्टकात्मिका	ऋ. अ.	,,	,,	,,
मंडलात्मिका	ऋ.मं.	मण्डलात्मकश्च	सूक्तात्मकः	मंत्रात्मकः
० ऋग्वेदखिल.	ऋ.खि.श्री.सू.	मंत्रात्मकः		
३४ एकाक्षरोपनिषत्	एकाक्ष.ए.उ.	पद्यात्मकः		
३५–१ ऐतरेयोपनिषत्	१ ऐत.	अध्यायात्मकः	खण्डात्मकः	वाक्यात्मकः
३६–२ ,, (आत्मषट्को.)	२ ऐत.	खण्डात्मकः	वाक्यात्मकः	
३७–३ ,,	३ ऐत.	अध्यायात्मकः	खंडात्मकः	वाक्यात्मकः
३८ कठरुद्रोपनिषत्	कठरु.	वाक्यात्मकः	०	
(कण्ठो.)		पद्यात्मकश्च		

	उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
३९	कठोपनिषत्	कठो.	वाक्यात्मकः	पद्यात्मकः	
४०	कठश्रुत्युपनिषत्	कठश्र.	वाक्यात्मकः		
४१	कलिसन्तरणोपनिषत् (हरिनामोप.)	कलिसं.	वाक्यात्मकः पद्यात्मकश्च		
४२	कात्यायनोपनिषत्	कात्याय.	वाक्यात्मकः		
४३	कामराजकीलितो. द्धारोपनिषत्	कामरा. कामराज.	वाक्यात्मकः		
४४	कालाग्निरुद्रोपनिषत्	कालाग्नि., का.रु.	वाक्यात्मकः		
४५	कालिकोपनिषत्	कालिको.	वाक्यात्मकः पद्यात्मकश्च		
४६	कालीमेधादीक्षितोप.	का.मे.दी., का.मे.	वाक्यात्मकः		
४७	कुण्डिकोपनिषत्	कुण्डि. कुंडि. कुंडिको.	पद्यात्मकः वाक्यात्मकश्च		
४८	कृष्णोपनिषत्	कृष्णो.	वाक्यात्मकः पद्यात्मकश्च		
४९	केनोपनिषत्	केनो.	खण्डात्मकः	पद्यात्मकः वाक्यात्मकश्च	
५०	कैवल्योपनिषत्	कैव.	खण्डात्मकः	पद्यात्मकः	
५१	कौलोपनिषत्	कौलो., कौलोप.	वाक्यात्मकः		
५२	कौषीतकिब्राह्मणोप.	कौ.उ., कौ.त.	अध्यायात्मकः	वाक्यात्मकः	
५३	क्षुरिकोपनिषत्	क्षुरिको.	पद्यात्मकः		
५४	गणपत्यथर्वशीर्षोपनिषत्	गणप.	वाक्यात्मकः		
५५	गणेशपूर्वतापिन्युपनिष. (वरदपूर्वतापिन्यु.)	ग. पू.	उपनिषदात्मकः	वाक्यात्मकः	
५६	गणेशोत्तरतापिन्यु. (वरदोत्तरतापिन्यु.)	ग. श्रो.	उपनिषदात्मकः	वाक्यात्मकः	
५७	गर्भोपनिषत्	गर्भो.	वाक्यात्मकः		
५८	गान्धर्वोपनिषत्	गान्धर्वो.	वाक्यात्मकः		
५९	गायत्र्युपनिषत्	गायत्र्यु.	वाक्यात्मकः		
६०	गायत्रीरहस्योपनिषत्	गायत्रीर.	वाक्यात्मकः		
६१	गारुडोपनिषत्	गारुडो.	पद्यात्मकः मंत्रात्मकश्च		
६२	गुह्यकाल्युपनिषत्	गुह्यका.	पद्यात्मकः		

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
६३ गुह्यषोढान्यासोपनिषत्	गुह्यषो., गु.षो.	वाक्यात्मकः		
६४ गोपालपूर्वतापिन्युपनिषत्	गो. पू.	गद्यपद्यात्मकः		
६५ गोपालोत्तरतापिन्यु.	गोपालो.	खण्डात्मकः	गद्यपद्यात्मकः	
६६ गोपीचन्दनोपनिषत्	गोपीचं.	वाक्यात्मकः पद्यात्मकश्च		
६७ चतुर्वेदोपनिषत्	चतुर्वे.	वाक्यात्मकः पद्यात्मकश्च		
६८ चाक्षुषोपनिषत्	चाक्षुषो.	मंत्रात्मकः		
(चक्षुरुप., चक्षूरोगोप., नेत्रोपनिषदिति नामान्तराणि.)				
६९ चित्त्युपनि.	चित्त्यु.	खण्डात्मकः	वाक्यात्मकः	
७० छागलेयोपनि.	छाग., छागले.	खण्डात्मकः	वाक्यात्मकः	
७१ छान्दोग्योपनिषत्	छांदो., छान्दो., छां. उ., छां.	अध्यायात्मकः	खण्डात्मकः	वाक्यात्मकः
७२ जाबालदर्शनोपनिषत्	जा. द.	खण्डात्मकः	पद्यात्मकः	
७३ जाबालोपनिषत्	जाबालो. जाबा.,	वाक्यात्मकः		
७४ जाबाल्युपनिषत्	जाबाल्यु.	वाक्यात्मकः		
७५ तारसारोपनिषत्	तारसा.	गद्यपद्यात्मकः मंत्रात्मकश्च		
७६ तारोपनिषत्	तारोप.	वाक्यात्मकः		
७७ तुरीयातीतोपनिषत्	तुरीया.	वाक्यात्मकः		
७८ तुरीयोपनिषत्	तुरीयो.	वाक्यात्मकः		
७९ तुलस्युपनिषत्	तुलस्यु.	गद्यपद्यात्मकश्च		
० तैत्तिरीयमारण्यकं	तै. आ.	मंत्रात्मकः		
८० तेजोबिन्दूपनिषत्	ते. बिं.	अध्यायात्मकः	पद्यात्मकः	
० तैत्तिरीयसंहिता	तै. सं.			
८१ तैत्तिरीयोपनिषत्	तैत्ति.+	वाक्यात्मकः	अनुवाकात्मकः मंत्रात्मकश्च	वाक्यात्मकः
८२ त्रिपाद्विभूतिमहानारायणोपनिषत्	त्रि. म. ना., त्रि. म.	अध्यायात्मकः	वाक्यात्मकः	
८३ त्रिपुरातापिन्युपनि.	त्रि. ता.	उपनिषदात्मकः	मंत्रात्मकः वाक्यात्मकश्च	
८४ त्रिपुरोपनिषत्	त्रिपुरो.	मंत्रात्मकः		

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
८५ त्रिपुरामहोपनिषत्	त्रि.म., त्रि.महो.,	मंत्रात्मकः		
८६ त्रिशिखिब्राह्मणोपनि.	त्रि. ब्रा.	खंडात्मकः	वाक्यात्मकः पद्यात्मकश्च	
८७ त्रिसुपर्णोपनिषत्	त्रिसुप.	मंत्रात्मकः		
८८ दक्षिणामूर्त्युपनिषत्	द. मू.	वाक्यात्मकः		
८९ दत्तात्रेयोपनिषत्	दत्तात्रे.	खण्डात्मकः	वाक्यात्मकः।	
९० दत्तोपनिषत्	(अशुद्धप्रचुरा)			
९१ दुर्वासोपनिषत्	दुर्वासो.	पद्यात्मकः		
९२ १देव्युपनिषत्	देव्यु.	मंत्रात्मकः पद्यात्मकश्च		
९३ २ ,,	[शिवरहस्यान्तर्गताऽप्यप्राप्यलब्धा. अ. ९९]			
९४ द्वयोपनिषत्	द्वयो.	वाक्यात्मकः पद्यात्मकश्च		
९५ ध्यानबिन्दूपनिषत्	ध्या. बिं.	पद्यात्मकः		
९६ नादबिन्दूपनिषत्	ना. बिं.	पद्यात्मकः		
९७ नारदपरिव्राजकोपनि.	ना. प.	उपदेशात्मकः	वाक्यात्मकः पद्यात्मकश्च	
९८ नारदोपनिषत्	नारदो.	वाक्यात्मकः		
९९ नारायणपूर्वतापिन्यु.	ना. पू. ता.	खण्डात्मकः	वाक्यात्मकः	
१०० नारायणोत्तरतापिन्यु.	ना. उ. ता.	खण्डात्मकः	वाक्यात्मकः	
१०१ नारायणोपनिषत् (नारायणाथर्वशीर्षोप.)	नारा.	वाक्यात्मकः		
१०२ निरालम्बोपनिषत्	निरा., निरा.उ. निरा. लं.	वाक्यात्मकः		
१०३ निरुक्तोपनिषत्	निरुक्तो.	अध्यायात्मकः	वाक्यात्मकः पद्यात्मकश्च	
१०४ निर्वाणोपनिषत्	निर्वाणो.	वाक्यात्मकः		
१०५ नीलरुद्रोपनिषत्	नीलरु.	खण्डात्मकः	मंत्रात्मकः	
१०६ नृसिंहपूर्वतापिन्युपनि.	नृ. पू.	उपनिषदात्मकः	वाक्यात्मकः	
१०७ नृसिंहषट्चक्रोपनिषत्	नृ. षट्च.	वाक्यात्मकः		
१०८ नृसिंहोत्तरतापिन्युपनि.	नृसिंहो.	खण्डात्मकः	वाक्यात्मकः	
१०९ पञ्चब्रह्मोपनिषत्	पञ्चब्र., पं. ब्र.	वाक्यात्मकः पद्यात्मकः		

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
११० परब्रह्मोपनिषत्	परब्र.	वाक्यपद्यात्मकः		
१११ परमहंसपरिव्राजकोप.	प. हं. प.	वाक्यात्मकः		
११२ परमहंसोपनिषत्	प.हंसो.,प.हं.	वाक्यात्मकः		
११३ पारमात्मिकोपनि.	पारमा.	अनुवाकात्मकः	मंत्रात्मकः	
० पारस्करगृह्यसूत्रम्	पा. गृ. सू.			
११४ पारायणोपनिषत्	पारायणो.	मंत्रात्मकः		
११५ पाशुपतब्रह्मोपनिषत्	पा. ब्र.	वाक्यात्मकः पद्यात्मकश्च		
११६ पिण्डोपनिषत्	पिण्डो.	पद्यात्मकः		
११७ पीताम्बरोपनिषत्	पीतांबरो.	वाक्यात्मकः		
११८ पुरुषसूक्तोपनिषत्	पु. सू.	मंत्रात्मकः		
११९ पैङ्गलोपनिषत्	पैङ्गलो.	अध्यायात्मकः	वाक्यात्मकः पद्यात्मकश्च	
१२०–१ प्रणवोपनि.	१ प्रणवो.	पद्यात्मकः		
१२१–२ ,,	२ प्रणवो.	वाक्यात्मकः		
१२२ प्रश्नोपनिषत्	प्रश्नो.	प्रश्नात्मकः		
१२३ प्राणाग्निहोत्रोपनिषत्	प्राणाग्नि., प्रा. हो.	खण्डात्मकः	मंत्रात्मकः वाक्यात्मकश्च	
१२४ बटुकोपनिषत्. (वटुकोप.)	बटुको.	वाक्यात्मकः पद्यात्मकश्च		
१२५ बह्वृचोपनि.	बह्वृचो.	वाक्यात्मकः		
१२६ बाष्कलमन्त्रोपनि.	बा. मं.	वाक्यात्मकः		
१२७ १ बिल्वोपनि.	१ बिल्वो.	पद्यात्मकः		
१२८ २ ,,	२ बिल्वो.	वाक्यात्मकः पद्यात्मकः		
१२९ बृहज्जाबालोपनि.	बृ. जा., बृहज्जा.	ब्राह्मणात्मकः	वाक्यात्मकः पद्यात्मकश्च	
१३० बृहदारण्यकोपनि.	बृ.उ., बृह.	अध्यायात्मकः	ब्राह्मणात्मकः	वाक्यात्मकः
१३१ ब्रह्मबिन्दूपनिषत् (अमृतबिन्दूप.)	ब्र. बिं.	पद्यात्मकः		
१३२ ब्रह्मविद्योपनिषत्	ब्रह्मवि.,ब्र.वि.	पद्यात्मकः		
१३३ ब्रह्मोपनि.	ब्रह्मोप., ब्रह्मो.	वाक्यपद्यात्मकः		

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
१३४ भगवद्गीतोपनिषत्	भ. गी.	अध्यायात्मकः	पद्यात्मकः	
१३५ भवसन्तरणोपनि.	भवसं.	अध्यायात्मकः	पद्यात्मकः	
१३६ भस्मजाबालोपनि.	भ.जा., भस्मजा.	अध्यायात्मकः	वाक्यात्मकः	
१३७ भावनोपनि.(कापिलोप.)	भावनो.	वाक्यात्मकः		
१३८ भिक्षुकोपनिषत्	भिक्षुको.	वाक्यात्मकः		
१३९ मठाम्नायोपनिषत्	मठाम्ना.	वाक्यात्मकः		
० महावाक्यरत्नावलिः	म. वा. र.	प्रकरणात्मकः		
१४० मण्डलब्राह्मणोपनि.	मं. ब्रा.	ब्राह्मणात्मकः	वाक्यात्मकः	
१४१ मंत्रिकोपनिषत् (चूलिकोप.)	मंत्रिको.	पद्यात्मकः		
१४२ मल्लायुपनि.	(अशुद्धप्रचुरा कोशासंगृहीतवाक्या)			
१४३ महानारायणोपनि. (बृहन्नारायणो.—उत्तरनारायणो.)	महाना., म.ना.	खण्डात्मकः	मंत्रात्मकः	
१४४ महावाक्योपनि.	महावा.	वाक्यात्मकः		
१४५ महोपनिषत्	महो.	अध्यायात्मकः	पद्यात्मकः	
१४६ माण्डूक्योपनिषत्	माण्डू.	वाक्यात्मकः		
१४७ मुक्तिकोपनिषत्	मुक्तिको., मुक्ति.	अध्यायात्मकः	वाक्यपद्यात्मकः	
१४८ मुण्डकोपनि.	मुण्डको.,मुण्ड.	मुण्डकात्मकः	खण्डात्मकः	मंत्रात्मकः
१४९ मुद्गलोपनिषत्	मुद्गलो.	खण्डात्मकः	वाक्यात्मकः मंत्रात्मकः	
१५० मृत्युलांगूलोपनिषत्	मृत्युलां.	वाक्यात्मकः पद्यात्मकश्च		
१५१ मैत्रायण्युपनिषत्	मैत्रा.	प्रपाठात्मकः	वाक्यात्मकः	
१५२ मैत्रेय्युपनिषत्	मैत्रे., मैत्रे.उ.	अध्यायात्मकः	गद्य-पद्यात्मकः	
१५३ यज्ञोपवीतोपनिषत्	यज्ञोप.	वाक्यात्मकः पद्यात्मकश्च		
१५४ याज्ञवल्क्योपनिषत्	याज्ञव.	वाक्यात्मकः पद्यात्मकश्च		
१५५ योगकुण्डल्युपनिषत्	योगकुं.	अध्यायात्मकः	पद्यात्मकः	
१५६ योगचूडामण्युपनिषत्	यो. चू.	पद्यात्मकः वाक्यात्मकश्च		

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
१५७–१ योगतत्त्वोपनिषत्	१ यो. त.	पद्यात्मकः		
१५८–२ ,,	२ योगत.	पद्यात्मकः		
१५९ योगराजोपनिषत्	योगरा.	पद्यात्मकः		
१६० योगशिखोपनिषत्	यो. शि.	अध्यायात्मकः	पद्यात्मकः	
१६१ योगोपनिषत्	योगो.	पद्यात्मकः		
१६२ राजश्यामला-रहस्योपनिषत्	रा. श्या. र.	वाक्यात्मकः		
१६३ राधिकोपनिषत्	राधिको.	वाक्यात्मकः		
१६४ राधोपनिषत्	राधो.	प्रपाठात्मकः	वाक्यात्मकः	
१६५ रामपूर्वतापिन्युपनि.	रा.पू.,रामपू.	उपनिषदात्मकः	पद्यात्मकः	
१६६ रामरहस्योपनिषत्	रामर.	अध्यायात्मकः	पद्यात्मकः वाक्यात्मकः	
१६७ रामोत्तरतापिन्युपनि.	रामो., रामोत्त.	खण्डात्मकः	मंत्रात्मकः वाक्यात्मकश्च	
१६८ रुद्रहृदयोपनिषत्	रुद्रहृ.	पद्यात्मकः		
१६९ रुद्राक्षजाबालोपनि.	रु. जा.	पद्यात्मकः वाक्यात्मकश्च		
१७० रुद्रोपनिषत्	रुद्रो.,रुद्रोप.	वाक्यात्मकः		
१७१ लक्ष्म्युनिषत्	लक्ष्म्यु.	वाक्यात्मकः		
१७२ लांगूलोपनिषत्	लांगूलो.	मंत्रात्मकः		
१७३ लिङ्गोपनिषत्	लिङ्गो.	वाक्यात्मकः		
० वाजसनेयीसंहिता (यजुर्वे.)	वा. सं.	अध्यायात्मकः	मंत्रात्मकः (कंडिकात्मकः)	
१७४ वज्रपञ्जरोपनिषत्	व. पं.	वाक्यात्मकः		
१७५ वज्रसूचिकोप.	व.सू., वज्रसू.	वाक्यात्मकः		
१७६ वनदुर्गोपनिषत्	वनदु.	वाक्यात्मकः पद्यात्मकश्च		
१७७ वराहोपनिषत्	वराहो.	अध्यायात्मकः	पद्यात्मकः	
१७८ वासुदेवोपनिषत्	वासुदे., वासु.	वाक्यात्मकः		
१७९ विश्रामोपनिषत्	विश्रामो.	पद्यात्मकः		
१८० विष्णुहृदयोपनिषत्	विष्णुहृ.	खण्डात्मकः	मन्त्रात्मकः	
१८१ वैतथ्यप्रक. (मांडू.)	वैतथ्य.	पद्यात्मकः		

उपनिषन्नामानि	सङ्केतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
१८२ शरमोप.	शरमोपनिषत्	पद्यात्मकः वाक्यात्मकश्च		
१८३ शाट्यायनीयोपनिषत्	शाट्याय.	पद्यात्मकः वाक्यात्मकश्च		
१८४ शाण्डिल्योपनिषत्	शांडि., शाण्डि., शाण्डिल्यो., शां.	अध्यायात्मकः	खण्डात्मकः	वाक्यात्मकः पद्यात्मकश्च
१८५ शारीरकोपनिषत्	शारीर.	वाक्यात्मकः पद्यात्मकश्च		
१८६–१ शिवसङ्कल्पोपनिषत्	१ शिवसं.	मन्त्रात्मकः		
१८७–२ शिवसङ्कल्पोपनिषत्	२ शिवसं.	मन्त्रात्मकः		
१८८ शिवोपनिषत्	शिवो.	अध्यायात्मकः	पद्यात्मकः	
१८९ शुकरहस्योपनिषत्	शुकर., शु. र.	खण्डात्मकः	वाक्यात्मकः पद्यात्मकश्च	
१९० शौनकोपनिषत्	शौनको.	खण्डात्मकः	वाक्यात्मकश्च	
१९१ श्यामोपनिषत्	श्यामोप.	वाक्यात्मकः		
१९२ श्रीचक्रोपनिषत् (श्रीमद्भगवद्गीतोपनि.)	श्रीचक्रो.	मंत्रात्मकः	वाक्यात्मकश्च	
१९३ श्रीविद्यातारकोपनि.	श्रीवि. ता.	पादात्मकः	वाक्यात्मकः पद्यात्मकश्च	
१९४ श्रीसूक्तम्	श्रीसू.	मंत्रात्मकः		
१९५ श्वेताश्वोपनिषत्	श्वेता., श्वेताश्व.	अध्यायात्मकः	पद्यात्मकः मंत्रात्मकः	
१९६ षोढोपनिषत्	षोढो.	वाक्यात्मकः		
१९७ सङ्कर्षणोपनिषत्	सङ्कर्ष., संक.	वाक्यात्मकः		
१९८ सदानन्दोपनिषत्	सदानं.	वाक्यात्मकः पद्यात्मकश्च		
१९९ संध्योपनिषत्	सन्ध्यो.	वाक्यात्मकः पद्यात्मकश्च		
२००–१ सन्न्यासोपनिषत्	१ सं. सो.,	अध्यायात्मकः		
२०१–२ सन्न्यासोपनिषत्	२ सन्न्यासो.	वाक्यात्मकः पद्यात्मकः		
२०२ सरस्वतीरहस्योप.	सरस्व.	मन्त्रात्मकः पद्यात्मकश्च		

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
२०३ सर्वसारोप. (सर्वोपनि.)	सर्वसारो., सर्वसा.	वाक्यात्मकः		
२०४ सहवै. (सहवाउ.)	सहवै.	वाक्यात्मकः मंत्रात्मकश्च		
२०५ संहितोपनिषत्	संहितो.	वाक्यात्मकः मंत्रात्मकश्च		
२०६ सामरहस्योपनिषत्	सामर.	वाक्यात्मकः		
० सामवेदः	सामवे.			
२०७ सावित्र्युपनिषत्	सावित्र्यु.	वाक्यात्मकः		
२०८ सिद्धान्तविट्ठलोपनिषत्	सि.वि.	वाक्यात्मकः		
२०९ सिद्धान्तशिखोपनिषत्	सि. शि.	पद्यात्मकः मन्त्रात्मकश्च		
२१० सिद्धान्तसारोपनिषत्	सि. सा.	आवरणात्मकः	वाक्यात्मकः	
२११ सीतोपनिषत्	सीतो.,सीतोप.	वाक्यात्मकः पद्यात्मकश्च		
२१२ सुदर्शनोपनिषत्	सुदर्श.	वाक्यात्मकः पद्यात्मकश्च		
२१३ सुबालोपनिषत्	सुबालो.	खण्डात्मकः	वाक्यात्मकः	
२१४ सुमुख्युपनिषत्	सुमुख्यु.	गद्यात्मकः		
२१५ सूर्यतापिन्युपनिषत्	सूर्यता.	पटलात्मकः	वाक्यात्मकः पद्यात्मकश्च	
२१६ सूर्योपनिषत्	सूर्यो.	वाक्यात्मकः		
२१७ सौभाग्यलक्ष्म्युपनि.	सौभाग्य. सौ. ल.	वाक्यात्मकः पद्यात्मकश्च		
२१८ स्कन्दोपनिषत्	स्कन्दो.	”		
२१९ स्वसंवेद्योपनिषत्	स्वसंवे.	वाक्यात्मकः		
२२० हयग्रीवोपनिषत्	हयग्री.	वाक्यात्मकः		
२२१ हंसषोढोपनिषत्	हं.षोढो.,हंसषो.	मन्त्रात्मकः		
२२२ हंसोपनिषत्	हंसो.	वाक्यात्मकः		
० हिरण्यकेशीगृह्यसूत्रम्	हि. गृ. सू.			
२२३ हेरम्बोपनिषत्	हेरम्बो.	गद्यपद्यात्मकः		

॥ इत्युपनिषदः ॥

ॐ

ओङ्कारोऽयमजरोऽमरोऽभयोऽमृतः ।

ओङ्कारेण सर्वा वाक् सन्तृण्णा । ओङ्कार एवेदं सर्वम् ।

उपनिषद्वाक्यमहाकोशः

ॐ

ॐ

ॐ ॐ इति त्रिरुक्त्वा
    चतुर्थः शान्त आत्माप्लुत... — अ.शिखो. १

ॐ नमो भगवते नारायणाय — त्रि.म. ना. ७।९

ॐ नमो भगवते वासुदेवाय — त्रि.म. ना. ७।९

ॐ वाचि प्रतिष्ठा — बह्वृचो. २

ॐ अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ
    ए ऐ ओ औ अं अः — त्रि.म.ना.७।१०

ॐ अघोराय पुरुषाय पुरुषरूपाय
    वासुदेवाय नमो नमः — विष्णुहृ.२।२४

ॐ अङ्कार मृत्युञ्जय सर्वव्यापक
    प्रथमेऽक्षे प्रतितिष्ठ — अ. मा. ४

ॐ अदामो ३ पिबा ३ मों देवो
    वरुणः सविता २ — छां.उ.१।१२।५

ॐ अनिरुद्धाय पुरुषाय पुरुषरूपाय
    वासुदेवाय नमो नमः — विष्णुहृ. २।८

ॐ अपानात्मने ॐ तत्सद्भूर्भुवः सुवः — गोपालो. ३।४

ॐ अहं वृक्षस्य रेरिव — शांतिपाठः

ॐ आङ्काराकर्षणात्मक सर्वगत
    द्वितीयेऽक्षे प्रतितिष्ठ — अ. मा. ४

ॐ आदौ नम उच्चार्य ततो भगवते पदं — ह. मू. २

ॐ आपो ज्योती रसोऽमृतं ब्रह्म
    भूर्भुवः सुवरोम् — महाना. ११।७

ॐ आपो ज्योती रसोऽमृतं ब्रह्म
    भूर्भुवः स्वरों [मैत्रा.६।३५+ — त्रि.म.ना.७।११

ॐ आपोऽमृतमर्त्यस्य... जन्यते
    पुरुषोत्तमात् — कृ. पु. सि. ३

ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणः — शांतिपाठः

ॐ इङ्कार पुष्टिद क्षोभकर तृतीयेऽक्षे
    प्रतितिष्ठ — अ. मा. ४

ॐ इति तिस्रो मात्राः, एताभिः
    सर्वमिदमोतं प्रोतं चास्मिन् — मैत्रा. ६।३

ॐ इति प्रतिपद्यन्ते — शौनको. १।५

ॐ इतिप्रयुक्तआत्मज्योतिःसकृदावर्तते — अ. शिखो. १

ॐ इति ब्रह्म [तैत्ति. १।८।१+ — ना. प. ८।२

ॐ इति ब्रह्म भवति — तारसा. १।४

ॐ इति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपा-
    प्नवानीति — तैत्ति. १।८।१

ॐ इति ब्रह्मा प्रसौति — तैत्ति. १।८।१

ॐ इति ब्रह्मेति व्यष्टिसमष्टिप्रकारेण — ना. प. ८।१

ॐ इति शंसंति — छां.उ.१।१।९

ॐ इति सत्यम्	१ऐतरे. ३।६।४
ॐ इति संहरमानुसन्दध्यात्	नृसिंहो. ४।१
ॐ इति सामानि गायन्ति	तैत्ति. १।८।१
ॐ इति होवाच व्यञ्जासिष्टा इति [२, ३	बृ. उ. ५।२।१, + ६।२।१
ॐ इति होवाच[बृ.उ.३।९।१,१,१	+६।२।१
ॐ इति ह्युद्गायति तस्योपव्याख्यानं	छां.उ.१।१।१ +१।४।१
ॐ इति ह्येवानुजानाति	नृसिंहो. ८।५
ॐ इति ह्येव स्वरन्नेति	छां.उ.१।५।१,३
ॐ इतीदं सर्वम्	तैत्ति. १।८।१
ॐ इत्यक्षरम्	सन्ध्यो. २०
ॐ इत्यग्निहोत्रमनुजानाति	तैत्ति. १।८।१
ॐ इत्यग्रे व्याहरेत्	भ. जा. २।३
ॐ इत्यध्वर्युः प्रतिगरं प्रतिगृणाति	तैत्ति. १।८।१
ॐ इत्यनुजानीध्वं भूतैनमिति	नृसिंहो. ९।१
ॐ इत्यनेनैत उपासीताजस्रं	मैत्रा. ६।४
ॐ इत्यनेनोद्धृत्यानामयेऽग्नौ जुहोति	मैत्रा. ६।२६
ॐ इत्यनेनोर्ध्वमुत्क्रान्तः	मैत्रा. ६।२२
ॐ इत्यभिनिधापयन्ति	शौनको. १।५
ॐ इत्यभ्याददते	शौनको. १।५
ॐ इत्यस्याददते	शौनको. १।५
ॐ इत्यात्मानं युञ्जीत	महाना.१७।१३
ॐ इत्याश्रावयति	छां. उ.१।१।९
ॐ इत्युद्गायति[छां.उ.१।१।१+१।१।९	+१।४।१
ॐ इत्येकाक्षरमन्तःप्रणवं विद्धि	ना. प. ८।२
ॐ इत्येकाक्षरं ब्रह्म [ध्या.बिं. ९+ ब्रह्मवि.२+महाना.११।५+सूर्यो.९ अमृ. २०+ तारसा. २।१	अ. ना. २१ +१प्रणवो+२ भ.गी.८।१३
ॐ इत्येकाक्षरमात्मस्वरूपं	तारसा. १।३
ॐ इत्येकाक्षरं परं ब्रह्म तदेवोपासितव्यं	तारसा. २।१
ॐ इत्येकाक्षरं ब्रह्म ध्येयं	ध्या. बिं.९
ॐ इत्येकेन (एतेन) रेचयेत्	अ. ना.२१
ॐ इत्येतदक्षरमादौ प्रयुक्तं ध्यानं ध्यायितव्यं	अ.शिखो.१
ॐ इत्येतदक्षरमिदं सर्वं, तस्योपव्याख्यानं भूतं भव्यं भविष्यदिति नृ.पू.२।२+४।२+	माण्डू. १+ नृसिंहो. १।२
ॐ इत्येतदक्षरमुद्गीथमुपासीत	छां.उ.१।१।१ +१।४।१
ॐ इत्येतदक्षरमुद्गीथः	छां. उ.१।१।५
ॐ इत्येतदक्षरमुपासीत	छां. उ. १।४।१
ॐ इत्येतदक्षरस्य चैतत्	मैत्रा. ६।४
ॐ इत्येतदक्षरं परं ब्रह्म, अस्य पादाश्चत्वारः	अ. शिखो. १
ॐ इत्येतदक्षरं परं ब्रह्म तदेवोपासितव्यं	तारसा. २।१
ॐ इत्येतदनुकृति ह स्म वा अप्योश्रावय	तैत्ति. १।८।१
ॐ इत्येतदनुकृति ह स्म... आश्रावयन्ति (मा.)	तैत्ति. १।८।१
ॐ इत्येतद्व्याहरेत्	नारा. ३
ॐ इत्येतेन (एकेन) रेचयेत्	अ. ना. २१
ॐ इत्येव तदा ह्येषा एव समृद्धिः	छां. उ. १।१।८
ॐ इत्येव यदुद्भूतं ज्ञानं ज्ञेयात्मकं शिवम् । असंस्पृष्टविकल्पांशं प्राणस्पन्दो निरुच्यते	शाण्डि. १।३४
ॐ इत्येवं ध्यायथ आत्मानं, स्वस्ति वः	मुण्ड. २।२।६
ॐ इत्येवं ध्यायंस्तथाऽऽत्मानंयुञ्जीत	मैत्रा. ६।३
ॐ ईङ्कार वाक्प्रसादकर निर्मल चतुर्थेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ ईशानाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः	विष्णुह.२।२६
ॐ ईं ओं नमो भगवते श्रीमहागरुडाय ...	गारुडो. १०
ॐ ईसचरतिसचरति...वज्रेण स्वाहा	गारुडो. १२
ॐ उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ	कठो. १।१
ॐ उङ्कार सर्वबलप्रद सारतर पञ्चमेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ उदानात्मने ॐतत्सद्भूर्भुवः सुवः	गोपालो.३।८
ॐ ऊङ्कारोच्चाटनकर दुस्सह षष्ठेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ ऋङ्कार सङ्क्षोभकर चञ्चल सप्तमेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ ॠङ्कार सम्मोहनकरोज्ज्वलाष्टमेऽक्षे प्रतितिष्ठ	अ. मा. ४

ॐ लृङ्कार विद्वेषणकर मोहक नवमेऽक्षे प्रतितिष्ठ — अ. मा. ४
ॐ लॄङ्कारमोहकरदशमेऽक्षेप्रतितिष्ठ — अ. मा. ४
ॐ एङ्कार सर्ववश्यकर शुद्धसत्त्वैकादशेऽक्षे प्रतितिष्ठ — अ. मा. ४
ॐ ऐङ्कार शुद्धसात्त्विक पुरुषवश्यकर द्वादशेऽक्षे प्रतितिष्ठ — अ. मा. ४
ॐ ऐं ह्रीं श्रीं आनन्देश्वराय विद्महे सुधादेव्यै...प्रचोदयात्,तन्नो अर्धनारीश्वरः प्रचोदयात् — वनदु. १४६
ॐ ओङ्काराखिलवाक्य नित्यशुद्ध त्रयोदशेऽक्षे प्रतितिष्ठ — अ. मा. ४
ॐ औङ्कार सर्ववाङ्मय वश्यकर चतुर्दशेऽक्षे प्रतितिष्ठ — अ. मा. ४
ॐ अंङ्कार गजादिवश्यकर मोहन पञ्चदशेऽक्षे प्रतितिष्ठ — अ. मा. ४
ॐ अःकार मृत्युनाशनकर रौद्र षोडशेऽक्षे प्रतितिष्ठ — अ. मा. ४
ॐ कङ्कार सर्वविषहर कल्याणद सप्तदशेऽक्षे प्रतितिष्ठ — अ. मा. ४
ॐकार एवेदं सर्वं — छां.उ.२।२४।४
ॐकारध्वनिनादेन — ध्या. बिं. २३
ॐकारप्रभवं सर्वं — ध्या. बिं. १६
ॐकारमात्मानमुपदिदेश — नृसिंहो. ९।१
ॐकारप्रभवा देवाः — ध्या. बिं. १६
ॐकारप्रभवाः स्वराः — ध्या. बिं. १६
ॐकारप्लवेन...पारं तीर्त्वा — मैत्रा.६।२४
ॐकारप्लवेनान्तर्हृदयाकाशस्य पारं — मैत्रा. ६।२८
ॐकारस्तु तथा योज्यः [ब्र.वि.१२+ — प्रणवो. १२
ॐकारस्त्रिविधो विचित्रकरणैः प्राणश्च वायोर्जयः... — अमन.२।१०७
ॐकारस्योत्पत्तिं विप्रो न जानाति, तत्पुनरुपनयनं — २ प्रणवो. १४
ॐकारस्वरभूषितं — पञ्चब्र. १४
ॐकारं तत्र चिन्तयेत् — १ यो.शि.१।७१
ॐकारं प्रणवात्मानं तन्मेमनःशिव... — २ शिवसं. २१
ॐकारं रथमारुह्य — अमृ. बिं. २
ॐकारं सर्वेश्वरं द्वादशान्ते — नृसिंहो. ६
ॐकारात्सावित्री — बटुको. २७
ॐकाराद्व्याहृतिरभवत् — गायत्रीर. १
ॐकारान्तरालिकं मनुमावर्तयेत् — गो. पू. ३।१०
ॐकारेण सर्वा वाक् सन्तृण्णा — छां.उ. २।२३।४
ॐकारेणेममात्मानं परमं ब्रह्म नृसिंहमन्विष्य ... — नृसिंहो. ७।१
ॐकारो परे ब्रह्मणि पर्यवसितः — नृसिंहो. ६।३
ॐकारो बाणः शक्तिरेव पीठं — लिङ्गोप. २
ॐकारोऽयमजरोऽमरोऽभयोऽमृतः — गोपालो. २।१४
ॐकारो यूपः — प्रा. हो. ४।३
ॐकारो वेदानामुत्तरोपनिषदं व्याख्यास्यामः — २ प्रणवो. १४
ॐ काली कपालिनी — कालिको. १
ॐ कुमारीपदत्रिहारबाणोग्रमूर्तये ... स्वाहा — लांगूलो. ७
ॐ केशवाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः — विष्णुहृ. २।१०
ॐ क्रतो स्मर कृतं स्मर[ईशा.१७+ — बृ. उ. ५।१५।१
ॐ क्लीं कृष्णाय गोविन्दाय गोपीजन ...स्वाहा — त्रि.म.ना.७।१०
ॐ क्षङ्कार परात्पर तत्त्वज्ञापक... शिखामणौ... — अ. मा. ४
ॐ खङ्कार सर्वक्षोभकर व्यापकाष्टादशेऽक्षे प्रतितिष्ठ — अ. मा. ४
ॐ खं ब्रह्म, खं पुराणं वायुरं खमिति — बृ. उ. ५।१।१
ॐ खेचराय नमः...सत्त्वाय नमः — अक्ष्यु. १
ॐ गङ्कार सर्वविघ्नशमन महत्तरैकोनविंशेऽक्षे प्रतितिष्ठ — अ. मा. ४
ॐ गं गणपतये नमः — गणप. ७
ॐ गोविन्दाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः — विष्णुहृ. २।११
ॐ घङ्कार सौभाग्यद स्तम्भनकर विंशेऽक्षे प्रतितिष्ठ — अ. मा. ४
ॐ घृणिः सूर्य आदित्यः — त्रि.म.ना.७।११
ॐ ङङ्कार सर्वविषनाशकरोग्रैकविंशेऽक्षे प्रतितिष्ठ — अ. मा. ४
ॐ चक्षुश्चक्षुश्चक्षुस्तेजः स्थिरो भव — चाक्षुषो. २
ॐ चङ्काराभिचारघ्न क्रूर द्वाविंशेऽक्षे प्रतितिष्ठ — अ. मा. ४

ॐ छङ्कार भूतनाशकर भीषण त्रयोविंशेऽक्षे प्रतितिष्ठ — अ. मा. ४

ॐ जङ्कार कृत्यादिनाशकर दुर्धर्ष चतुर्विंशेऽक्षे प्रतितिष्ठ — अ. मा. ४

ॐ झङ्कार भूतनाशकर पञ्चविंशेऽक्षे प्रतितिष्ठ — अ. मा. ४

ॐ ञङ्कार मृत्युप्रमथन षड्विंशेऽक्षे प्रतितिष्ठ — अ. मा. ४

ॐ टङ्कार सर्वव्याधिहर सुभग सप्तविंशेऽक्षे प्रतितिष्ठ — अ. मा. ४

ॐ ठङ्कार चंद्ररूपाष्टाविंशेऽक्षे प्रतितिष्ठ — अ. मा. ४

ॐ डङ्कार गरुडात्मक विषघ्न शोभनैकोनत्रिंशेऽक्षे प्रतितिष्ठ — अ. मा. ४

ॐ ढङ्कार सर्वसम्पत्प्रद सुभग त्रिंशेऽक्षे प्रतितिष्ठ — अ. मा. ४

ॐ णङ्कार सर्वसिद्धिप्रद मोहकरैकत्रिंशेऽक्षे प्रतितिष्ठ — अ. मा.२४

ॐ तङ्कार धनधान्यादिसम्पत्प्रद प्रसन्न द्वात्रिंशेऽक्षे प्रतितिष्ठ — अ. मा. ४

ॐ तत्पुरुषाय पु...पु...वासु... — विष्णुहृ. २।२५

ॐ तत्पुरोर्नमः — महाना. १६।१

ॐ तत्सदिति निर्देशः — भ. गी. १७।२३

ॐ तत्सत्यम्, ॐ तत्सर्वम् — महाना. १६।१

ॐ तत्सद्यत् परं ब्रह्म — रामो. २।४

+गणेशो. १४+ — श्रीवि.ता.४।१

एतत्परायणम् (आत्मान्वेषणम्) प्रश्नो. १।१०
(अथ) एतत्पूर्णमध्यात्मं यन्नेति १ऐत. ३।६।६
एतत्पैप्पलादं महाशास्त्रं योऽधीते..
स जन्ममरणेभ्यो मुक्तो भवति शरभो. ३७
(अथ)एतत्प्राणः प्रविवेश तत्तदेव.. कौ.उ. २।१४

एतत् (भस्म) प्रातः प्रयुञ्जानो रात्रि-
कृतात्पापात्पूतो भवति भस्मजा.१।७
(?)एतत्त्रयं सदेकमयमात्मात्मो एकः... बृ.उ.१।६।३
एतत्सङ्घातं कर्मणिसञ्चितं त्वगादियुक्तं
स्थूलशरीरं भवति पैङ्गलो.२।२
एतत्सत्यधर्मोनभसोऽन्तर्गतस्यतेजसो-
ऽशमात्रमेतत् मैत्रा.६।३९
एतत्सत्यं ब्रह्मपुरम्, अस्मिन्कामाः.. छान्दो.८।१।५
एतत्सत्यं ब्रवीमि ब्रह्मविद्यां वरिष्ठां
देवेभ्यः प्राणेभ्यः परब्र. १
एतत्समीरणे प्रकाशप्रक्षेपकौष्ण्य-
स्थानीयम् मैत्रा. ७।११
एतत्सर्वं गणेशः ग. शो.२। ४
एतत्सर्वं प्राण एवैतन्मयो वा बृह. १।५।३
(एवं ह वा) एतत्सर्वं पर आत्मनि
सम्प्रतिष्ठते प्रश्नो. ४।७
एतत्सर्वं यन्मूर्तं चामूर्तं च
तस्मान्मूर्तिरेव रयिः प्रश्नो. १।५
एतत्सर्वं भूःस्वाहेत्यप्सु परित्यज्या-
त्मानमन्विच्छेत् जा.बा.६
एतत्सामगायन्नास्ते हा३वुहा३... तैत्ति.३।१०।५
एतत्सामवेदशिरोऽधीते नारा. ३
एतत्सुदर्शनं महाचक्रं तस्य मध्ये... नृ. पू. ५।७
एतत्सोमस्यसूर्यस्यसर्वलिंगंस्थापयति महाना. १०।३
एतत्स्थितमेतत्सत्यस्यैतस्य मूर्तस्य.. बृह. २।३।२
एतदकरणे प्रत्यवैति ब्राह्मणः भस्मजा. १।६
(?)एतदक्षरं गार्ग्यदृष्टं द्रष्टृ बृ.उ.३।८।११
एतदज्ञाय कृष्णमाराधयितुमिच्छन्
स मूढतमः (?) राधिको. ५
एतदधिविधाय ऋषिरवोचत् तैत्ति. १।७।१
एतदधीयानः सर्वक्रतुफलं लभते सङ्कर्षे. ३
एतदनृतमुभयतः सत्येन परिगृहीतम् बृह. ५।५।१
एतदन्यच्चतुर्थमन्तस्थरूपमिति ह
स्माह...माण्डूकेयः ३ऐत.२।१।२
एतदपरिमितधा चात्मानं विभज्य
पूरयतीमाँल्लोकान् मैत्रा. ६।२६
(अथ) एतदपि यन्त्यन्ततः मैत्रा. ६।११
एतदप्रमेयं ध्रुवम् (ब्रह्म–आत्मा) बृह. ४।४।२०

एतदमृतमभयमेतद्ब्रह्म [छांदो.४।१५।१ [+८।३।४ [+८।७।४+८।१०।१+८।११।१+ मैत्रा.१।२ [नृसिंहो.८।२+८।४ +८।६+८।७	
एतदमृतमभयमेतत्परायणम्	प्रश्नो. १।१०
एतदमृतमेतद्यदेतत्त्यम्	बृह.२।३।३,५
(ओं) एतदस्मिन्नक्षरे संसृज्यते	छां. उ. १।१।६
एतदालम्बनं ज्ञात्वा ब्रह्म लोकेमहीयते	कठो. २।१७
एतदालम्बनं परम्, एतत्... ज्ञात्वा	कठो. २।१७
एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्	कठो. २।१७
एतदिहामुत्रोपाधिनैराश्येनामुष्मिन्मनःकल्पनं,एतदेव च नैष्कर्म्यम्	गो. पू. २।२
एतदुक्त्वाऽतर्हृदयः शाकायन्यस्तस्मै नमस्कृत्वा..	मैत्रा. ६।३०
एतदुपनिषदं विन्यसेत्	आश्रमो. ५
(खलु)एतदुपनिषदं विद्वान्य एवं वेद	आरुणि. ५
एतदु हास्या एतत्स यावदिदंप्राणिति	गायत्र्यु. १
एतदु हैवास्या एतत्स यावदेषु त्रिषु लोकेषु तावद्ध जयति [बृह.	६।१४।१,२,३
एतदु हैवन्द्रो विश्वामित्राय प्रोवाच	१ ऐत. २।४।२
एतदृग्वेदशिरोऽधीते	नारा. १
एतदृग्वेदो यजुर्वेदः सामवेदो.. शिक्षा कल्पो व्याकरणं ... सर्वाणि भूतानि (महतोभूतस्यनिःश्वसितं)	सुबालो. २।१
एतदेकशतं नाडीनां तासां शतं शतं एकैकस्यां... प्रतिशाखा ... भवन्ति तासु व्यानश्चरति	प्रश्नो. ३।६
एतदेव (मनोनैराश्यं) च नैष्कर्म्यम्	गो. पू. २।२
एतदेव ज्वलदेतद्धि महाविभूति	नृसिंहो. ५।६
एतदेव ततोभूय इत्येतदेव ततोभूयः	छान्दो. ३।११।६
एतदेव नमाम्येतद्धि महाविभूति	नृसिंहो. ११६।५
एतदेवनातिशयन्ते–नातिशीयन्ते (पा. पा.)	छां.उ.३।१२।३
एतदेव नातिशीयन्ते [छान्दो.	३।१२।३,४
एतदेव नृसिंहमेतद्धि महाविभूति	नृसिंहो. ५।६
एतदेव परमतत्त्वम् (मनोलयरूपं)	मं. ब्रा. ५।१
एतदेव परं ज्ञानं शिव इत्यक्षरद्वयम्	शिवो. १।१७
एतदेव परं ध्यानमेतदेव परं तपः (गणेशज्ञानम्)	ग. शो. १।५
एतदेव ब्रह्मापिसर्वज्ञंमहामायंमहावि०	नृसिंहो.. ५।६
एतदेव भद्रमेतद्धि महाविभूति	नृसिंहो. ५।६
एतदेव भीषणमेतद्धि महाविभूति	नृसिंहो. ५।६
एतदेव महदेतद्धि महाविभूति	नृसिंहो. ५।६
एतदेव मृत्युर्मृत्य्वेतद्धि महाविभूति	नृसिंहो. ५।६
एतदेव विष्ण्वेतद्धि महाविभूति	नृसिंहो. ५।६
एतदेव वीरमेतद्धि महाविभूति	नृसिंहो. ५।६
एतदेव सर्वतोमुखमेतद्धि महाविभूति	नृसिंहो. ५।६
एतदेव सूक्ष्माष्टाक्षरं भवति	तारसा. २।१
एतदेवाक्षरंज्ञात्वायोयदिच्छतितस्यतत्	मैत्रा. ६।४
एतदेवाक्षरं परम् । एतत्.. ज्ञात्वा	कठो. २।१६
एतदेवाक्षरं पुण्यम्	मैत्रा. ६।४
एतदेवाक्षरंस्वरममृतमयं प्रविशति	छां. १।४।५
एतदेवामृतं दृष्ट्वा (देवाः)तृप्यन्ति [३।७।१+३।८।१+३।९।१	छांदो. ३।६।१ +३।१०।२
एतदेवाहमेतद्धि महाविभूति	नृसिंहो. ५।६
एतदेवाहं मनुष्याय हिततमं मन्ये यन्मां विजानीयात्	कौ. उ. ३।१
एतदेवैकाक्षरं व्याख्यातम्	दत्तात्रे. १।१
एतदेवोममेतद्धि महाविभूति	नृसिंहो. ५।६
एतदेषामुक्थम् [बृह. १।६।१	+१।२।३
एतदेषां ब्रह्म [छान्दो.१।६।१	बृह.१।६।१,२,३
एतदेषां साम	बृह.१।६।१,२,३
एतदैष्टिकं कर्ममयमात्मानमध्वर्युः संस्करोति	कौ. उ. २।६
एतदोजश्च महश्चेत्युपासीत	छां.उ. ३।१३।५
एतद्गुह्यमहं परम्	भ. गी. १८।७
एतद्ध तदनीशानानि ह वा अस्मै भूतानि बलिं हरन्ति	१ ऐत. १।५।२
एतद्ध वै तज्जनको वैदेहो बुडिलमाश्वतराश्विमुवाच	बृह. ५।१४।८
एतद्ध वै तज्जनको वैदेहो बुडिलमाश्वितराश्विमुवाच	गायत्र्यु. ५
एतद्ध वै पूर्वे विद्वांसोऽग्निहोत्रं जुहुवांचक्रुः	कौ. उ. २।५

एतद्ध स्म वैतद्विद्वानाह महिदास
ऐतरेयः [१ ऐत. १।८।२+ छां.उ. ३।१६।७
एतद्ध स्मवैतद्विद्वानाहहिरण्यदन्वैदो
न तस्येशयं मह्यं न दद्युः– १ ऐत. १।५।१
एतद्ध स्म वैतद्विद्वानुद्दालक
आरुणिराह बृह. ६।४।४
एतद्ध स्म वै तद्विद्वान् कुमार-
हारित आह बृह. ६।४।४
एतद्ध स्म वैतद्विद्वान्नाकोमौद्गल्यआह बृह. ६।४।४
एतद्ध स्म वै तद्विद्वांस आहुः छान्दो. ६।४।५
एतद्ध स्म वैतद्विद्वांसमाहुर्ऋषयः
कावषेयाः ३ ऐत. २।६।३
एतद्ध स्म वैतत्पूर्वे विद्वांसः प्रजां
न कामयन्ते बृह.४।४।२२
एतद्धि दुर्लभतरम् भ. गी.६।४२
एतद्धि परमं तपः, आपोज्योतीरसो-
ऽमृतं ब्रह्म भूर्भुवः स्वरों नम इति
[अ. शिरः. ३।१५ बटु. ३।२७
एतद्धि महाविभूति (नारसिंहं ब्रह्म) नृसिंहो. ५।६
एतद्धि सर्वाणि कर्माणि बिभर्ति बृह. १।६।३
एतद्धि सर्वाणि नामानि बिभर्ति बृह. १।६।१
एतद्धि सर्वाणि रूपाणि बिभर्ति बृह. १।६।२
एतद्धि सर्वैः कर्मभिः समम् बृह. १।६।३
एतद्धि सर्वै रूपैः समम् बृह. १।६।२
एतद्धि सर्वैर्नामभिः समम्
[छान्दो. १।६।१+ बृह. १।६।१
एतद्धूमस्येव समीरणे नभसि
प्रशाखयैवोत्क्रम्य.. मैत्रा. ७।११
एतद्ध्यशब्दमस्पर्शमरूपमरसमगन्धं नृसिंहो. ९।९
एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति
तस्य तत् कठो. २।१६
एतद्ध्येवाक्षरं (एतद्ध्यक्षरं)ब्रह्म ह्येत-
देवाक्षरं परम् कठो. २।१६
एतद्ध्येवैतदभयं भवति बृह. १।४।१४
एतद्प्राणमवष्टभ्य विधारयामः(मि) प्रश्नो. २।२,३,
एतद्बुद्ध्वा बुद्धिमान् स्यात् भ. गी. १५ २०
एतद्ब्राह्मं राधाकुण्डम राधोप. २।१
एतद्ब्रह्म,अभयंवैब्रह्मभवति [नृसिंहो. ८।२+८।४
एतद्ब्रह्म, एतत्सत्यम् १ ऐत. १।१।१
एतद्ब्रह्मविषयमेतद्ज्ञानुरर्णवः मैत्रा. ६।३९
एतद्ब्रह्मैतत्सत्यंतदेतत्त्र्यक्षरम्(मा. पा.) बृ.उ. ५।३।१
एतद्ब्रह्मैतत्सर्वम्, तदेतत् बृह. ५।३।१
एतद्ब्रह्मैतदुपासितव्यम् जाबालो. ४
एतद्ब्रह्मैतमितःप्रेत्याभिसंभविताऽस्मि छान्दो.३।१४।४
एतद्यजुर्वेदशिरोऽधीते नाग. २
एतद्यज्ञायज्ञीयमङ्गेषु प्रोतम् छान्दो.२।१९।१
(?)एतद्यदत्रिरिति सर्वस्यात्ताभवति बृह. २।२।४
एतद्यदादित्यस्यमध्य इवेत्यक्षिण्यग्नौ
चैतद्ब्रह्मैतदमृतम् मैत्रा. ६।३५
एतद्यदिदमित्थेत्थोपधारय इति आर्षे. २।२
एतद्यदिदमित्थेत्थोपव्याख्ये आर्षे. २।२
एतद्यदृग्वेदो यजुर्वेदःसामवेदोऽथर्वा-
ङ्गिरसः (महतोभूतस्यनिश्श्वसितम) बृह. ४।५।११
एतद्येतदादित्यस्य कृष्णं रूपम् छां.उ. ३।३।३
एतद्युक्तोरिष्येद्भूःस्वाहेतिगार्हपत्ये छान्दो.४।१७।४
एतद्योगेन परमपुरुषो जीवो
भवति, नान्यः मुद्गलो. ४।२
एतद्योनीनि भूतानि भ. गी. ७।६
एतद्यो वेत्ति तं प्राहुः भ. गी. १३।२
एतद्यो वेद निहितं गुहायां, सो-
ऽविद्याग्रन्थिं विकिरतीह सोम्य मुंड. २।१।१०
एतद्रथन्तरमग्नौ प्रोतम् छान्दो.२।१२।१
एतद्राजनं देवतासु प्रोतम् छान्दो.२।२०।१
एतद्रुद्रस्य रुद्रत्वं, एतत्तदपरिमितधा.. मैत्रा. ६।२६
एतद्रूपमधीयाना समानफलदा तारोप. ५
एतद्वस्तुचतुष्टयं यस्य लक्षणं देश-
कालवस्तुनिमित्तेष्वव्यभिचारी
तत्पदार्थः परमात्मेत्युच्यते सर्वसारो.६
एतद्वा अन्ततोऽन्नं राद्धम् तैत्ति. ३।१०।१
एतद्वा आदित्य ॐमित्येवं ध्यायं-
स्तथाऽऽत्मानं युञ्जीत मैत्रा.६।३
(अथ) एतद्वाप्रविवेश,तद्वाचाऽवदत.. कौ.उ. २।१४
एतद्वामदेव्यं मिथुने प्रोतम् छान्दो. २।१३।१

(अथ) एतद्वामेऽक्षणि पुरुषरूपम्. बृह.४।२।३
एतद्वायुदशकसंसर्गोपाधिभेदेनरेचक-
पूरक-शोषक दाह-प्लावकाः..
पञ्चविधोऽस्ति भावनो. ९
एतद्वाव तत्स्वरूपं नभसः खे-
ऽन्तर्भूतस्य यत्परं तेजस्तत्
त्रेधाऽभिहितम् मैत्रा. ७।११
एतद्वाव तत्स्वरूपं नभसः खेऽन्तर्भू-
तस्य यदोमित्येतदक्षरम् मैत्रा. ७।११
एतद्विज्ञानं, यत्रैतत्पुरुषःसुप्तःस्वप्नं
न कंचन पश्यति कौ.उ.३।३
एतद्विज्ञानं, यत्रैतत्पुरुषआर्तोमरिष्य-
न्नाबल्यं न्येत्यसम्मोहं नैति कौ. उ. ३।३
एतद्विद्यामनुशिष्टस्त्वयाऽहं... कठो. १।२०
एतद्विधमिदं चेतनवत् प्रतिष्ठापितम् मैत्रा. १।५
एतद्विधेऽस्मिञ्छरीरे किंकामोपभोगैः मैत्रा.१।४+१।८
एतद्विष्णोःपरमंपदं(च) [मैत्रा.६।२६ + गो.पू. ३।४
एतद्वीरासनं स्थानं ब्रह्मणा... सन्ध्यो. ६
एतद्वृत्ते पुरुषस्याल्पमेधसो यस्यान-
श्नन् वसति ब्राह्मणो गृहे कठो. १।८
एतद्वृत्तंपुरस्ताद्दुश्शक्यमेतत्प्रश्नमैक्ष्वा-
कान्यान् कामान् वृणीष्व मैत्रे. १।१
एतद्वेदितुमिच्छामि भ. गी. १३।२
एतद्वै जरामर्यमग्निहोत्रं सत्रं त्रिसुप. ४
[महाना. १८।१०
एतद्वै खलु लोकद्वारं विदुषां प्रपदनं
निरोधोऽविदुषां छांदो.८। ।५
एतद्वै तदक्षरंगार्गिब्राह्मणाअभिवदंति बृह ३।८।८
एतद्वै तमसो रूपं तत्तमः खल्वीरितं
सम्प्रास्रवति मैत्रा. ५।२
एतद्वै नानात्वस्य रूपम् मैत्रा. ३।३
एतद्वै नारायणस्याष्टाक्षरं वेद परम-
पुरुषो भवति सारसा. १।४
एतद्वैपरमंतपो.. अभ्याद्धति(मा.पा.) बृ.उ. ५।११।१
एतद्वै परमं तपो यद्व्याहितस्तप्यते
परमं हैव लोकं जयति बृह. ५।११।१
एतद्वै परमं तपो य प्रेतमरण्यं हरन्ति
परमं हैव लोकं जयति बृह.५।११।१
एतद्वै परं चापरं च ब्रह्म यदो-
मित्येतदक्षरम् मैत्रा.६।५

एतद्वै प्राणानामायतनम् प्रश्नो. १।१०
एतद्वै ब्रह्म दीप्यते यच्चक्षुषा पश्यति कौ. उ. २।१३
एतद्वैब्रह्मदीप्यते यच्चन्द्रमादृश्यतेतस्य.. कौ.उ. २।१२
एतद्वै ब्रह्म दीप्यते यच्छ्रोत्रेण शृणोति कौ.उ. २।१३
एतद्वै ब्रह्म दीप्यते यथाऽऽदित्योदृश्यते कौ.उ. २।१२
एतद्वै ब्रह्मदीप्यते यदग्निर्ज्वलति[कौ.उ. २।१२,१३
एतद्वै ब्रह्म दीप्यते यद्विद्युद्विद्योतते कौ. उ. २।१२
एतद्वै ब्रह्म दीप्यते यद्वाचा वदति कौ. उ. २।१३
एतद्वै ब्रह्मदीप्यते यन्मनसा ध्यायति कौ. उ. २।१३
एतद्वै मध्यतोऽन्नं राद्धम् तैत्ति.३।१०।१
एतद्वै महोपनिषद्देवानां गुह्यम् अव्यक्तो. ४
एतद्वै महोपनिषदं देवानां गुह्यम् महाना.१७।१५
एतद्वै मुखतोऽन्नं राद्धम् तैत्ति. ३।१०।१
एतद्वैयजुस्त्रयींविद्यां प्रत्येषा वागेतत्
परममक्षरम् सहवै. १५
एतद्वैरजसोरूपं, तद्रजः खल्वीरितं
विषमत्वं प्रयाति मैत्रा. ५।५
एतद्वैराजमृतुषु प्रोतम् छान्दो.२।१६।१
एतद्वैरूपं पर्जन्ये प्रोतम् छान्दो.२।१५।१
एतद्वैसत्यकाम परं चापरं च ब्रह्म
यदोङ्कारस्तस्माद्विद्वान्..
एकतरमन्वेति [प्रश्नो. ५।२+ मैत्रा. ६।५
एतद्वै सत्यकाम परं चापरं च
यदोमित्येतदक्षरमिति मैत्रा. ६ ५
एतद्वैसत्येनदानेन तपसाऽनाशकेन
ब्रह्मचर्येण निर्वेदेनाशकेन षडङ्गेनैव
साधयेत् सुबालो. ३।३
एतद्वै वाचः सत्यं, यदेव वाचः सत्यं
तत्प्रायुक्तम् सहवै. १५
एतद्वै सत्त्वस्य रूपं तत्सत्त्वं
सम्प्रास्रवत् मैत्रा. ५।५
एतद्वैसन्धिसन्ध्यांब्रह्मविदः उपासते..
सोऽविमुक्त उपासते [जाबा.२+ रामो. ३।१
एतद्वैसावित्रस्याष्टाक्षरं पदं श्रिया-
भिषिक्तं [नृ. पू. ४।३+ सूर्यता. ३।१
एतद्वैस्वर्गस्य लोकस्यद्वारंयश्चन्द्रमाः.. कौ. उ. १।२
एतद्वो धनमार्याणां मन्त्राश्चैव
व्रतानि च इतिहा. ९९
एतन्नारायणस्य तारकं भवति ना. पू. ता. २।१

एतन्निर्वाणदर्शनं शिष्यंपुत्रंविनानदेयं निर्वाणो. ८
एतन्निर्वाणानुशासनं [सुबालो.५।३+ ५।१५
एतन्निर्वाणानुशासनमितिवेदानुशासनं सुबालो. २।३
एतन्मध्याह्नसायाह्नेषु त्रिकालेषु.. भस्मधारणमप्रमादेन कार्यम् भस्मजा. ११६
(अथ)एतन्मनः प्रविवेश, तद्वाचाऽवदत्.. कौ. उ. २।१४
एतन्मन्त्रमयोद्दिष्टं गुह्याद्गुह्यतमंमहत् सूर्यता. २।४
एतन्मयो वा अयमात्मा बृह. १।५।३
एतन्मर्त्यमेतत्स्थितमेतत्सत् बृह. २।३।२,४
एतन्मे संशयं कृष्ण भ. गी. ६।३९
एतन्मोक्षलक्षणम् (पूर्वोक्तं) मैत्रा. ६।३०
(अथ) एतन्म्रियते यन्न ज्वलति.. कौ. उ. २।१२
(अथ) एतन्म्रियते यन्न दृश्यते कौ.उ.२।१२
(अथ) एतन्म्रियते यन्न ध्यायति कौ. उ. २।१३
(अथ)एतन्म्रियते यन्नवलति(वदति) कौ. उ. २।१३
(अथ) एतन्म्रियते यन्न पश्यति कौ.उ. २।१३
(अथ) एतन्म्रियते यन्न विद्योतते कौ.उ. २।१२
(अथ) एतन्म्रियते यन्न शृणोति कौ. उ. २।१३
एतमग्नावध्वर्यवः (मीमांसन्ते) ३ ऐत. २।३।४
एतमग्निं तवैव प्रवक्ष्यन्ति जनासः कठो. १।१९
एतमन्नमयमात्मानमुपसंक्रम्य.. एतत्साम गायन्नास्ते तैत्ति. ३।१०।५
एतमन्नमयमात्मानमुपसंक्रामति तैत्ति. २।८
एतमस्यामेतं दिव्येतंवायावेतमाकाशः ३ ऐत. २।३।४
एतमानन्दमयमात्मानमुपसंक्रम्य.. साम गायन्नास्ते तैत्ति. ३।१०।५
एतमानन्दमयमात्मानमुपसंक्रामति तैत्ति. २।८
एतमितः प्रेत्याभिसम्भविताऽस्मि छान्दो.३।१३।७
एतमिन्धं सन्तमिन्द्र इत्याचक्षते बृ. उ. ४।२।२
एतमु एव बृहस्पतिं मन्यते वाग्घि बृहती, तस्या एष पतिः छान्दो.१।२।११
एतमु एवायास्यं मन्यन्त आस्याद्यदयते छान्दो.१।२।१२
एतमु एवान्ततोऽवित्वोत्क्रामति व्याददात्येवान्तत इति छान्दो. १।२।९
एतमु एवाहमभ्यागामिषम् छान्दो.१।५।२,३
एतमु हैव चूलो भागवित्तिर्जानकाय आयस्थूणायान्तेवासिन उक्त्वो-वाचापि य एनं शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति बृ. उ. ६।३।१०
एतमु हैव जानकिरायस्थूणः सत्य-कामाय जाबालायान्तेवासिन उक्त्वोवाचापि.. बृह. ६।३।११
एतमु हैव मधुकः पैङ्ग्यश्चूलाय भाग-वित्तयेऽन्तेवासिनउक्त्वोवाचापि.. बृह. ६।३।९
एतमुहैव वाजसनेयो याज्ञवल्क्यो मधुकाय पैङ्ग्यायान्तेवासिन उक्त्वोवाचापि.. बृह. ६।३।७,८
एतमुहैवसत्यकामो जाबालोऽन्तेवा-सिभ्य उक्त्वोवाचापि.. बृह. ६।३।१२
एतमु हैवैते न तरत इत्यतः पापमकरव-मित्यतः कल्याणमकरवम् बृह. ४।४।२२
एतमृग्वेदमभ्यतपं स्तस्याभितप्तस्य यशस्तेज इन्द्रियं..अजायत छान्दो.३।१।३
एतमेव तदनमनग्नं कुर्वन्तो मन्यन्ते बृह.६।१।१४
एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति बृह.४।४।२२
(अथ)एतमेवमात्मानं परमं ब्रह्मोङ्कारं तुरीयोङ्काराग्रविद्योतं प्रणवेन सच्चिन्त्यानुष्टुभानत्वा.. नृसिंहो. ४।१
एतमेव (आत्मानं) विदित्वा मुनिर्भवति बृह. ४।४।२२
(अथ) एतमेवात्मानं परमं ब्रह्मोङ्कारं तुरीयोङ्काराग्रविद्योतमेकादशा-त्मानं नारसिंहं नत्वोमिति संहरन्ननुसन्दध्यात् नृसिंहो. ४।१
(अथ) एतमेवाध्वानं पुनर्निवर्तन्ते छान्दो. ५।१०।५
एतमेवाहं ब्रह्मोपासे [बृह.२।१।२, ३,४-१३
एतमेवोङ्काराग्रविद्योतं तुरीयतुरीय-मात्मानं नृसिंहानुष्टुभैव बुबुधिरे (देवाः) नृसिंहो. ६।१
(अथ खलु) एतयर्चा पच्छः आचा-मति 'तत्सवितुर्वृणीमहे' इति छान्दो. ५।२।७

एतयैव त्रयो धातवो यदुत सत्त्वं	
रजस्तम इति	जाबालो.४
[ना. प. ३।७७+प. हं. प. २+	याज्ञ. १
एतयोरेतदन्नं य एषोऽन्तर्हृदये	
लोहितपिण्ड:	बृह. ४।२।३
(अथ)एतयोः पथोर्न कतरेण च न	
तानीमानि...भूतानि भवन्ति	छांदो.५।१०।८
एतर्हि वेदान्नानुभवति	छां. उ. ६।७।३
एतर्हि वेदान्नानुभवसि	छां. उ. ६।७।६
एतर्ह्येकाकी कामयते	बृ.उ. १।४।१७
एतस्मा एव पञ्च पदादभूव-	
न्गोविन्दस्य मनव:	गो. पू. ३।७
एतस्माज्जायते प्राणो मनः	
सर्वेंद्रियाणि च। खं वायुरापो..	मुण्ड. २।१।३
[ग.पू. १।४+	कैव. १५
एतस्मादन्नरसमयात्, अन्योऽन्तर	
आत्मा प्राणमय:	तैत्ति. २।२
एतस्मादाकाशादेवखल्विदंचेतामात्रं..	मैत्रा. ६।१७
एतस्माद्ध्यानादौ प्रयुज्यते	अ. शिखो. ३
एतस्माद्धीदंसर्वमुत्तिष्ठति,एतमेवाप्येति	१ऐत. ३।१।१
एतस्माद्भूर्भुवस्वरित्युपासीतान्नं हि	
प्रजापतिर्विश्वात्मा..उपासितोभवति	मैत्रा. ६।६
एतस्माद्रूपादुदेति [छांदो. ३।६।३+	३।७।३+३।८।३
[३।९।३+३।१०।३	
एतस्माद्रूपादुद्यन्ति [छांदो. ३।६।२+	३।७।२+
[३।८।२+३।९।२+	३।१०।२
एतस्माद्वै महत्तत्त्वमजायत	ग. शो. ४।३
एतस्मान्न पुनरावर्तन्त इत्येष निरोधः	प्रश्नो. १।१०
एतस्मिन्नग्नौ देवा अन्नं जुह्वति	
[छां.उ. ५।७।२+	बृ. उ. ६।२।१२
एतस्मिन्नग्नौ देवा रेतो जुह्वति	
[छां. उ. ५।८।२+	बृ. उ. ६।२।१३
एतस्मिन्नग्नौ देवा वर्षं जुह्वति	
[छां. उ. ५।६।२+	बृ.उ. ६।२।११
(?)एतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति	
[छां. उ. ५।४।२+	बृ. उ. ६।२।९
एतस्मिन्नग्नौ देवा:सोमंराजानंजुह्वति	
[छां. उ. ५।५।२+	बृ.उ. ६।२।१०
एतस्मिन्नु खल्वक्षरे गार्ग्याकाश	
ओतश्च प्रोतश्च	बृ.ह. ३।८।११
एतस्मिन् वसते शीघ्रं...महाखगः	ब्र.वि. १९
एतस्मिन्हीदं सर्वं प्रतिष्ठितम्	मुद्गलो. ३।१
एतस्मिन्नेतदाततं मनोऽभिकृतेनाया-	
त्यस्मिञ्छरीरे	प्रश्नो. ३।३
एतस्मिन्ह्येताः पञ्चविधा अधिगम्यन्ते	१ ऐत. ३।४।४
(अथ) एतस्य प्राणस्यापः शरीरं	
ज्योती रूपमसौ चन्द्रस्तद्यावानेव	
प्राणस्तावत्य आपः..	बृह. १।५।१३
(?)एतस्य ब्रह्मलोकस्यारो ह्रदः	कौ. उ. १।३
(अथ) एतस्य मनसो द्यौः शरीरं,	
ज्योती रूपं, असावादित्यः	बृह. १।५।१२
(एवं वा) एतस्य महतो भूतस्य	
निश्श्वसितमेतत्...	मैत्रा. ६।३२
एतस्य वा अक्षरस्य प्रशासने गार्गि	
निमेषा मुहूर्ता अहोरात्राण्यर्ध-	
मासा मासा ऋतवः संवत्सरा	
इति विधृतास्तिष्ठन्ति	बृह. ३।८।९
एतस्य वा अक्षरस्य.. प्राच्योऽन्या	
नद्यः स्यन्दन्ते श्वेतेभ्यः पर्वतेभ्यः	बृह. ३।८।९
एतस्य वा अक्षरस्य प्रशासने गार्गि	
ददतो मनुष्याः प्रशंसन्ति यज-	
मानंदेवा दर्वीं पितरोऽन्वायत्ताः	बृह. ३।८।९
एतस्य वा अक्षरस्य प्रशासने गार्गि	
द्यावापृथिव्यौ विधृते तिष्ठतः	बृह. ३।८।९
एतस्य वा अक्षरस्य प्रशासने गार्गि	
सूर्याचन्द्रमसौ विधृतौ तिष्ठतः	बृह. ३।८।९
एतस्य वै सोम्यैषोऽणिम्न एवं	
महान्न्यग्रोधः	छान्दो.६।१२।२
एतस्य हेतोर्व्यानमेवोद्गीथमुपासीत	छान्दो. १।३।५
एतस्याग्नेयमर्धमर्धं वारुणम्	मैत्रा. ६।१४
एतस्याज्ञानमात्रेण जीवन्मुक्तो भवेद्धि	तारोप. ४
एतस्यामिदं सर्वमन्तर्हितम्	मैत्रा. ६।६
एतस्याहं न पश्यामि	भ.गी. ६।३३
एतस्यां वाचि जनको जनक इतिवा	
उ जना धावन्तीति	कौ. उ. ४।१
एतस्यां ह स्म मात्रायां संवत्सरं गा	
रक्षयते तार्क्ष्यः	३ ऐत. १।६।१
एतस्यां ह स्मोपनिषदि संवत्सरं गा	
रक्षयते तार्क्ष्यः	३ ऐत. १।६।१

एतस्यैतत्तेजो यदसा आदित्यः मैत्रा. ६।४
एतस्यैव यजनेन चन्द्रध्वजो गत-
मोहमात्मानं वेदयति गो. पू. ३।१९
एतस्यैवाक्षरस्यापचित्यै महिम्नाऽरसेन छां. उ. १।१।९
(इति खलु) एतस्यैवाक्षरस्योप-
व्याख्यानं भवति छां.उ.१।१।१०
एतस्यैवानन्दस्यान्यानि भूतानि
मात्रामुपजीवन्ति बृह. ४।३।३२
एतं त्वेव ते भूयोऽनुव्याख्यास्यामि छान्दो. ८।९।३
एतं प्राणमयमात्मानमुपसंक्रम्य..
एतत्साम गायन्नास्ते तैत्ति. ३।१०।५
एतं प्राणमयमात्मानमुपसंक्रामति तैत्ति. २।८
एतं ब्रह्मलोकं न विदन्त्यनृतेन हि
प्रत्यूढाः (प्रजाः) छान्दो. ८।३।२
एतं मनोमयमात्मानमुपसंक्रम्य..
एतत्साम गायन्नास्ते तैत्ति. ३।१०।५
एतं मनोमयमात्मानमुपसंक्रामति तैत्ति. २।८
एतं मंत्रराजं यः पश्यति स पश्यति ग. पू. १।६
एतं महाव्रते छन्दोगाः(मीमांसन्ते) २ऐत. २।३।४
एतं यजुर्वेदमभ्यतपत्, तस्याभितप्तस्य
यशस्तेज इन्द्रियं वीर्यमन्नाद्य२
रसोऽजायत छान्दो. ३।२।२
एतं विज्ञानमयमात्मानमुपसंक्रम्य..
एतत्साम गायन्नास्ते तैत्ति. ३।१०।५
एतं विज्ञानमयमात्मानमुपसंक्रामति तैत्ति. २।८
एतं वै तमात्मानं विदित्वा ब्राह्मणाः
पुत्रैषणायाश्च.. व्युत्थायाथ
भिक्षाचर्यं चरन्ति बृह. ३।५।१
एतं संयद्वाम इत्याचक्षते छान्दो.४।१५।२
एतंसामवेदमभ्यतपन्,तस्याभितप्तस्य.. छान्दो.३।३।२
एतं ह वा व न तपति, किमहरसाधु
नाकरवम्, किमहं पापमकरवम् तैत्ति. २।९
एतं हि सर्वाणि वामान्यभिसंयन्ति छान्दो. ४।१५।२
एतं ह्येव बह्वृचा महत्युक्थे
मीमांसन्ते २ ऐत. २।३।४
एताउपासीतोमित्येतदक्षरेण (इत्य-
क्षरेण) व्याहृतिभिःसावित्र्यावेति मैत्रा. ६।२
एता एव महाविद्या विभूतेरभिचारणे वज्रपं. ५
एता एव देवताः प्रीणाति सहवै. १९
एता ऋचः एतमृग्वेदमभ्यपतन् छां.उ. ३।१।३
एता दश वह्निकलाः सर्वज्ञत्वाद्यन्त-
र्देशारगा देवताः भावनो. ५
एतादृशे शरीरे वर्तमानस्य भगवं-
स्त्वं नो गतिः मैत्रे. १।३
एता देवताः पाप्मभिरुपासृजत् बृह. १।३।६
एतानि मनसा ध्यायन्नप्रमत्तः
स्तुवीत छान्दो. २।२२।२
एतानि रूपाणिपुरस्सराणि ब्रह्मण्य-
भिव्यक्तिकराणि योगे श्वेताश्व. २।११
एतान्न हन्तुमिच्छामि भ. गी. १।३५
एतान्यष्टावायतनानि बृह. ३।९।२६
एतान्यपि तु कर्माणि भ. गी. १८।६
(?) एताभिरुपनिषद्भिः समा-
हितात्माऽसि बृह. ४।२।१
एताभिर्वा एतदास्रवति... (मा.पा.) बृह. ४।२।३
एताभिर्वा एतदास्रवदास्रवति बृह. ४।२।३
एताभिः सर्वमिदमोतं प्रोतं च मैत्रा. ६।३
एताभ्यां हि रूपाभ्यां ब्रह्माऽभवत् बृह. १।४।१५
एताभ्यां (ज्योतिर्वायुभ्यां)
हीदं सर्वमुन्नमति १ऐत. ३।१।२
एतामधीत्य द्विजोगर्भवासाद्विमुच्यते अ. शिखो.३
एतामहम्भावमयीमपुण्यां (तृष्णां)
छित्वाऽनहंभावशलाकयैव। भव.. महो. ६।४०
एता रेवत्यः पशुषु प्रोताः छांदो. २।१८।१
एतावताऽऽत्मयत्नेन जिता
भवति संसृतिः अ. पू. ५।११८
एतावतीहिसङ्ख्यादशदशतस्तच्छतं.. १ ऐत. ३।४।३
एतावदरे खल्वमृतत्वमिति होक्त्वा
याज्ञवल्क्यो विजहार बृह. ४।५।१५
एतावदिति निश्चिताः भ.गी. १६।११
एतावदिह गौतमो यज्ञोपवीतं
कृत्वाऽधो निपपात सूर्यता. ३।१
एतावदेवाविद्यात्वं नेदंब्रह्मेतिनिश्चयः।
एष एव क्षयस्तस्या ब्रह्मेद-
मिति निश्चयः अ. पू. ५।१९
एतावद्धीति होवाच बालाकिः कौ.उ. ४।१८
एतावद्वा इद२ सर्वमेतन्मासर्व२
सन्नयमितोऽभुनजत् बृह. १।५।१७

एतावद्वाइदमन्नं चैवान्नादश्च (मा. पा.) बृह. १।४।६
एतावद्वा इद्ःसर्वमन्नं चैवान्नादश्च
सोम एव बृह. १।४।६
एतावद्वाइदंसर्वमेतस्मात्सर्वः (मा.पा.) बृह. १।५।१७
एतावद्वाइदंसर्वंयदन्नंतदात्मनआगासी: बृह. १।३।१८
एतावन्नू ३ इत्येतावद्धीति नैतावता
विदितं भवतीति बृह. २।१।१४
एतावानस्य महिमा चित्त्यु. १२।१
[ऋक्सं.८।४।१७=मं.१०।९०।३+ वा. सं. ३१।३
एतावानिति मन्त्रेण वैभवं कथितं
हरेः, एतेन.. चतुर्व्यूहोनिरूपितः मुद्गलो. १।३
एतावान् वै कामो नेच्छंश्च नातो भूयो
विंदेत्,तस्माद्प्येतदेकाकीकामयेत बृह. १।४।१७
एतावाहुती समं नयतीति स समानः प्रश्नो. ४।४
एतानुपासीतोमोमित्यक्षरेण
व्याहृतिभिः सावित्र्या च मैत्रा. ६।२
एताश्च चतुर्दशसु नाडीष्वन्या नाड्यः
सम्भवन्ति तास्वन्यास्तास्वन्या
भवन्तीति विज्ञेयाः शाण्डि. १।४।६
एतासामेव देवातानां सलोकतां
सार्ष्टितां सायुज्यं गच्छति छान्दो.२।२०।२
एतासामेव देवतानां सायुज्यं सार्ष्टितां
समानलोकतामाप्नोति (ब्रह्मवित्) महाना. १०।२
एतासां देवतानामेको भवति बृह. १।२।७
एतासां देवतानां पाप्मानंमृत्युमपहत्य
यत्रासां दिशामन्तस्तद्गमयाञ्चकार बृह. १।३।१०
एतासां प्रतिबोधनायाभ्यन्तरं
प्राविशानि मैत्रा. २।६
एतासां भूमिकानां तु गम्यं
ब्रह्माभिधं पदम् महो. ५।४३
एतास्तिस्र ऋचो जपित्वा नास्माकं
प्राणेन प्रजया पशुभि-
राप्याययिष्ठाः कौ. उ. २।८
(अथ) एतास्तिस्रः संहिता भवन्ति
वायोरिन्द्रस्याग्नेः संहितो. १।८
(अथ) एतास्तिस्रः संहिता भवन्ति
शुद्धा दुस्स्पृष्टा निर्भुजेति संहितो. १।५
एतास्यत्र यजमानः परस्तादायुषः
स्वाहाऽपजहि(जे.पा.) [छां.उ. २।२४।६,१०

एतास्वेव वां देवता स्वा भजामि २ ऐत. २।५
एता ह वै देवता अहंश्रेयसे विवद-
माना अस्माच्छरीरादुच्चक्रमुः कौ. उ. २।१४
एतां दृष्टिमवष्टभ्य [भ.गी.१६।९+ भ. पू.४।६४
एतां महामायां तरन्त्येव ये विष्णुं
भजन्ति, नान्ये तरन्ति त्रि.म.ना. ४।९
(एवं) एताँल्लोकानात्मनि प्रतिष्ठितान्
वेदात्मैव स भवति सुबालो. १०।१
एतां विद्यामपांतरतमाय ददौ
[सुबालो. ७।३+ अध्यात्मो. ७०
एतां विभूतिं योगं च भ. गी. १०।४
एतां वृत्तिमुपासीनाः (उपासन्तः)
[२ सन्न्यासो. १।९+ कठश्रु. २७
एताँश्च सत्यान्कामाःस्तेषां सर्वेषु
लोकेषु कामचारो भवति छांदो.८।१।६,६
एताः शक्वर्यो लोकेषु प्रोताःवेद लोकी-
भवति, सर्वमायुरेति,ज्योग्जीवति छांदो. २।१७।२
एताः सोम्योदज साम्श्रवा३इति बृह. ३।१।२
(?) एति स्वर्गं लोकं य एवं वेद बृह. ५।३।२
(?) एते अनन्ते अमृते आहुती
(पाठः–जे.) कौ. उ. २।५
(अथ) एते आनुदंशिक्यौ संहिते
याज्येन कमणा भवताम् संहितो. ३।१
(तस्मात्) एते ऋषयः प्रजाकामाः
दक्षिणं प्रतिपद्यन्ते प्रश्नो. १।९
एते खलु यूयं पृथगिवेमं वैश्वानरं... छांदो.५।१८।१
एते गुह्या आदशा एतद्ब्रह्माभ्यतपत् छांदो. ३।५।२
एते त्रयस्त्रिंशत्त्वेव देवाः बृह. ३।९।२
एतेऽथर्वाङ्गिरस एतदितिहास-
पुराणमभ्यपतत् छां. उ. ३।४।२
एतेन खलु प्रतिपद्यमानाः (मा.पा.) छां.उ. ४।१५।६
एतेन जीवात्मनोर्योगेन मोक्ष-
प्रकारश्च कथितः मुद्गलो. २।५
एतेऽनन्तेमृताहुतीजाग्रच्च स्वपंश्च
सन्ततमव्यवच्छिन्नं जुहोति कौ. उ. २।५
एतेन प्रज्ञेनात्मनाऽस्माल्लोकादुत्क्रम्य आत्मप्र. १
एतेन प्रतिपद्यमाना इमं मानव-
मावर्तं नावर्तन्ते छांदो. ४।१५।६
एतेन (मंत्रेण) हीदं सर्वं सयोनि १ऐत. १।८।४

एतेन ह्यमुं लोकं जेष्यंतो मन्यन्ते छांदो. ८।८।५
एतेनैव मन्त्रेण ('एतावान्' इत्यनेन)
चतुर्व्यूहो विभावितः मुद्गलो. १।४
एतेनैवायतनेनैकतरमन्वेति प्रश्नो. ५।२
एते पतन्ति चत्वारः पञ्चमश्चा-
चरं स्तु तैः (मा. पा.) छां.न. ५।१०।९
एते पतन्ति चत्वारः पञ्चम-
श्चाचरं स्तैः छां.उ. ५।१०।९
एते भवन्ति सुकृतस्य लोके येषां
कुले सन्त्यसतीह विद्वान् शाट्याय. ३०
एतेभ्यो भूतेभ्यः समुत्थाय तान्ये-
वानुविनश्यति [बृह. २।४।१२+ ४।५।१३
एते रसानां रसेनाश्राद्धं प्राप्नुवन्ति
वाग्यतानां संयुतानाम् इतिहा. ८४
एतेषामुपाधीनामत्यन्तभेदो नविद्यते त्रि. म.ना. ४।९
एतेषामेकमास्थाय ह्यासनं लब्ध्वा-
ऽऽहारविहारौ च दुर्वासो. २।४
एतेषां नवचक्राणामेकैकं ध्यायतो
मुनेः। सिद्धये मुक्तिसहिताः... योगरा. १९
एतेषां पञ्चभूतानां पतयः पञ्च
सदाशिवेश्वररुद्रविष्णुब्रह्माणश्च यो.चू. ७२
एतेषां पञ्चवर्गाणां (मनआदीनां)
धर्मीभूतात्मा ज्ञानादृते न
विनश्यति सर्वसारो. ५
एतेषां ब्रह्मणो लोका देवतिर्यङ्नर-
स्थावराश्च जायन्ते यो. चू. ७२
एतेषु चैव सर्वेषु तत्त्वं च ब्रह्म तारकम् रामर. १।६
एतेषु यश्चरते भ्राजमानेषु यथाकालं
चाहुतयो ह्याददायन् मुण्ड. १।२।५
एतेषु हीदं वसु सर्वं हितमिति
तस्माद्वसवः बृह. ३।९।३
एतेषां मे देहीतिहोवाच, तानस्मैप्रददौ छान्दो. १।१०।३
एतेऽष्टौ महाअष्टावतिमहाः (मा. पा.) बृ.उ. ३।२।१,९
एते सर्वे देवाः इमानि च पञ्चभूतानि २ ऐ. उ. ५।३
एते सर्वे प्रणवमयोर्ध्वपुण्ड्रत्रयात्मकाः वासु. २
एते ह त्वेव देवते एकधाभूयं भूत्वा
परमतां गच्छतः बृ. ५।१२।१
एते हीदं सर्वमाददाना यन्ति ते बृह. ३।९।५
एते (रुद्राः) हीदं सर्वं रोदयन्ति छांदो. ३।१६।३

एते(वसवः) हीदं सर्वं वासयन्ति छांदो. ३।१६।१
एते (अग्न्यादयः)हीदंसर्वं षडिति बृह. ३।९।७
एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष
आत्मा विशते ब्रह्मधाम मुण्ड. ३।२।४
एतैरेव रश्मिभिरूर्ध्वमाक्रमते स
ओमिति वा होद्वामीयते छांदो. ८।६।५
एतैर्योऽपृथग्भावैः पृथगेवेति
लक्षितः (आत्मा) वैतथ्य. ३०
एतैर्विमुक्तः कौन्तेय भ. गी. १६।२२
एतैर्विमोहयत्येषः भ. गी. ३।४०
एतैर्हि वा अमृतो भवति जाबा. ३
एतैः समाधिभिः षड्भिर्नयेत्कालं
निरन्तरम् सरस्व. ५५
एतौ वा अश्वं महिमानावभितः
सम्बभूवतुः बृह. १।१।२
एतौ वै सूर्याचन्द्रमसोर्महिमानौ
ब्राह्मणो विद्वानभिजयति[महाना. १८।१+त्रिसुप.४
एत्य पुत्र उपरिष्टादभिनिपद्यते कौ. उ. २।१५
एधमानः स्वे गृहे बृ. उ. ६।४।२४
एनद्रोदस्योरेव पर्यायेणोपवन्वीमहि.. आर्षे. ४।२
(तस्मात्) एनमकारार्थेन परेण
ब्रह्मणैकीकुर्यात् नृसिंहो. ७।६
(अथ) एनमग्नये हरन्ति तस्या-
ग्निरेवाग्निर्भवति समित् .. बृह. ६।२।१४
एनमासुरं पाप्मानं परिमृसाम इति नृसिंहो. ६।१
एनमाहुः (धिक्कर्तारं) पितृहा वै
त्वमसि, मातृहा वै त्वमसि छान्दो.७।१५।२
(अथह) एनमुद्दालकआरुणिःपप्रच्छ बृह. ३।७।१
(अथह)एनमुषस्तश्चाक्रायणः पप्रच्छ बृह. ३।४।१
(अथ)एनमेते देवाः प्राणा अमृता
आविशन्ति बृह. १।५।१७
(अथ) एनमेतेप्राणाअभिसमायन्ति
सः(आत्मा)..हृदयमेवान्ववक्रमति बृह. ४।४।१
(अथ) एनयोरेतत्प्रावरणं यदेतदन्त-
र्हृदये चालकमिव.. बृह. ४।२।३
(अथ) एनयोरेषा सृतिः सञ्चरणी
यैषा हृदयादूर्ध्वा नाड्युच्चरति बृह. ४।२।३
एनस एनसोऽवयजनमसि स्वाहा महाना. १४।२
एनं मकारार्थेन...ब्रह्मणैकीकुर्यात् नृसिंहो. ७।६

एनं चतुष्पादं मात्राभिरोङ्कारेण	
चैकीकुर्यात्	नृसिंहो. २।३
(अथखलु) एनंदृष्ट्वाऽमृतत्वंगच्छति	मैत्रा. ६।२४
(अथ ह) एनंभुज्युर्लाह्यायनिःपप्रच्छ	बृह. ३।३।१
एनं मनोमणिंब्रह्मन् बहुपङ्ककलङ्कितम्।	
विवेकवारिणा सिद्ध्यै प्रक्षाल्य..	महो. ५।८३
एनं मनुष्याऊचुर्ब्रवीतु नो भवानिति	बृह. ५।२।२
(अथ) एनं (पुत्रं) मात्रे प्रदाय स्तनं	
प्रयच्छति यस्ते स्तनः.. इति	बृह. ६।४।२७
(अथह) एनं रैक्वः पप्रच्छ कस्मिन्सर्वे	
प्रतिष्ठिता भवंतीति	सुबालो.१०।१
(अथह) एनं रैक्वः पप्रच्छ भगवन्	
कस्मिन्सर्वेऽस्तं गच्छन्तीति	सुबालो. ९।१
(अथह) एनं रैक्वः पप्रच्छ भगवन्	
योऽयं विज्ञानघन उत्क्रामन्स..	सुबालो. ११।१
(अथ) एनं वसत्योपमन्त्रयाञ्चक्रे	बृह. ६।२।३
(?) एनं साधवो धर्मा आ च	
गच्छेयुरुप च नमेयुः	छां.उ. २।१।४
एनां मृत्युमत्यवहत्	बृह. १।३।११
(अथ) एभिरेव प्राणैः सह	
पुत्रमाविशति	बृह. १।५।१७
एभिर्दोषै–(कामक्रोधादिभि) र्विनि-	
र्मुक्तः स जीवः केवलो मतः	१ यो. त. १३
एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण..	बृह. १।१।३।२२
एभिः क्रमैस्तथाऽन्यैश्च.. प्राणस्पन्दो	
निरुध्यते	शाण्डि.१।७।३६
एभिः सर्वमिदं जगत्	भ.गी. ७।१३
(अथ)एभ्यः सर्वमिदमत्र वा	
यत्किञ्चिच्छुभाशुभं दृश्यते	मैत्रा. ६।१६
एरण्डतैलफेनवत्सर्वं परित्यजेत्	
(यतिः) ?	सं. सो. २।५०
एवमक्षमालिकया जप्तो मन्त्रः	
सिद्धिकरः	...
एवमनादि परम्परा वर्तते, अनादि-	
संसारविपरीतभ्रमात्	त्रि.म.ना.४।१०
एवमन्तर्गतं चित्तं पुरुषः प्रतिमुच्यते	मैत्रा. ४।१२
एवमन्या देवताः यथादैवतम् (दधुः)	बृह. १।५।२२
एवमन्यानि कर्माणि यथाकर्म (दध्रुः)	बृह. १।५।२१
एवमभ्यसतस्तस्य न किञ्चि-	
दपि दुर्लभम्	जा. द. ७।१४
एवमभ्यसतस्तस्य जितोवायुर्भवेत्	जा. द. ६।४३
एवमभ्यसतस्तस्य मूलरोगो विनश्यति	जा. द. ६।४४
एवमभ्यासचित्तश्चेत्स मुक्तः..	वराहो. ५।५९
एवमभ्यासतो नित्यं षण्मासाद्यत्नवान्	
भवेत्।	जा. द. ६।१०
एवमभ्यासयुक्तस्य पुरुषस्य..	
क्रमाद्वेदान्तविज्ञानं विजायेत	जा. द. ९।६
एवमभ्यासयुक्तस्य... सर्वपापानि	
नश्यन्ति भवरोगश्च..	जा. द. ७।९
एवमभ्यासात्तन्मयो भवति	मं. ब्रा. १।४
एवममनस्काराभ्यासेनैव नित्यतृप्ति-	
रल्पमूत्रपुरीषनिद्राद्दग्वायुचलना-	
भावब्रह्मदर्शनाज्ज्ञातसुखस्वरूप-	
सिद्धिर्भवति	मं. ब्रा. ५।२
एवममूर्तितारकमपिमनोयुक्तेनचक्षुषैव	
दहरादिकं वेद्यं भवति	अद्वयता. ६
एवमवरो वै तर्हि किल म इति	
होवाच प्रतर्दनः	कौ.उ. ३।१
एवमष्टोत्तरशतं भावनात्रयनाशनम्	मुक्तिको.१।४०
एवमस्मिन्प्राणे चक्षुः श्रोत्रं...सर्व	
आत्मा समाहितः	३ ऐत. २।१।१
एवमस्मिंश्चप्रतिष्ठमानेसर्वाएवप्रातिष्ठन्त	
एवं वाङ्मनश्चक्षुः श्रोत्रं च ते	
प्रीताः प्राणं स्तुन्वन्ति	प्रश्नो. २।४
एवमस्य यज्ञः प्रतिष्ठति, यज्ञं प्रति-	
तिष्ठन्तं यजमानोऽनु प्रतितिष्ठति	छान्दो.४।१६।५
एवमस्य यज्ञो रिष्यति, यज्ञं रिष्यन्तं	
यजमानोऽनुरिष्यति	छान्दो.४।१६।३
एवमहोरात्रे पर्यवेक्षत एवं सुकृत-	
दुष्कृते.. ब्रह्मविद्वान्ब्रह्मैवाभिप्रैति	कौ. उ. १।४
एवमात्मनि जायतेऽसौ सत्येन	
तपसा योऽनुपश्यति	ब्रह्मो. १९
एवमात्माऽऽत्मनि गृह्यतेऽसौ सत्येनैनं	
तपसा योऽनुपश्यति	श्वेता. १।१५
एवमात्मायथायत्र समुल्लासमुपागतः।	
तिष्ठत्याशु तथा तत्र..	महो. ४।४३
एवमितरान्प्राणान्समक्लिदत्त१ हाभि-	
समेत्योचुः	छान्दो.५।१।१२
एवमिमानि पुरुषे त्रीणि ज्योतींषि	३ ऐत. १।२।२

एवमिव वै स वायुमेव प्रशशंस बृ. उ. ३।३।२
एवमिष्टापूर्तकर्मा शुभाशुभैर्न लिप्यते परब्र. १
एवमिष्टापूर्तैः शुभाशुभैर्न लिप्यते ब्रह्मो. १
एवमुक्तलक्षणो यः स एव ब्राह्मणइति
श्रुतिस्मृति.. अभिप्रायः व. सू. ९
एवमुक्तो हृषीकेशः भ. गी. १।२४
एवमुक्त्वा ततो राजन् भ. गी. ११।९
एवमुक्त्वाऽर्जुनः सङ्ख्ये भ. गी. १।४६
एवमुक्त्वा हृषीकेशं भ. गी. २।९
एवमु खल्वेता देवताः पाप्मभि-
रुपासृजन् बृह. १।३।६
एवमु चैतदुपास्यम् तैत्ति. १।११।४
एवमुपासितव्यम् तैत्ति. १।११।४
(?) एवमुपास्ते सर्वं हैवास्मिँ-
ल्लोकमायुरेति, नैनंपुराकाला-
त्प्राणो जहाति बृउ.२।१।१०,१२
एवमु ह स्म सर्वमात्मानमनु-
विधायाहेदमेव.. ३ ऐत. १।२।३
एवमु हैवैतदिति (हैतदिति)
हेन्द्र उवाच कौ. उ. ३।२
एवमेतद्यथाऽऽत्थ त्वम् भ. गी. ११।३
एवमेतं चक्षुः पितरं परिचरतो
द्यौश्चादित्यश्च १ऐत. १।७।४
एवमेतासां देवतानां वायुः बृह.१।५।२२
एवमेकाक्षरं मन्त्रं..ध्यायन्ति परमा-
नन्दमया ज्ञानाम्बुराशयः दे०यु. १५
एवमेकैकः पुरुषो देवान् भुनक्ति बृह. १।४।१०
एवमेते मनः पितरं परिचरन्त्यापश्च
वरुणश्च... १ ऐत. १।७।६
एवमेते श्रोत्रं पितरं परिचरन्ति ...
चंद्रमाश्च १ ऐत. १।७।५
एवमेतौ प्राणं पितरं परिचरतोऽन्त-
रिक्षं च वायुश्च.. १ ऐत. १।७।३
एवमेतौ वाचं पितरं परिचरतः
पृथिवी चाग्निश्च १ ऐत. १।७।२
एवमेन१ँसर्वं तदभिसमेति यत्किञ्च
प्रजाः साधु कुर्वन्ति, यस्तद्वेद.. छांदो. ४।१।४

एवमेव खलु सोम्य तन्मनो दिशंदिशं
पतित्वाऽन्यत्रायतनमलब्ध्वा
प्राणमेवोपश्रयते छान्दो. ६।८।२
एवमेव खलु सोम्यविद्धीतिहोवाच छान्दो.६।११।२
एवमेव खलु सोम्यान्नमयस्याश्य-
मानस्य योऽणिमा स ऊर्ध्वः
समुदीषति तन्मनो भवति छान्दो. ६।६।२
एवमेव खलु सोम्यान्नेन शुङ्गेनापो-
मूलमन्विच्छ छान्दो. ६।८।४
एवमेव खलु सोम्येमाः सर्वाः प्रजाः
सत आगत्य न विदुः सत
गच्छामह इति छान्दो ६।१०।२
एवमेव खलुसोम्येमाःसर्वाःप्रजाःसति
सम्पद्य न विदुःसतिसम्पद्यामहइति छान्दो. ६।९।२
एवमेव चिदानन्दावप्यवचनेनैवानुभव-
न्नुवाच सर्वमन्यदिति नृसिंहो.७।३
एवमेव प्रतिहर्तारमुवाच प्रतिहर्तर्या
देवता प्रतिहर्तारमन्वायत्ता.. छान्दो.१।१०।११
एवमेव यदिदं किञ्च मिथुनमा-
पिपीलिकाभ्यस्तत्सर्वमसृजत बृ. उ. १।४।४
एवमेवंविदि पापं कर्म न श्लिष्यते छान्दो. ४।१०।३
एवमेवामुत्र पुण्यजितो लोकः क्षीयते छान्दो. ८।१।६
एवमेवानृतं वदन्नाविर्मूलमात्मानं
करोति १ ऐत. ३।६।५
एवमेवायमस्मिन्नन्धेऽन्धोभवति छांदो. ८।९।१
एवमेवायमात्मेद१ँशरीरंनिहत्यविद्यां
गमयित्वा..आत्मानमुपसंहरति बृ. उ. ४।४।३
एवमेवायं शरीर आत्मा प्राज्ञेनात्मना-
ऽन्वारूढ उत्सर्जन्याति
(उत्सर्जयाति— मा. पा.) बृ. उ. ४।३।३५
एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः
पुरुषायणाःपुरुषंप्राप्यास्तंगच्छंति प्रश्नो. ६।५
एवमेवास्मिन्नात्मनि सर्वाणि भूतानि
सर्वे देवाः सर्वे लोकाः सर्वे प्राणाः
सर्वं एत आत्मानः समर्पिताः बृह. २।५।१५
एवमेवेद१ँशरीर१ँशेते (सर्पत्वगवत्) बृह. ४।४।७
एवमेवेद१ँसर्वं तस्मादहमिति सर्वाभि-
धानं तस्यायमिति मकारः नृसिंहो. ७।२

एवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतंब्रह्मलोकंनविदन्ति	छांदो. ८।३।२
एवमेवेमौ भगवः साध्वलंकृतौ सुवसनौ परिष्कृतौ च	छांदो. ८।८।३
एवमेवेहाचार्यवान्पुरुषो वेद	छांदो. ६।१४।२
एवमेवैतदाहवनीयादग्रिमाहृत्य	ना. प. ३।७७
एवमेवैतद्याज्ञवल्क्य [बृह. ३।९।२०,	२१,२२,२३
एवमेवैतद्याज्ञवल्क्यान्तर्यामिणंब्रूहीति	बृह. ३।७।२
एवमेवैतद्व्यपदिष्टं भवति	बृह. ३।४।२
एवमेवैतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते	कौ. उ. ३।३
एवमेवैता आदित्यस्य रश्मय उभौ लोकौ गच्छन्ति	छांदो. ८।६।२
एवमेवैताभिरुपनिषद्भिः समाहितात्माऽसि	बृह. ४।२।१
एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्राणे अर्पिताः	कौ. उ. ३।९
एवमेवैष प्राज्ञ आत्मैतैरात्मभिर्भुङ्क्ते	कौ. उ. ४।२०
एवमेवैष प्राण इतरान्प्राणान् पृथक्पृथगेव सन्निधत्ते	प्रश्नो. ३।४
एवमेवैष भगवन्निति वै याज्ञवल्क्यः	तारसा. १।१
एवमेवोद्गातारमुवाचोद्गातर्यादेवतोद्गीथमन्वायत्तातांचेद्विद्वान्..	छांदो.१।१०।१०
एवमेष महाशब्दो भगवानिति... परब्रह्मस्वरूपस्य...	भवसं. २।५०
एवमेषा गायत्र्यध्यात्मं प्रतिष्ठिता (मा. पा.)	बृ. उ.५।१४।४
एवमेषां लोकानामासां देवतानामस्याक्षय्याविद्यायावीर्येणयज्ञस्य विरिष्टंसन्दधाति	छांदो. ४।१७।८
एवमोङ्कारेण सर्वा वाक्सन्तृण्णा	छांदो. २।२३।३
एवम्भूतस्यागाधमहिम्नः..मानसपूजया ध्यानेन..सर्वेण नित्यस्थलं प्राप्नोति	राधोप. ३।३
एवम्भूतस्य कर्माणिपुण्यापुण्यानि संक्षयं प्रयान्ति, नैव लिप्यन्ति..	अमन. २।९८
एवम्भूतं जगदाधारभूतं रामं वन्दे सच्चिदानन्दरूपम्..योध्यायेन्मोक्षमाप्नोति सर्वः	रा. पू. ७।८
एवं कीर्तिं श्लोकं विन्दते य एवं वेद	बृह. १।४।७
एवं खल्वमुमादित्यंसप्तविधंसामोपास्ते	छांदो. २।९।८
(अथ ह) एवं गार्गी वाचक्नवी पप्रच्छ	बृह. ३।६।१
एवंप्राह्माह भात्यग्निर्भातिसूर्योभाति..	संहितो. २.४
एवं चक्षुष्मतीविद्यया स्तुतः श्रीसूर्यनारायणः सुप्रीतोऽब्रवीत्	अक्ष्यु. ३
एवं चतुर्विंशतिभिस्तत्त्वैः सिद्धे वपुर्गृहे । जीवात्मा...वसति कर्मबन्धनैः	भवसं. २।२१
एवं चतुष्पथं कृत्वा तेयान्तिपरमां गतिम् । नकर्मणा नप्रजयात्यागेनैके अमृतत्वमानशुः	अवधू. ५
एवं चतुष्पथोबन्धोमार्गत्रयनिरोधकः। येन सिद्धाः सुसङ्गताः	वराहो. ५।४३
एवं च धारणाः पञ्च कुर्याद्योगी... ततो दृढशरीरः स्यान्मृत्युस्तस्य न विद्यते	१ यो. त. १०२
एवं चाप्यातुरोयस्तु...विमुक्तः सर्वपापेभ्यः कैवल्यायोपकल्पते	गुह्यका. ८४
एवं चिरसमाधिजनितब्रह्मामृतपानपरायणोऽसौसन्न्यासी.. भवति	मं. ब्रा. ५।२
एवं जीवाश्रिता भावा भवभावनयाहिताः	महो. ५।१३५
एवं जीवो हि सङ्कल्पवासनारज्जुवेष्टितः । दुःखजालपरीतात्मा क्रमादायाति नीचताम्	महो. ५।१२७
एवं ज्ञाते(ने)न्द्रियाणां तु तत्तत्सौख्यं सुसाधयेत	१यो. त. ७२
एवं ज्ञात्वा कृतं कर्म	भ. गी. ४।१५
एवं ज्ञात्वा विमोक्ष्यसे	भ. गी. ४.३२
एवं तत्तलक्ष्यदर्शनात्त पो भवति	मं. ब्रा. ४।१
एवं तदप आचक्षतेऽशनायेति तत्रैतच्छुङ्गमुत्पतितं विजानीहि	छान्दो. ६।८।३
एवं तदप आचक्षतेऽशायेति(मा.पा.)	छां. उ. ६।८।३
एवं ते ध्यायिनो विप्रा दहन्ते पातकं क्षणात् । ध्यानेन शुध्यते बुद्धिः..	दुर्वासो. १।९
एवं त्रयीधर्ममनुप्रपन्नाः	भ. गी. ९।२१
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते..	ईशा. २

एवं दिनपक्षमाससंवत्सरादिभेदाच्च
तद्वीयमानेन..वत्सरकालस्थितिः.. त्रि.म.ना. ६।३।५
एवं दृढवैराग्याद्बोधो भवति महो. ४।२६
एवं द्वात्रिंशदक्षराणि सम्पद्यन्ते नृ. पू. २।२
एवं द्वादशाङ्गानिमाध्यात्मिकान्याधि-
भौतिकान्याधिदैविकानि त्रि. ब्रा. १।४
एवं द्वारेषु सर्वेषु वायुपूरितरेचितः।
निषिद्धं तु नवद्वारे.. यो. त. १४१
एवं धर्मान् पृथक् पश्यंस्तामे-
वानुविधावति कठो. ४।१४
एवं ध्यायति यो नित्यं स योगी.. गणप. ९
एवं ध्यायेत्त्रिसन्ध्यासु...
विषं नाशयते शीघ्रं गारुडो. ९
एवंनचित्तजाधर्माश्चित्तंवाऽपिनधर्मजं अ. शां. ५४
एवंनजायतेचित्तमेवंधर्माअजाःस्मृताः अ. शां. ४६
एवं न विधिना खल्वनेनात्ताऽन्नत्वं
पुनरुपैति मैत्रा. ६।९
एवं नाडीमयंचक्रं..सततंप्राणवाहिन्यः
सोमसूर्याग्निदेवताः ध्या. बि. ५४
एवं निर्वाणानुशासनं, वेदानुशासनं आरुणि. ५
एवं नैवमितिपृष्ट ओमित्येवाह
(प्रजापतिः) नृसिंहो. ८।१
एवं पञ्चदशाक्षरं त्रैपुरं योऽधीते स
सर्वान्कामानवाप्नोति त्रि. ता. १।१५
एवं परम्पराप्राप्तं भ. गी. ४।२
एवं परिपूर्णराजयोगिनः सर्वात्मक-
पूजोपचारः स्यात् आत्मप. १
एवं पुण्यस्य कर्मणो दूराद्गन्धो वाति महान. ९.७
एवं पूर्णधियो धीराः.. न नन्दन्ति
न निन्दन्ति जीवितं मरणं तथा अ.पू. ५।२४
एवं पृष्टेन मुनिना व्यासेनाखिल-
मात्मजे। यथावदखिलं प्रोक्तं.. महो. २।१६
एवं प्रधानस्य व्यक्ततांगतस्यो-
पलब्धिर्भवति मैत्रा. ६।१०
एवं प्रवर्तितं चक्रं भ. गी. ३।१६
एवं प्राणमथोङ्कारं.. युनक्ति युञ्जते
वाऽपि तस्माद्योग इति स्मृतः मैत्रा. ६।२५
एवं बद्धस्तथाजीवः कर्मनाशेसदाशिवः स्कन्दो. ७

एवं बहुभिः पुनः पुनः प्रयद्भिर्वै
सम्पूर्येत ३ इति बृह. ६।२।२
एवं बहुविधा यज्ञाः भ. गी. ४।३२
एवं बुद्धेः परं बुद्ध्वा भ. गी. ३।४३
एवं ब्रह्मपरिज्ञानादेवमर्त्योऽमृतोभवेत् महो. ४।८१
एवं ब्रह्मशालां विशेत् ततश्चतु-
र्जालं ब्रह्म कोशं प्रणुदेत् मैत्रा. ६।२८
एवं भवेद्घठावस्था सतताभ्यासयोगतः १ यो. त. ७९
एवं भस्मधारणमकृत्वानाश्नीया-
दापोऽन्नमन्यद्वा भस्मजा. १।६
एवंभूतसत्त्वांशभागत्रयसमष्टितो-
ऽन्तःकरणमसृजत् पैङ्गलो. २।४
एवंभूतं जगदाधारभूतं रामं वन्दे..
योध्यायेन्मोक्षमाप्नोति सर्वः रा. पू. ५।८
एवं मन्वान एवं विजानन्नतिवादी
भवति, तं चेद्ब्रूयुः.. छान्दो. ७।१५।४
एवं मन्वान एवं विजानन्नात्मरति-
रात्मक्रीडः.. स स्वराड् भवति छां.उ. ७।२५।२
एवं मन्वानस्यैवं विजानत आत्मतः
प्राण आत्मतः सर्वमिति छान्दो. ७।२६।१
एवं मयि चिदाकाशे जीवेशौ
परिकल्पितौ वराहो. २।५१
एवं मासत्रयाभ्यासान्नाडीशुद्धिः... १ यो.त. ४४
एवं मां ब्रह्मचारिणः, धातरायान्तु.. तैत्ति. १।४।७
एवं मुनेर्विजानत आत्मा
भवति गौतम कठो. ४।१५
एवं मुहूर्तत्रयं भावनापरो जीवन्मुक्तो
भवति तस्य.. सिद्धिः भावनो. १०
एवं यथाऽश्मानमाखणमृत्वा
विध्वंसते छान्दो. १।२।८
एवं यस्तु विजानाति स्वगुरो-
रुपदेशतः. सदा न तपति प्रभुः कठरु. ३८
एवं यः सततं ध्यायेत्.. निःश्रेयस-
मवाप्नुयात् शाण्डि. ३।२।५
एवं यास्यसि पाण्डव भ. गी. ४।३५
एवं योगारूढो ब्रह्मण्येवानुष्टुभं
सन्दध्यादोङ्कारः नृसिंहो. ४।२
एवं यो वेत्ति तत्त्वतः भ. गी. ४।९
एवं यो वेद तत्त्वेन कल्पयेत्सः... वैतथ्य. ३०

एवं यो वेद तत्त्वेन ब्रह्मभूयायकल्पते कठरु. ४५
एवं यो वेद तत्त्वेन सर्वे पुरुषउच्यते ब्र. वि. १११
एवं यो वै स धर्मः, सत्यं वै तत् बृह. १।४।१४
एवं रूपपरिज्ञानं यस्यास्तिपरयोगिनः।
कुत्रचिद्गमनं नास्ति तस्य पूर्ण-
स्वरूपिणः रुद्रहृ. ५०
एवं रूपं कृष्णचन्द्रं चिन्तयेन्नित्यशः
सुधीः। तस्याद्या प्रकृती राधिका राधोप. ३।२
एवंरूपः शक्य अहं नृलोके भ.गी.१२।१
एवंलक्षणसम्पन्नो गुरुरित्यभिधीयते द्वयोप. ३
एवं वा अर इदं महद्भूतम् बृह. २।४।१२
एवं वा अरेऽस्य महतो भूतस्य
निश्श्वसितमेतत् ... बृह. २।४।१०
एवं वाङ्मनश्चक्षुः श्रोत्रं च ते प्रीताः
प्राणं स्तुन्वन्ति प्रश्नो. २।४
एवं वाङ्मनश्चक्षुः श्रोत्रं चेति ते प्रीताः
(मा. पा.) प्रश्नो. २।४
एवं वाचं च नाम च मनोऽनुभवति छान्दो.७।३।१
एवं वाव खल्वसावभिध्यातोम् ..
स्वातन्त्र्यं लभते मैत्रा. ६।२२
एवं वाव खल्वसौ भूतात्माऽन्तः
पुरुषेणाभिभूतो गुणैर्हन्य-
मानो नानात्वमुपैति मैत्रा. ३।३
एवं वाव खल्विमान्प्राणानोमित्यने-
नोद्गृत्स्यानामयेऽग्नौ जुहोति मैत्रा. ६।२६
एवंविच्छान्तो दान्तोपरतस्तितिक्षुः
समाहितो भूत्वाऽऽत्मन्ये-
वात्मानं पश्यति बृ.उ. ४।४।२३
एवंविच्छ्रोत्रियस्य दारेण नोप-
हासमिच्छेत् बृह. ६।४।१२
एवं विज्ञाय शरीराभिमानं त्यजेन्न
शरीराभिमानी भवति, स एव.. ना. प. ६।१
एवंवित् (आत्मवित्) स्वर्गलोकमेति छां.उ.८।३।३+५
एवंवित्स्वप्रकाशं परमेव ब्रह्म भवति नृसिंहो. ६।२
एवंविदमेव ब्रह्माणं कुर्वीत छां.उ.४।१७।१०
एवंविद५ ह वा एषा ब्रह्माणमनुगाथा छान्दो.४।१७।९
(एवं ह) एवंविदं सर्वाणि भूतानि
प्रतिकल्पयंत इदं ब्रह्मा-
यातीदमागच्छतीति बृह. ४।३।३७
एवंविदं सर्वाणि भूतान्यवन्ति बृह. १।५।२०
एवंविदात्मन्नेवाभिध्यायति...
यजतीति मैत्रा. ६।९
एवं विदित्वा गणनाथतत्त्वं हेरम्बो. १३
एवं विदित्वा परमात्मरूपं कैव. २३
एवं विदित्वा यो धारयति स
सर्वकर्मार्हो भवति कात्याय. १
एवं विदित्वा स्वेच्छाचारपरो भूयात् अवधू. ३३
एवंविदि पापं कर्म न श्लिष्यते छां. उ.४।१४।३
एवंविदुद्गाता ब्रूयात् छां. उ. १।७।८
एवंविदेहकैवल्यं यतिर्नावर्तते पुनः २ आत्मो. २४
एवं विद्वानेतदुपास्ते बृह.४।१।२,३,७
एवं वृंदारक आढ्यः सन्नधीतवेदः..
क गमिष्यसि बृह. ४।२।१
एवंविद्ध वै ब्रह्मा यज्ञं यजमानं
सर्वांश्चर्त्विजोऽभिरक्षति छान्दो.४।१७।१०
एवंविद्वान् सर्वे हि देवेभ्योऽन्नाद्यं
प्रयच्छति बृ. उ. १।५।२
एवंविद्वान्सर्वेषां भूतानां प्राणमेव
प्रज्ञात्मानमभिसंस्तूय सहैतैः.
सर्वैरस्माच्छरीरादुत्क्रामति कौ.उ. २।१४
एवंविधश्चिदादित्यस्योदयास्त-
मयाभावात् सर्वकर्माभावः मं.ब्रा. २।३
(?) एवंविद्यपि चांडालायोच्छिष्टं
प्रयच्छेदात्मनि हैवास्य.. छांदो. ५।२४।४
एवं विविधा गोप्यः कृष्णसेवांकुर्वन्ति राधोप. १।५
एवं वैतमात्मानमेते (प्राणादयः)
आत्मनोऽन्ववस्यन्ति कौ.उ. ४।२०
एवं वैतमात्मानमेत आत्मानो
भुञ्जन्ति (मा. पा.) कौ. उ. ४।१
एवं वैषा गायत्र्यध्यात्मं प्रतिष्ठिता
[बृ. उ. ५।१४; गायत्र्यु. ३
एवं व्यक्तमन्नमव्यक्तमन्नमस्य निर्गुणो
भोक्ता, भोक्तृत्वाच्चैतन्यंप्रसिद्धंतस्य मैत्रा. ६।१०
एवं शुभाशुभैर्भावैः सा नाडीति
विभावयेत् क्षुरिको. २०
एवंषण्मासाभ्यन्तरात्सर्वरोगनिवृत्तिः शाण्डि.१।७।४६
एवं संचारचक्रे कूपचक्रेण घटा इव
(जन्मपरम्परा) १ यो. त. १३३

एवं सततयुक्ता ये	भ. गी. १२।१
एवं स देवानां यथा ह वै बहवः पशवः मनुष्यं भुञ्ज्युः	बृह. १।४।१०
एवं स देवो भगवान्वरेण्यो योनिस्वभावानधितिष्ठत्येकः	श्वेता. ५।४
एवं समभ्यसेद्वायुंसब्रह्माण्डमयोभवेत्	योगकुं. ३।१३
एवं स भगवान्देवंपश्यन्त्यन्येपुनःपुनः	मंत्रिको. १९
एवं सर्वं हंसवशात्तस्मान्मनो हंसो विचार्यते। स एव जपकोटया नादमनुभवति	हंसो. ६
एवं सर्वे हंसवशान्नादो दशविधो जायते। चिणीति प्रथमः.. दशमो मेघनादः	हंसो. ७
एवं सर्वाणि भूतान्यग्निहोत्रमुपासते	छांदो.५।२४।५
एवं सर्वाणि भूतानि मणौ सूत्र इवाऽऽत्मनि। स्थिरबुद्धिरसम्मूढो ब्रह्मविद्ब्रह्मणि स्थितः	ध्या. बिं. ६
एवं सर्वाणीन्द्रियकर्माणि प्राणकर्माणि	मैत्रा. ६।१०
एवं सर्वेषां गन्धानां नासिके एकायनं (नासिकैकायनम्=मा. पा.)	बृ.उ. ४।५।१२
एवं सर्वेषां स्पर्शानां त्वगेकायनम्	बृ.उ. ४।५।१२
एवं संसारचक्रेण कूपचक्र घटा इव	२ यो. त. ५
एवं सुकृतदुष्कृते सर्वाणि च द्वन्द्वानि (पर्यवेक्षत)	कौ. उ. १।४
एवं सुतो ब्रूते	ब्रह्मो. १
एवंसूक्ष्माङ्गानि,यएवंवेदसमुक्तिभाक्..	मं. ब्रा. १।१
एवं सोम्य ते षोडशानां कलानामेका कलाऽतिशिष्टा..	छांदो.६।७।६,७
एवं सोम्य स आदेशो भवति	छान्दो. ६।१।६
एवं स्थूलं च सूक्ष्मं च शरीरं..	वराहो. २।६८
एवं स्वरूपविज्ञानं यस्य कस्यास्ति योगिनः। कुत्रचिद्गमनं नास्ति तस्य सम्पूर्णरूपिणः	पा. ब्र. ३९
एवं स्वात्मानं ज्ञात्वा वेदैः किं प्रयोजनं भवति	पैङ्गलो. ४।९
एवं स्वानुभवो यस्य सोऽहमस्मि न संशयः	मैत्रे. ३।२४
एवं ह वा एनमेषा देवता मृत्युमतिवहति, य एवं वेद	बृह. १।३।१३
एवं ह वा एनं स्वा अभिसंविशन्ति (मा. पा.)	बृह. १।३।१६
एवं ह वा एष श्रिया यशसा तपति	गायत्र्यु. २
एवं ह वै तत्सर्वं परे देवे मनस्येकी-भवति।	प्रश्नो. ४।२
एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते	प्रश्नो. ५।५
एवं हास्य सर्वे पाप्मानः प्रदूयन्ते	छान्दो.५।२४।३
एवं हि प्रणवंज्ञात्वाव्यभुतेपरमंपदम्	आगम. २७
एवं हि यस्य शक्तयश्चानेधाऽऽह्लादिनी	राधिको. ४
एवं हेतुफलों जाति प्रविशन्ति मनीषिणः। यावद्धेतुफलावेशः संसारस्तावदायतः	अ. शां. ५४
एवं हैव विध्वंसमानंविध्वस्वोविनेशुः	बृह. १।३।७
एवं हैव श्रिया यशसा तपति योऽस्या एतदेवं वेद	बृह. ५।१४।३
एवं हैव स प्रजया पशुभिः..सन्धीयते	३ ऐत. १।६।३
एवं हैवंविदं सर्वाणि भूतान्यवन्ति	बृह. १।५।२०
एवं हैवंविदं सर्वाणि भूतानि प्रतिकल्पन्ते, अयमागच्छति	बृह. ४।३।३७
एवं हैवंविदे सर्वाणि भूतान्यरिष्टिमिच्छन्ति	बृह. १।४।१६
एवं हैवेमान्प्राणान्त्संववर्ह	बृह. ६।१।१३
एवं हैवैवंविद्यद्यपि बह्विवपापं कुरुते सर्वमेव तत्संप्साय शुद्धः	बृह. ५।१४।८
एवं हैवैवंविद्यद्यपि..तत्सत्संस्थाय (मा. पा.)	बृ. उ. ५।१४।८
एवं हैवैष यन्ता(रं)निलयनं प्रापयति	छाग. ३।५
एवं हैवैषोऽभिसृत्वराणामेव धुर्याणां चंक्रमतामरीणामुत्प्लवति	छाग. ५।३
एवं हैव इतश्चेतश्चामुतश्च सम्प्रद्रवत इवोपशु(घु)च्यत इवोपस्कन्द-मभिगृह्णाति	छाग. ३।५
एवं हैष प्राज्ञेनात्मनापोज्झितोनब्रूते..	छाग. ६।३
एवं हैष संक्रीडति	छाग. ३।५
एवं ह्येताः पञ्चविधा अनुशस्यन्ते, यत्प्राक्कृचाशीतिभ्यः सैकविधा	१ ऐत. ३।४।३
एवा ते गर्भ एजतु सहावैतुजरायुणा	बृ. उ. ६।४।२३
एवा मे अस्तु धान्यं सहस्रधारमक्षितं	महाना.१४।२१

एवैष कृत्स्नक्षय एको जागर्ति मैत्रा. ६।१७
एष आकाशात्मैव, एष कृत्स्नक्षय
एको जागर्ति मैत्रा. ६।१७
एष आत्मा न नश्यति, यं ब्रह्म-
चर्येणानुविन्दते छान्दो. ८।५।३
एष आत्मा नृसिंहश्चिद्रूप एवा-
विकारोह्युपलब्धः नृसिंहो. ९।१
एष आत्माऽपहतपाप्माविजरोवि-
मृत्युर्विशोको... सत्यकामः
सत्यसङ्कल्पः [छां.उ.८।१।५+ मैत्रा.७।७
एष आत्माऽहमव्ययः ते. बिं. ५।४
एष आत्मेतिहोवाच [छांदो.८।३।४ + ८।७।४
+८।८।३+८।११।१+ मैत्रा. २।२
एष आत्मेत्याह भगवान् मैत्रिः मैत्रा. २।२
एष आदेशः, एष उपदेशः.. तैत्ति. १।११।४
एष इमं लोकमभ्यार्चत्पुरुषरूपेण
य एष तपति १ ऐत. २।१।१
एष ईश्वरस्तत्सर्वगतः नृसिंहो. ५।१
(अथ) एष उ एव अकार आप्ततमार्थे
आत्मन्येव नृसिंहेदेवेब्रह्मणि वर्तते नृसिंहो. ९।१
एष उ एव बिभ्रद्वाजः; प्रजा वै
वाजस्ता एव बिभर्ति १ ऐत. २।२।१
एष उ एव बृहस्पतिः, वाग्वै बृहती बृह. १।३।२०
एष उ एव ब्रह्मणस्पतिः, वाग्वै ब्रह्म,
तस्या एव पतिः, तस्माद्ब्रह्मणस्पतिः बृह. १।३।२१
एष उ एव भामनीः एषहि
सर्वेषु लोकेषु भाति छान्दो.४।१५।४
एष उ एव वामनीः, एष हि सर्वाणि
वामानि नयति छान्दो.४।१५।३
एष उ एवासाधुकर्म कारयति(पाठः) कौ.उ. ३।८
एष उ एव साम बृह.१।३।२२
एष उ एवैतदिन्द्रस्यात्मा भवति कौ. उ. २।६
एष उ एवैनमसाधु कर्म कारयति तं
यमेभ्यो...नुनुत्सत कौ. उ. ३।९
एष उ एवैषु सर्वेष्वेतेषु परिस्र्यायते छांदो. ८।७।४
एष उभयात्मैवंवित् मैत्रा. ६।९
एष उत एवास्यात्मै तदात्मा भवति
य एवं वेद कौ. उ. २।६

एष उ वा उद्गीथः प्राणावा उद्गीथः बृ. उ. १।३।२३
एष उ स्वरोयदेतदक्षरमेतदमृतमभयं
तत्प्रविश्य देवा अमृताः..अभवन् छां. उ. १।४।४
एष उ ह्येव सर्वे देवाः बृह. १।४।६
(एवमेव) एष एतत्प्राणान् गृहीत्वा
स्वे शरीरे.. यथाकामं परिवर्तते बृह. २।१।१८
एष एत्यवीरहा रुद्रो जलासभेषजीः,
वित्तेऽक्षेममनीनशद्वातीकारो-
ऽप्येतु ते नीलरु. १।३
एष एव क्षयस्तस्याः (वासनायाः)
ब्रह्मेदमिति निश्चयः अ. पू. ५।६९
एष एव उग्रलक्षेष एव सर्वतोमुख
एषएव नृसिंहः, एष एव भीषणः नृसिंहो. ४।२
एष एवउग्रलक्षेषहिव्याप्ततमः, एषएव
सर्वतोमुख एषएवहिव्याप्ततमः नृसिंहो. ५।१
एष एव उग्रलक्षेष ह्येवोत्कृष्टः नृसिंहो. ५।४
एषएव नमाम्येष एवाहमेव योगारूढो
ब्रह्माण्येवानुष्टुभंसन्दध्यादोङ्कारइति नृसिंहो. ४।२
एष एव नमाम्येष हि व्याप्ततमः नृसिंहो.५।१
एष एव नमाम्येषह्येवोत्कृष्टः,
एष एवाहम् नृसिंहो. ५।४
एष एव नृसिंह एष एव भीषणः नृसिंहो. ४।२
एष एव नृसिंह एष हि व्याप्ततमः नृसिंहो. ५।१
एष एव नृसिंह एषह्येवोत्कृष्टः नृसिंहो. ५।४
एष एव परम आनन्दः, एषब्रह्मलोकः बृह. ४।३।३३
एष एव परमो धर्मः, सत्यात्..
कदाचिन्न प्रमदितव्यम् भस्मजा. २।७
एष एव भद्रः, एष एव न मृत्युमृत्युः नृसिंहो. ४।२
एष एव भद्रः, एष हि व्याप्ततमः नृसिंहो. ५।१
एष एव भद्रः, एष ह्येवोत्कृष्टः नृसिंहो. ५।४
एष एव भीषणः, एष एव भद्रः नृसिंहो. ४।२
एष एव भीषणः, एष एव ह्येवोत्कृष्टः नृसिंहो. ५।४
एष एव भीषणः, एष हि व्याप्ततमः नृसिंहो. ५।१
(अथ) एष एव मकारो महाविभूत्यर्थ
आत्मन्येव नृसिंहेदेवेब्रह्मणिवर्तते नृसिंहो. ५।६
एष एव महानेष एव विष्णुः नृसिंहो. ४।२
एष एव मनोनाशस्त्वविद्यानाशएवच महो. ४।११०
एष एव महानेष हि व्याप्ततमः नृसिंहो. ५।१
एष एव महानेष ह्येवोत्कृष्टः नृसिंहो. ५।४

एष एव मृत्युमृत्युरेष हि व्याप्ततमः नृसिंहो. ५।१
एष एव मृत्युमृत्युरेष ह्येवोत्कृष्टः नृसिंहो. ५।४
एष एव वामनीः, एष एव सर्वाणि वामानि नयति..य एवं वेद छां.उ. ४।१५।३
एष एव विष्णुः, एष एव ज्वलन् नृसिंहो. ४।२
एष एव विष्णुरेष हि व्याप्ततमः नृसिंहो. ५।१
एष एव विष्णुरेष ह्येवोत्कृष्टः नृसिंहो. ५।४
एष एव वीरः,एषएवमहानेषएवविष्णुः नृसिंहो. ४।२
एष एव वीरः, एष एवोत्कृष्टः नृसिंहो. ५।४
एष एव वीरः, एष व्याप्ततमः नृसिंहो. ५।१
एष एव सर्वतोमुखः, एष एव नृसिंहः नृसिंहो. ४।२
एष एव सर्वतोमुखः, एष हि व्याप्ततमः नृसिंहो. ५।१
एष एव सर्वतोमुखः, एष ह्येवोत्कृष्टः नृसिंहो. ५।४
एष(च)एव(वा)अकार आप्ततमार्थ आत्मन्येव नृसिंहे देवे वर्तते नृसिंहो. ५।१
एष एवात्मेति होवाच नृसिंहो. ९।१०
एष एवादेशः, एष एवोपदेशः भस्मजा. २।७
एष एवाहमेष हि व्याप्ततम आत्मैव नृसिंहः नृसिंहो. ५।१
एष एवाहमेष ह्येवोत्कृष्टस्तस्मादात्मा ह्येवैनं जानीयात् नृसिंहो. ५।४
एष एवाहमेव योगारूढो ब्रह्मण्येवानुष्टुभं सन्दध्यात् नृसिंहो. ४।२
एष एवोग्रः, एष ह्येवोत्कृष्टः नृसिंहो. ५।४
एष एवोङ्कार उत्कृष्टतमार्थः नृसिंहो. ५।२
एष एवोङ्कार उत्कृष्टतमार्थ आत्मन्येव नृसिंहे देवे ब्रह्मणि वर्तते नृसिंहो. ५।३
एष एवोग्रः, एष एवोत्कृष्टः नृसिंहो. ५।४
एष एवोग्रः, एष हि व्याप्ततमः नृसिंहो. ५।१
एष एवोग्रः, एष एव वीरः नृसिंहो. ४।२
एष एवोत्कृष्टः, एष एव महान् नृसिंहो. ५।४
एष ओङ्कार आख्यातो धारणाभिर्निबोधत ना. विं. ८
एष कृत्स्नक्षय एको जागर्ति मैत्रा. ६।१७
एष चाभ्यन्तरो योगोयथातेकथितः.. दुर्वासो. २।१२
एषणात्रयवासनात्रयममत्वाहंकारादिवमनमिव हेयमधिगम्य.. प. हं. प. १
एष त आत्माऽन्तर्याम्यमृतः [बृह. ३।७।३+४।२-३
एष त आत्मासर्वान्तरः [बृह.३।४।१, १,२+५।१

एष तेऽग्निर्नचिकेतःस्वर्ग्योयमवृणीथा द्वितीयेन वरेण कठो. १।१९
एष तत्स्थः सवित्राख्यो यस्मादेषेमे चन्द्रर्क्षग्रहसंवत्सरादयः सूयन्ते मैत्रा. ६।१६
एष तुरीय एष एवोग्र एष एव वीरः नृसिंहो. ४।२
एष तु वा अतिवदति यः सत्येनातिवदति छां.उ. ७।१६।१
एष तूद्देशतः प्रोक्तः भ. गी. १०।४०
एष ते कामकामाय स्वाहा महाना. १४।३
एष ते योनिः सूर्याय त्वा भ्राजस्वते चित्युः. १६।१
एष ते मन्यो मन्यवे स्वाहा महाना. १४।४
एष दृष्टोऽदृष्टोऽव्यवहार्योऽप्यल्पो नाल्पः साक्ष्यविशेषोऽनन्यः.. अद्वयः परमात्मा नृसिंहो. ९।७
(तथैव) एष देवदत्तः स्वप्न आनन्दमुपयाति ब्रह्मो. १
एष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमानाइमंमानवमावर्तं नावर्तन्ते छान्दो.४।१५।६
एष देवयानः पन्थाः छान्दो.५।१०।२
एष देवः स्वप्ने महिमानमनुभवति प्रश्नो. ४।५
एष धर्मो यातो भवत्यनन्तरस्त्वेवैनमुपमंत्रयते ददाम त इति कौ.उ. २।१,२
एषनित्योमहिमाब्राह्मणस्य[बृ.४।४।२३ +इतिहा.२०
एष पन्थाः, एतत्कर्म, एतद्ब्रह्म १ ऐत. १।१।१
एष पन्थाः परिव्राजकानां वीराध्वनि वाऽनाशके वाऽपां प्रवेशे वा .. याज्ञव. २
एष पन्था ब्रह्मणा ह्यानुवित्तस्तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्च बृह. ४।४।९
एष पन्था ब्रह्मणा ह्यानुवित्तस्तेनैति सन्न्यासीब्रह्मविदित्येवमेवैषभगवन् जाबा. ५
एषपरमात्माऽपरिमितोऽजोऽतर्क्योऽचिन्त्यः, एष आकाशात्मा मैत्रा. ६।१७
एष परमात्मा पुरुषो नाम आत्मो. ६
एष परमेश्वरः, एष भूताधिपतिः मैत्रा. ७।७
एष परोरजा इति, सर्वमु ह्येष रज उपर्युपरि तपति गायत्र्यु. २
एष पर्जन्यो मघवानेष वायुरेष पृथिवी रयिर्देवः सदसच्चामृतं च प्रश्नो. २।५

एष पुण्यकृतां लोकानेष मृत्योर्हिरण्मयम्	महाना. ६।६
एष पुरुषो न शृणोति न पश्यति	प्रश्नो. ४।२
एष प्रणव इत्येवं ह्याह	मैत्रा. ६।४
एष प्रणव ओमिति	छान्दो. १।५।१
एष प्रजापतिर्यद्धृदयम्,एतद्ब्रह्मैतत्सर्वम्	बृह. ५।३।१
(एवमेव) एष प्राज्ञ आत्मेदं शरीरमनुप्रविष्ट आलोमभ्य आ नखेभ्यः	कौ.उ. ४।१९
एष प्राण इतरान्प्राणान् पृथक्पृथगेव सन्निधत्ते	प्रश्नो. ३।४
एष प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृतो न साधुना कर्मणा भूयान्नो एवाऽसाधुना कर्मणा..	कौ. उ. ३।९
एष प्राणजयोपायः सर्वमृत्यूपघातकः	शाण्डि.१।७।४३
(तथैव) एष प्राणो यदा याति संसृष्टमाकृष्य	ब्रह्मो. १
एष ब्रह्मलोकः सम्राडिति हैनमनुशशास याज्ञवल्क्यः	बृह. ४।३।३२
एष ब्रह्मलोकःसम्राडेनंप्रापितोऽसीति होवाच याज्ञवल्क्यः	बृह. ४।४।२३
एष ब्रह्मविदां वरिष्ठः, सत्येनलभ्यः	मुण्ड. ३।१।४
एष ब्रह्मा च विष्णुश्च रुद्र एष हि भास्करः	सूर्यता. १।६
एष ब्रह्मैष इन्द्र एष प्रजापतिरेते सर्वे देवा इमानि च पञ्च महाभूतानि	२ ऐत. ५।३
एष भर्ग इति रुद्रो ब्रह्मवादिनः	मैत्रा. ६।७
एष भर्गाख्यः, भाभिर्गतिरस्य हीति भर्गः	मैत्रा. ६।७
एष भुवनस्य मध्ये भुवनस्य गोप्ता	महाना. ६।५
एष भूतपालः [बृ.उ. ४।४।२२+	मैत्रा. ७।७
एष भूताधिपतिः [बृ.उ.४।४।२२	मैत्रा. ७।७
एष भूतानामधिपतिर्ब्रह्मणः सायुज्यꣳ सलोकतामाप्नोति	महाना. १०।२
एष म आत्माऽन्तर्हृदयेऽणीयान्	छां. ३।१४।३,४
एष मधुकृत ऋग्वेद एव पुष्पम्	छान्दो. ३।१।२
एष यज्ञस्य पुरस्ताद्युज्यते	२ प्रणवो. ४
एष योगो वरो देहे सिद्धिमार्गप्रदर्शकः	वराहो. ५।४०
एष योनिः सर्वस्य [माण्डू. ६ [ग. शो. १।४+१।६+ [नृ.पू. ४।२;	+रामो. २।४ सुबालो. ५।१५; नृसिंहो. १।४
एष योऽयं दक्षिणेऽक्षन् पुरुषस्तंवा एतमिन्धꣳ सन्तमिन्द्र इत्याचक्षते	बृह. ४।२।२
एष रज उपर्युपरि तपति	बृह. ५।१४।३
एष रसो यच्चक्षुः सतो ह्येष रसः	बृह. २।३।४
एषर्ग्यजुः परमेतच्च सामायमथर्वेयमन्या च विद्या	त्रिपुरो. १६
एषर्ग्यजुः परमेतच्च सामेवायमथर्वेयमन्या च विद्योम् (पाठः)	त्रिपुरो. १६
एष लोकपाल एष लोकाधिपतिरेष सर्वेश्वरः स म आत्मेति विद्यात्	कौ. उ. ३।९
एष वः पन्थाः सुकृतस्य लोके	मुण्ड. १।२।१
एष वः पुण्यः सुकृतो ब्रह्मलोकः	मुण्ड. २।२।६
एष वा अग्रेयोनिर्यः प्राणः प्राणंगच्छ स्वांयोनिंगच्छस्वाहा [+याज्ञव. १	ना. प. ३।७७ प. हं. प. ३
एष वा अर्धर्चः, एष ह्येभ्यः सर्वेभ्योऽर्धेभ्योऽर्चत	१ ऐत. २।२।८
एष वा ऋगेष ह्येभ्यः सर्वेभ्यो भूतेभ्योऽर्चत	१ ऐत. २।२।७
एष वा अक्षरम् ,एष ह्येभ्यःसर्वेभ्यः क्षरति, न चैनमतिक्षरन्ति	१ ऐ. २।२।१०
एष वा उद्गीथः प्राणो वा उत्प्राणेन हीदꣳ सर्वमुत्तब्धम्	बृह. १।३।२३
एष वायुरेष पृथिवी रयिर्देवः सदसच्चामृतं च यत्	प्रश्नो. २।५
एष वाव ते गोप्यायेति (गोपाध्यातेति)	शौनको. १।३
एष वाव विजिज्ञासितव्योऽन्वेष्टव्यः	मैत्रा. ६।८
एष विधिर्वीराध्वानेवाऽनाशकेवाप्सुप्रवेशेवाऽग्निप्रवेशेवामहाप्रस्थानेवा	प. हं. प. ४
एष वीरो नृसिंह एव	नृसिंहो. २।८
एष वीरो नारसिंहेन वाऽनुष्टुभा मन्त्रराजेन तुरीयं विद्यात्	नृसिंहो. २।८
एष देवो विश्वकर्मा महात्मा सदा जनानां हृदये सन्निविष्टः	श्वेता. ४।१७

एष वै कृत्स्न आत्मा यद्बली १ऐत.३।५।३
एष वै गोपा एष हीदं सर्वं
गोपायति... १ऐत.१।६।२
एष वै पद्मेव हीमानि सर्वाणि
भूतानि पाति तस्मात्पद्म् १ ऐत. २।२।९
एष वै पृथग्वर्त्मात्मा वैश्वानरः छान्दो. ५।१४।१
एष वै प्रतिष्ठात्मा वैश्वानरः छान्दो. ५।१६।१
एष वै बहुल आत्मा वैश्वानरो
यं त्वमात्मानमुपास्से छान्दो. ५।१५।१
एष वै यजमानस्य लोकः [छान्दो. २।२४।५,९,१५
एष वै रयिरात्मा वैश्वानरः छान्दो. ५।१६।१
एष वै रयिर्यः पितृयाणः प्रश्नो. १।९
एष वै विश्वरूप आत्मा
वैश्वानरः यं त्वमुपास्से छान्दो. ५।१३।१
एष वै सम्प्रति प्राणो यन्मज्जैवद्रेतो
न ह वा ऋते प्राणाद्रेतः सिच्यते ३ ऐत. २।२।२
एष वै सुतेजा आत्मा वैश्वानरो
यं त्वमात्मानमुपास्से छान्दो. ५।१२।१
एष वै सोम्य चतुष्कलो पादो
ब्रह्मणः प्रकृतवान्... छान्दो. ५।६।२
एष वै सोम्य चतुष्कलः पादो ब्रह्मण
आयतनवान्नाम छान्दो. ४।८।३
एष वोऽस्त्विष्टकामधुक् भ. गी. ३।१०
एष सर्वेश्वर एष सर्वान्तर्यामी ग. शो. ५।७
एष वै सोम्यचतुष्कलःपादोब्रह्मणो-
ऽनन्तवान्नाम छान्दो. ४।६।३
एष वै सोम्य चतुष्कलः पादो ब्रह्मणो
ज्योतिष्मान्नाम छान्दो. ४।७।३
एष व्योम्न्यात्मा प्रतिष्ठितः मुण्ड. २।२।७
एष वै यज्ञेयज्ञोऽह्न्यहर्देवेषुदेवोऽभ्यूह्यः १ ऐत. ३।४।१
(एवमेव) एष सम्प्रसादोऽस्माच्छरी-
रात्समुत्थाय परं ज्योतिरुपसम्पद्य
स्वेन रूपेणाभिनिष्पद्यते छान्दो.८।१२।३
एषसर्वज्ञएषसर्वान्तर्यामी [ग.शो. १।४+रामो. २।४
एष सर्वज्ञ एष सर्वेश्वरः सुबालो. ५।१५
एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः
सर्वस्य, प्रभवाप्ययौहिभूतानाम्
[नृ.पू. ४।२ नृसिंहो. १।५
एष सर्वभूतान्तरात्मा मुण्ड. २।१।४
एष सर्वाधिपतिः, एषोऽन्तर्यामी सुबालो. ५।१५
एष सर्वान्तर्यामी [ग. शो. ५।७+ रामो. २।४
एष सर्वेश्वरः, एष सर्वज्ञः [माण्डू.६+नृ. पू. ४।२
[नृसिंहो. १।५ + रामो. २।४+ ग. शो. १।४
एष सर्वेश्वरः, एष सर्वाधिपतिः सुबालो. ५।१
एष सर्वेश्वरः, एष भूताधिपतिः, एष
भूतपालः, एष सेतुर्विधरणः बृह. ४।४।२१
एष सर्वेश्वरश्चैष सर्वज्ञः सूक्ष्मभावनः ना. प. ८।१७
एष सर्वेश्वरः, स म आत्मेति
विद्यात् कौ. उ ३।९
एष सर्वेश्वरो विभुः। सर्वदेवमयः
सर्वप्रपंचाधारगर्भितः। सर्वा-
क्षरमयः कालः [ना. प. ८।५ +तुरीयो. ३
एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते कठो. ३।१२
एष साचामश्चेति तत्साम्नः सामत्वं बृह. १।३।२२
एष सिद्धिकरः, एतस्माद्ध्यानादौ
प्रयुज्यते ब्र. शिखो. ३
एष सुप्तेषु जागर्ति कामं कामं.. कठो. ५।८
एष सुविज्ञेयो बहुधा चिन्त्यमानः कठो. २।८
एष सूर्यः, एष पर्जन्यो मघवान् प्रश्नो. २।५
एषसेतुर्विधरणः, एषहिखल्वात्मेशानः
शम्भुर्भवो रुद्रः प्रजापतिः.. मैत्रा. ७।७
एष सेतुर्विधरण एषां लोकाना-
मसम्भेदाय.. बृह. ४।४।२२
एष सोमो राजा तद्देवानामन्नं,
तं देवा भक्षयन्ति छांदो. ५।१०।४
एष स्वधर्माभिभूतो यो वेदेषु.. मैत्रा. ४।४।३
एष स्वधर्मोऽभिहितो यो वेदेषु न
प्राणो ह्येष यएषतपति [१ऐत.२।१।१+ ३।४
प्राणो ह्येष यः सर्वभूतैर्विभाति विजानन्विद्वान्भवतेनातिवादी। आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः मुण्डो. ३।१।४
प्राणो ह्येष सर्वभूतैर्विभाति (मा.पा.) मुण्डो. ३।१।४
प्रातरधीयानो रात्रिकृतं पापं नाशयति [अ. मा. ७+नारा.५+ देव्यु. २६
प्रातरादित्यमुपतिष्ठते-दिशामेकपुण्डरीकमस्यहं मनुष्याणामेकपुण्डरीकं भूयासमिति बृह. ६।३।६
प्रातर्मध्यन्दिने सायमर्धरात्रे च (तु) कुम्भकान्। शनैरशीतिपर्यन्तं चतुर्वारं समभ्यसेत् [त्रि.ब्रा.२।१०१+ [शाण्डिल्यो. १।७।२ यो. त. ४३
प्रातर्मध्याह्नयोः षण्मासकृतानि पापानि नाशयति गायत्रीर.११
प्रातश्चित्रादिवर्णाखण्डसूर्यचक्रवद्वह्निज्वालावलीवत्तद्विहीनान्तरिक्षवत्पश्यति अद्वयता. ४
प्रातःकाले च पूर्वैरुर्यद्भक्तैः प्रार्थितं मुहुः। तत्रैवं प्राक्प्रणीतंस्यात्स्थितिं कुर्यात्तथापि वा १सं.सो.२।६७
प्रातः प्रसाधनं दत्त्वा कार्यं सम्मार्जनाञ्जनम्। शिवो. ७।२४
प्रातः स्नात्वा विधानेन सन्ध्याकर्म समाप्य च। भूतिरुद्राक्षभरण उदीचीं दिशमाश्रयेत् २ बिल्वो.७
प्रातःस्नानोपवासादिकायक्लेशांश्च वर्जयेत् १यो.त. ४८
प्रादक्षिण्याद्दारिद्र्यनाशिनीं प्राणतर्पणादन्तर्मलनाशिनीं य एवं वेद स वैष्णवो भवति तुलस्यु. २
प्रादुर्भावश्च भूतानां देहत्यागस्तथैव च। प्राप्तिव्यायामयोगश्च विधानमनुवर्तते भवसं. १।११
प्रादुर्भूतोसुराष्ट्रेऽस्मिन् [श्रीसू.७+ऋ. खि.५।८।७७
प्राधान्यतः कुरुश्रेष्ठ भ.गी.१०।१९

प्राधान्येनात्र भेद एव, स भेदः वस्तुतस्त्वभेद एव — त्रि.म.ना.२।२

प्राप्तकर्मकरो नित्यं शत्रुमित्रसमान- दृक् । ईहितानीहितैर्मुक्तो न शोचति न काङ्क्षति — महो. ६।६४

प्राप्तं प्राप्तव्यमखिलं भवता पूर्णचेतसा । स्वरूपे तपसि ब्रह्मन्मुक्तस्त्वं भ्रान्तिमुत्सृज — महो. २।७२

(एवं) प्राप्तानन्दः परमयोगी भवति — मं. ब्रा. २।९

प्राप्तानुत्तमविश्रान्तिर्न किञ्चिदिह वाञ्छति — महो. २।४७

प्राप्तुं तत्सहजस्वभावमनिशं सेवध्व- मेकं गुरुम् — अमन. २।४१

प्राप्ते ज्ञानेन विज्ञाने ज्ञेयेच परमात्मनि ...हृदि संस्थिते — ...

प्राप्नुयात् पुण्यकर्मणाम् — भ.गी.१८।७१

प्राप्य चान्ते ततश्चैव ज्ञानयोगमनुत्त- मम् । अविरोधेन धर्मस्य सञ्चरेत् पृथिवीमिमाम् — ना.प. ६।३३

प्राप्य ज्ञानदशामेतां पशुम्लेच्छादयो- ऽपि ये । सदेहा वाऽप्यदेहा वा ते मुक्ता नात्र संशयः — महो. ५।३९

प्राप्यन्ते मां न पुनरावर्तन्ते — भस्मजा. २।७

प्राप्य पुण्यकृताँल्लोकान् — भ.गी. ६।४१

प्राप्य सर्वज्ञतां कृत्स्नां ब्राह्मण्यं पद- मद्वयम् । अनापन्नादिमध्यान्तं किमतः परमीहते — अ.शां. ८५

प्राप्यं सम्प्राप्यते येन भूयो येन न शोच्यते । पराया निर्वृतेः स्थानं यत्तज्जीवितमुच्यते — महो. ३।१२

प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम् । तस्माल्लोकात्पुनरैति.. — बृह. ४।४।६

प्रायश्चित्तीयस्त्वधस्तात्तिर्यक्तिस्रो हिमांशुप्रभाभिः प्रजननकर्मा(अग्निः) — प्रा.हो. २।४

प्रायेण श्रीमतां लोके भोक्तुं शक्तिर्न विद्यते — भवसं. १।१३

प्रारब्धकर्मपर्यन्तमहिनिर्मोकव- -द्व्यवहरति — पैङ्गलो. ४।४

प्रारब्धकल्पनाप्यस्य देहस्य भ्रान्तिरेव हि — अध्यात्मो.५७

प्रारब्धनाशात्प्रतिभाननाशः.. — वराहो. २।६९

प्रारब्धप्रतिभासनाशपर्यन्तं चतुर्विधं स्वरूपं ज्ञात्वा देहपतनपर्यन्तं स्वरूपानुसन्धानेन वसेत् — ना. प. ७।३

प्रारब्धमसतः कुतः — अध्यात्मो. ५८

प्रारब्धं सिद्ध्यति तदा यदा देहात्मना स्थितिः । देहात्मभावो नैवेष्टः प्रारब्धं त्यजतामतः — अध्यात्मो.५६

प्रारब्धागाम्यर्जितानिकर्मत्रयमितीरितम् — वराहो. १।१२

प्रारब्धान्ते देहहानिर्मायेति क्षीयतेऽखिला — वराहो. १।७१

प्रावृट्कालप्रारम्भे यथा मण्डूकादीनां प्रादुर्भावस्तद्वत्सर्वात्मना नष्टाया अविद्याया उन्मेषकाले पुनरुद्भवो भवति — त्रि.म.ना.५।१

प्राश्याचम्यायं निभिरथवा परिव्राड्वि- वर्णवासामुण्डोपरिग्रह:शुचिरद्रोही भैक्षमाणो ब्रह्मभूयाय भवति — याज्ञव. २

प्रास्मा आशा अशृण्वन् — चित्यु. १५।२

प्राहुस्त्यागं विचक्षणाः — भ. गी. १८।२

प्रियमित्येनदुपासीत — बृह. ४।१।३०

प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते — छां. ५।१२।२ ५।१३।२+१४।२।+१५।२+१६।२+ १७।२

प्रियं ब्रुवाणं ब्रूयात्प्रियꣳरोत्स्यतीतीश्वरो ह तथैव स्यात् — बृह. १।४।८

प्रियः प्रियायार्हसि देव सोढुम् — भ.गी.११।४४

प्रिया च मानसी, प्रतिरूपा च चाक्षुषी — कौ.त. १।३

प्रियात्मजनन-वर्धन-परिणाम-क्षय- नाशाः षड्भावाः — मुद्गलो. ४।२

प्रियाप्रिये न स्पृशतस्तथैव च शुभा- शुभे । तमसा ग्रस्तवद्भानादग्रस्तो- ऽपि रविर्जनैः — आत्मो. १५

प्रिया बतारे नः सती प्रियं भाषसे — बृह.२।४।४

प्रिया वै खलु नो भवति सती प्रियमवृधत् — बृह. ४।५।५

प्रियां वाचमभिवदन्त्योऽर्चयन्त्य एष वः पुण्यः सुकृतो ब्रह्मलोकः मुण्ड. १।२।६
प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम् । विसृज्य ध्यानयोगेन ब्रह्माप्येति सनातनम् ना.प.३।५१
प्रियो हि ज्ञानिनोऽत्यर्थं भ.गी.७।१७
प्रियो हैव भवति स्मरन्ति हैवास्य कौ.त.२।४
प्रीतिः प्रीत्या भवति सामर.९९
प्रेतान् भूतगणांश्चान्ये भ.गी.१७।४
प्रेत्यास्माल्लोकादमृता भवन्ति केनो. २।५
प्रेत्येन्द्रो भूत्वैषु लोकेषु राजति १ऐत. ३।७।२
प्रेमानन्द एव सृष्टिस्त्वाधिदैविकी सामर. ३९
प्रेमानन्दमनुभवन्तो भक्तास्तल्लीलोपयोग्या भवन्ति सामर. ९२
प्रेयो मन्दो योगक्षेमौ वृणीते कठो. २।२
प्रेरयेद्वा तथा भिक्षुः स्वप्नेऽपि न कदाचन ना.प.४।९
प्रेहामृतस्य यच्छतामेतद्वृद्धकमोचनम् सहवै. ९
प्रेहि तु तत्र प्रतीत्य ब्रह्मचर्यं वत्स्याव इति भवानेव गच्छत्विति बृह. ६।२।४
प्रैहि तु तत्र प्रतीत्य ब्रह्मचर्यं वत्स्यावः (मा. पा.) बृ.उ.६।२।४
प्रोक्तमादित्यमाहात्म्यं यन्मां त्वमनुपृच्छसि सूर्यता.१।१०
प्रोक्तवानहमव्ययम् भ.गी.४।१
प्रोक्तं क्वचिद्द्वितेति क्वचिदिच्छेति सम्मतम् महो.५।१३२
प्रोक्ता च सात्त्विकी रुद्रे भक्ते ब्रह्मणि राजसी कृष्णो. ४
प्रोच्यते गुणसङ्ख्याने भ.गी.१८।१९
प्रोच्यमानमशेषेण भ.गी.१८।२९
प्रोता त्वमेता विचितिः क्रमाणां प्रजापतिश्छन्दमयो विगर्भः एका. उ. ९
प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् मुंड.१।२।१३
(अथ) प्रोष्याऽऽयन् पुत्रस्य मूर्धानमभिमृशति कौ.त. २।११
प्लवद्वाचरणम् निर्वाणो. ८
प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म मुण्ड. १।२।७
प्लावयेद्योगमार्गेण सोऽमृतत्वाय कल्पते क्षु.जा. २।१७
प्लुतप्रणवप्रयोगेण समस्तमोमिति प्रयुक्त आत्मज्योतिः सकृदावर्तते अ.शिखो. १
प्लुतप्लुत्युपसंहारः तुरीयो. १

फ

फट्फट् जहि महाकृत्ये विधूमाग्निसमप्रभे । हन शत्रूंस्त्रिशूलेन कुद्धास्ये पिब शोणितम् वनदु. ९४
फलपत्रोदकाहारः पर्वतवनवनदेवतालयेषु सञ्चरेत् ना.प. ४।४८
फलमुद्दिश्य वा पुनः भ.गी.१७।२१
(पुरुषः) फलमूलोदकान्वितं तपोवनं प्राप्य... फलमूलपुष्पवारिभिः... वेदान्तश्रवणं कुर्वन्योगं समारभेत् शांडि. १।५।१
फलविशुद्धाङ्गी सन्न्यासं सहतेऽर्चिमान् २सन्न्यासो. ६
फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकृत् । न नामग्रहणादेव तस्य वारि प्रसीदति भवसं. १।५०
फलं त्यक्त्वा मनीषिणः भ.गी. २।५१
फलं यज्ञतपःक्रियाः भ.गी.१७।२५
फलादुत्पद्यमानःसन्नतेहेतुःप्रसिद्ध्यति अ. शां. १७
फलानां पुरुषः, पुरुषस्य रेतः बृह. ६।४।१
फले सक्तो निबध्यते भ.गी. ५।१२
फलोदयः क्रियापूर्वो निष्क्रियो नहि कुत्रचित् अध्यात्मो.४९
फलो वा एष लोकानामजरो महात्मा विश्वं यः पाति पारमा. ८।२
फालोर्द्ध्वगललाटविशेषमण्डले निरन्तरं तेजस्तारकयोगविस्फुरणेन पश्यति चेत् सिद्धो भवति अद्वयता. २
फेनपा उन्मादकाः शीर्षपर्णफलभोजिनो यत्र तत्र वसन्तोऽपरिचरणं कृत्वा...आत्मानं प्रार्थयन्ते आश्रमो. ३
फेनादण्डं भवत्यण्डाद्ब्रह्मा भवति [अ. शिरः. ३।१५+ बटुको. २७
फेनाद्बुद्बुदमभवत् । अण्डाद्ब्रह्माऽभवत् गायत्रीर. १

ब

बटरकाणि सम्पतन्तीव दृश्यन्ते तानि तदा न पश्येत्तदप्येवमेव विद्यात् ३ऐत. २।४।६
बटुको हि शाश्वतेन पुराणेन वेषमूर्जेण तपसा नियन्ता बटुको. २३
बदरीफलमात्रं तु (रुद्राक्षस्य) मध्यमं प्रोच्यते बुधैः । अधमं चणमात्रं स्यात् ... रु.जा. ७
बद्धपद्मासनस्तिष्ठन्नर्धोन्मीलितलोचनः। ..स्पर्शान् परिहरञ्छनैः अ. पू. ३।४
बद्धपद्मासनं कृत्वा सरस्वत्यास्तु चालनम् । दक्षनाड्या समाकृष्य बहिष्ठं पवनं शनैः । यथेष्टं पूरयेद्वायुं.. योगकुं.१।२३
बद्धपद्मासनो योगी प्राणं चन्द्रेण पूरयेत् ..भूयः सूर्येण रेचयेत् यो. चू. ९५
बद्धपद्मासनो योगी नमस्कृत्य गुरुं शिवम् । नासाग्रदृष्टिरेकाकी प्राणायामं समभ्यसेत् यो. चू.१०६
बद्धमुक्तो महीपालो ग्रासमात्रेण तुष्यति । परैरबद्धो नाक्रान्तो न राष्ट्रं बहु मन्यते महो. ५।७४
बद्धः खेचरतां (रसः) धत्ते ब्रह्मत्वं रसचेतसि वराहो.२।७९
बद्धः सुनादगन्धेन सद्यः संत्यक्तचापलः । नादग्रहणतश्चित्तमन्तरङ्गभुजङ्गमः ना. बिं. ४३
बद्धो मुच्येत बन्धनात् सूर्यता.१।१३
बद्धो मुक्तोऽहमद्भुतात्माऽहम् आ. प्र. १०
बद्धो हि वासनाबद्धो मोक्षः स्याद्वासनाक्षयः मुक्ति. २।६८
बध्नन्कराभ्यां श्रोत्रादि करणानि यथातथम् । युञ्जानस्य यथोक्तेन वर्त्मना स्ववशं मनः त्रि.ब्रा.२।११६
बध्नाति हि शिरोजातमधोगामि नभोजलम् । ततो जालन्धरो बन्धः कष्टदुःखौघनाशनः यो. चू. ९०
बध्वा प्रागासनं विप्रो ऋजुकायः समाहितः । नासाग्रन्यस्तनयनः त्रि.ब्रा.२।९२
बध्वा योगासनं पूर्वं हृद्देशे हृदयाञ्जलिः त्रि.ब्रा.२।१४५
बन्धत्वमपि चेन्मोक्षो बन्धाभावे क मोक्षता ते.बिं. ५।२४
बन्धनस्थस्येवास्वातंत्र्यं, यमविषयस्थस्येव बहुभयावस्थम् मैत्रा. ४।२
बन्धमुक्तिविहीनोऽहंशाश्वतानन्दविग्रहः ते. बिं. ३।३७
बन्धमुद्रा कृता येन नासाग्रे तु स्वलोचने ब्र. वि. ६९
बन्धमोक्षस्वरूपात्मा बन्धमोक्षविवर्जितः ते.बिं. ४।६६
बन्धमोक्षादिकं नास्ति सद्वाऽसद्वा सुखादि वा ते. बिं. ५।३८
बन्धमोक्षादिहीनोऽस्मि शुद्धब्रह्मास्मि सोऽस्म्यहम् मैत्रे. ३।९
बन्धमोक्षौ न चात्मनि २आत्मो. २९
बन्धं कुर्वन्ति धातवः अमन. १।३७
बन्धं मोक्षं च या वेत्ति भ.गी.१८।३०
बन्धाय विषयासक्तं मुक्तं (मुक्त्यै, मुक्ता) निर्विषयं स्मृतम् (मनः) [ब्र. बिं. २+ मैत्रा. ४।१७+ अमन. २।७५
बन्धास्थामथ मोक्षास्थां सुखदुःखदशामपि । त्यक्त्वा सदसदास्थां त्वं तिष्ठाक्षुब्धमहाब्धिवत् महो. ६।५३
बन्धुपुत्रमनुमोदयित्वाऽनवेक्ष्यमाणो द्वन्द्वसहः प्रशान्तः । प्राचीमुदीचीं वा निवर्तयंश्चरेत शाट्याय. १८
बन्धुरात्माऽऽत्मनस्तस्य भ. गी. ६।६
बन्धो जालन्धराख्योऽयममृताप्यायकारकः यो.त.१।१११
बन्धोजालंधराख्योऽयंमृत्युमातङ्गकेसरी १यो.त. ११९
बन्धो मोक्षः सुखं दुःखं ध्यानं चित्तं सुरासुराः । गौणं मुख्यं परं चान्यत् सर्वं मिथ्या न संशयः ते.बिं. ५।४४
बभ्रुश्च बभ्रुकर्णश्च नीलग्रीवश्चयःशिवः नीलरु. ३।२
बभ्रम्यमाणमिव चाकश्यमानमिव जाज्वल्यमानमिव देदीप्यमानमिव लेलिह्यानं तदेव मे ब्रह्म आर्षे. ५।२

बर्हापीडाभिरामाय रामायाकुण्ठमेघसे।
रमामानसहंसाय गोविन्दाय
नमो नमः गो. पू. ४।७
बलमिति विद्युति तैत्ति.३।१०।२
बल्लवीवदनाम्भोजमालिने नृत्तशालिने।
नमः प्रणतपालाय श्रीकृष्णाय
नमोनमः गो.पू. ४।१०
बलं ज्ञानं सुराणां वै तेषां
ज्ञानं हृतं क्षणात् कृष्णो. १२
बलं देवानाममृतस्य विष्णोः सुदर्श. ६
बलं बलवतां चाहं भ.गी. ७।११
बलं वाव विज्ञानाद्भूयोऽपि ह
शतं विज्ञानवतामेको बलवा-
नाकम्पयते छान्दो.७।८।१
बलं भीमाभिरक्षितम् भ.गी. १।१०
बलं भीष्माभिरक्षितम् भ.गी. १।१०
बलंवावविज्ञानाद्भूयोऽपीहशतं (मा.पा.) छां.उ. ७।८।१
बलात्कामपिशाचेन विवशः परिभूयते महो. ३।३४
बलादिव नियोजितः भ.गी. ३।३६
बलाद्वाव भूयोऽस्तीति तन्मे भगवान्
ब्रवीतु छांदो. ७।८।२
बलेचित्तसंयमाद्धनुमदादिबलम शांडि.१।७।५२
बलेन तपः, तपसा श्रद्धा (भवति) महाना.१७।१३
बलेन पर्वताः (तिष्ठन्ति) छांदो.७।८।१
बलेन लोकस्तिष्ठति, बलमुपास्व छांदो. ७।८।१
बलेनापःपर्वताबलेनदेवमनुष्याः(मा.पा.) छां.उ. ७।८।१
बलेन वै पृथिवी तिष्ठति, बलेनान्तरिक्षं
बलेन द्यौर्बलेन पर्वता बलेन देव-
मनुष्या बलेन पशवश्च वयांसि च
तृणवनस्पतयः श्वापदान्याकीटपिपी-
लकंबलेनलोकस्तिष्ठतिबलमुपास्वेति छांदो.७।८।१
बलेन वै लोकास्तिष्ठन्ति (मा. पा.) छां.उ. ७।८।१
बस्तिस्ते व्यभत्स्यद्यन्मां नागमिष्य इति छांदो.५।१६।२
बस्तिस्त्वेव आत्मन इति होवाच छांदो.५।१६।२
बहव इमेऽस्मिन्पुरुषे कामा नाना-
त्यया व्याधिभिः परिपूर्णोऽस्मि
नाशिष्यामीति छांदो.४।१०।३
बहवो ज्ञानतपसा भ.गी. ४।१०
बहवो नैकमार्गेण प्राप्ता नित्यत्वमागताः अ. वि.२५
बहवो मर्या ब्राह्मणायना निरिन्द्रिया
विसुकृतोऽस्माल्लोकात्प्रयन्ति बृह.६।४।४
बहिरङ्गा जगत्कारणभूता सैवाविद्या-
रूपेण जीवबन्धभूता क्रिया शक्तिश्च
लीलाशक्तिश्चरति शाक्तिको. ९
बहिरन्तश्च भूतानां भ.गी.१३।१६
बहिरन्तश्चोपवीती विप्रः सन्न्यस्तुमर्हति।
एकयज्ञोपवीती तु नैव सन्न्यस्तुमर्हति परब्र. २०
बहिरस्तङ्गते प्राणे यावन्नापान उद्गतः।
तावत्पूर्णां समावस्थां बहिष्ठं
कुम्भकं विदुः मुक्तिको.२।५२
बहिरुपशमिते चराचरात्मा स्वयमनु-
भूयत एव देवदेवः अ.पू.१।५५
बहिर्मायया वेष्टितं भवति चक्रं नृ. पू. ५।३
बहिर्लक्ष्यं तु नासाग्रे चतुष्षडष्टदश-
द्वादशाङ्गुलीभिः... व्योमत्वं
पश्यति स तु योगी मं. ब्रा. १।३
बहिर्विरेचनं वायोरुदराद्रेचकः स्मृतः जा. द.६।१३
बहिश्चेतो गृहीतं सदृष्टं वैतथ्यमेतयोः वैतथ्य. ९
बहिश्चेतो गृहीतं सद्युक्तं वैतथ्यमेतयोः वैतथ्य. १०
बहिस्तीर्थात्परं तीर्थमन्तस्तीर्थं
महामुने। आत्मतीर्थं महा-
तीर्थमन्यत्तीर्थं निरर्थकम् जा.द. ४।५३
बहिः कुर्वन्नकुर्वन्वा कर्ता भोक्ता
नहि कश्चित् अ. पू. १।५७
(अथ) बहिःकृतेन्द्रियार्थान्स्वशरीरा-
दुपलभते मैत्रा. ६।८
बहिः कृत्रिमसंरम्भो हृदि संरम्भ-
वर्जितः। कर्ता बहिरकर्तान्तर्लोके
विहर शुद्धधीः महो. ६।६८
बहिः प्रज्ञो विभुर्विश्वो ह्यन्तः-
प्रज्ञस्तु तैजसः आगम. १
बहिः प्रपञ्चशिखोपवीतित्वमनादृत्य
प्रणवहंसशिखोपवीतित्वमवलम्ब्य
मोक्षसाधनं कुर्यात् परब्र. २२
बहिःसर्वसमाचारो लोकेविहर विज्वरः महो. ६।६७

बहिःसूत्रं त्यजेद्विद्वान्योगमुत्तम-
मास्थितः । ब्रह्मभावमिदं सूत्रं
धारयेद्यः स चेतनः [ब्रह्मो. ९+ ना. प. ३।८०
बहिःसूत्रं त्यजेद्विप्रो योगविज्ञान-
तत्परः । ब्रह्मभावमिदं सूत्रं
धारयेद्यः स मुक्तिभाक् परब्र. ११
बहुधा विश्वतोमुखम् भ.गी. ९।१५
बहुनाऽत्र किमुक्तेन गोपीचन्दन-
मण्डनम् । न तत्तुल्यं भवेल्लोके
नात्र कार्या विचारणा गोपीचं. २१
बहु वा इद९ सुप्तस्य वा जाग्रतो
वा रेतः स्कन्दति बृह. ६।४।४
बहुशाखा ह्यनन्ताश्च भ.गी. २।४१
बहुशास्त्रकथाकन्थारोमन्थेन वृथैव
किम् । अन्वेष्टव्यं प्रयत्नेन मारुते
ज्योतिरान्तरम् मुक्ति. २।६३
बहुशोभमानामुमां हैमवतीं ता९होवाच
किमेतद्यक्षमिति केनो. ३।१२
बहुस्यां प्रजायेय [छां.उ.६।२।३+
[तैत्ति. २।६+ शांडि.३।१।३
बहूदकस्य स्वर्गलोकः [ना.प.५।९+ १सं.सो.२।५९
बहूदकस्यासंकॢप्तं माधुकरम् ना. प. ५।७
बहूदकः शिखादिकन्थाधरस्त्रिपुण्ड्र-
धारी कुटीचकवत्सर्वसमो मधुकर-
वृत्त्याष्टकवलाशी [ना.प.५।५+ १सं.सो.२।१४
(अथ) बहूदका नाम त्रिदण्ड-कम-
ण्डलु-शिखा-यज्ञोपवीत-काषाय-
वस्त्रधारिणो ब्रह्मर्षिगृहे मधुमांसं
वर्जयित्वाऽष्टौ ग्रासान्भैक्षाचरणं
कृत्वा योगमार्गे मोक्षमेव प्रार्थयन्ते भिक्षुको. २
बहूदकास्त्रिदण्डकमण्डलुशिक्यपक्ष-
जलपवित्रपात्रपादुकासनशिखा-
यज्ञोपवीत-कौपीन-काषायवेष-
धारिणः साधुवृत्तेषु ब्राह्मणकुलेषु
भैक्षाचर्यं चरन्त आत्मानं प्रार्थयन्ते आश्रमो. ४
बहूदको हंसत्वमवलम्ब्य...तुरीयाती-
तावधूतवेषेणाद्वैतनिष्ठापरः प्रण-
वात्मकत्वेन देहत्यागं करोति यः
सोऽवधूतः तुरीया. ३
बहूदरं बहुदंष्ट्राकरालं भ.गी.११।२३
बहूनामेमि प्रथमो बहूनामेमि मध्यमः ।
कि९ स्विद्यमस्य कर्तव्यं यन्मयाऽद्य
करिष्यति कठो. १।५
बहूनि पुण्यानि कृतानि येन तेनैव
लभ्यः परमेश्वरोऽसौ शरभो. २
बहूनि मे व्यतीतानि भ.गी.४।५
बहून्यदृष्टपूर्वाणि भ.गी.११।६
बह्वश्वामिन्द्रगोमतीम् त्रिस्यु.११।६,
बह्वहंचरन्ती परिचरन्ती परिचारिणी
यौवने त्वामलभे साऽहमेतन्न वेद
यद्गोत्रस्त्वमसि जबाला तु नामाऽह-
मस्मि सत्यकामो नाम त्वमसि छांदो.४।४।२
बह्वीं प्रजां जनयन्तीं९ सरूपाम् ।
अजो ह्येको जुषमाणोऽनुशेते महाना.८।४५
बह्वीः प्रजा असृजत् मैत्रा. २।६
बह्वीः प्रजा पुरुषात्सम्प्रसूताः मुण्ड. २।१।५
बह्वीः सत्या अतिक्रम्य दिवि प्रह्लादीन-
तृणबहमन्तरिक्षे पौलोमान्पृथिव्यां
कालकाश्यांस्तस्य मे तत्र न लोम
च नामीयते कौ. त. ३।१
बह्वृचाख्यब्रह्मविद्यामहाखण्डार्थ-
वैभवम् । अखण्डानन्दसाम्राज्यं
रामचन्द्रपदं भजे बृह्वृच.शीर्षक
ब्रह्वयः स्याम प्रजायेमहि छांदो.६।२।४
बाधिर्यं महानुपचय इवेदं नावहेलनया।
भवितव्यमेवं दृढवैराग्याद्बोधो भवति महो. ४।२६
बालस्वभावोऽसङ्गो निरवद्यो मौनेन
पाण्डित्येन निरवधिकारतयो-
पलभ्येत कैवल्यमुक्तं निगमनं सुबालो.१३।१
बालं प्रमाद्यन्तं वित्तमोहेन मूढं कठो.२।६
बालाग्रमात्रं हृदयस्य मध्ये विश्वं देवं
जातरूपं वरेण्यम् । तमात्मस्थं येऽनु-
पश्यन्ति धीरास्तेषां शान्तिर्भविता
नेतरेषाम् बटुको. १
बालाश्च कुलवृद्धाश्च निर्दहन्त्यवमानिताः इतिहा. २१
बालैर्बद्धस्तु लोकोऽयं मुसलेनाभिहन्यते शिवो.७।१०४

बालोन्मत्तपिशाचवद्दुन्मत्तोन्मत्त-
बदाचरंस्त्रिदण्डं शिक्यं पात्रं
कमण्डलुं कटिसूत्रं कौपीनं च
परित्यज्य...जातरूपधरश्चरेदा-
त्मानमन्विच्छेत् ना. प.३।८७

बालोन्मत्तपिशाचवन्मरणं जीवितं वा
न काङ्क्षेत कालमेव प्रतीक्षेत निर्देश-
भृतकन्यायेन परिव्राडिति ना.प. ५।१५

बालो बालेषु वृद्धेषु वृद्धो धीरेषु धैर्य-
वान्। युवा यौवनवृत्तेषु दुःखितेषु
सुदुःखधीः अ.पू.२।३०

बाल्यमल्पदिनैरेव यौवनश्रीस्ततो
जरा। देहेऽपि नैकरूपत्वं काऽऽस्था
बाह्येषु वस्तुषु भवसं. १।२१

बाल्यं च पाण्डित्यं च निर्विद्याथ-
मुनिरमौनं मौनं च निर्विद्य... बृह. ३।५।१

बाल्येन तिष्ठासेत् सुबालो.१३।१

बाल्येनैवहितिष्ठासेन्निर्विद्यब्रह्मवेदनम्।
ब्रह्मविद्यां च बाल्यं च निर्विद्य...
मुनिरात्मवान् [अ. पू. ४।३८+ शाट्याय. २४

बाहू राजन्यः कृतः [ऋक्सं. मं.१०।९०।१२
[वा.सं. ३१।११+सुबा.१।४+ चित्यु. १२।५

बाह्यचिन्ता न कर्तव्या तथैवान्तर-
चिन्तिका। सर्वचिन्तां परित्यज्य
चिन्मात्रपरमो भव।(सर्वचिन्तां समु-
त्सृज्य स्वस्थो भव सदा ऋभो)
[शांडि. १।७।२०+ वराहो.२।४४

बाह्यज्ञाने विनष्टे च ततः सर्वसमो भवेत् अमन. १।२१

बाह्यप्रणव आर्षप्रणवः, उभयात्मको
विराट्प्रणवः ना. प. ८।१

बाह्यवदान्तरेऽप्यात्मनश्चक्षुःसंयोगेनैव
रूपग्रहणकार्योदयात् अद्वयता. ६

बाह्यस्थविषयं सर्वं रेचकः समुदाहृतः।
पूरकं शास्त्रविज्ञानं कुम्भकं
स्वगतं स्मृतम् वराहो. ५।५८

बाह्यस्पर्शेष्वसक्तात्मा भ. गी. ५।२१

बाह्यस्याभ्यन्तरे कालानलसदृशं
पराकाशम् मं.ब्रा. ४।१

बाह्यं प्राणं समाकृष्य पूरयित्वोदरेण
च। नासाग्रे नाभिमध्ये च पादा-
ङ्गुष्ठे च धारयेत् जा.द. ६।२२

बाह्यात्प्राणं समाकृष्य पूरयित्वोदरे
स्थितम्। नाभिमध्ये च नासाग्रे
पादाङ्गुष्ठे च यत्नतः। धारये-
न्मनसा प्राणं सन्ध्याकालेषु वा
सदा। सर्वरोगविनिर्मुक्तो भवेद्योगी.. शां. १।७।४३

बाह्यात्माऽन्तरात्मा परमात्मा च १ आत्मो. १

बाह्यादापूरणं वायोरुदरे पूरको हि सः जा.द. ६।१२

बाह्यान्ततारकाकारं व्योमपञ्चक-
विग्रहम्। राजयोगैकसंसिद्धं
रामचन्द्रमुपास्महे मं.ब्रा. शीर्षकं

बाह्याभ्यन्तरमन्धकारमयमाकाशम् मं. ब्रा. ४।१

बाह्याभ्यन्तरवीक्षणाद्विस्फुटतमः स
परस्ताद्भूतैव दृष्टोऽदृष्टोऽव्यवहार्यो-
ऽप्यलपोनाल्पःसाक्ष्यविशेषोऽनन्यो
सुखदुःखोऽद्वयः परमात्मा नृसिंहो. ९।७

(एवं) बाह्याभ्यन्तरस्थव्योमपञ्चकं
तारकलक्ष्यम् अद्वयता. ४

बाह्याभ्यन्तःकरणानां रूपग्रहण-
योग्यतास्त्वित्याबाहनम् भावनो. ८

बाह्यार्चनं परिहरेदपुनर्भवाय मैत्रे. २।२६

बाह्यार्थवासनोद्भूता तृष्णा बद्धेति
कथ्यते। सर्वार्थवासनोन्मुक्ता
तृष्णा मुक्तेति भण्यते महो. ६।५०

बाह्वोः क्षत्रं (अजायत) ग. शो. ३।११

बिन्दुनादकलाज्योतीरवीन्दुध्रुव-
तारकम्। शान्तं च तदतीतं
च परं ब्रह्म तदुच्यते यो.शि. ६।८६

बिन्दुनादसमायुक्तमग्निबीजं विचिन्त-
येत्। पश्चाद्विरेचयेत्सम्यक्प्राणं.. जा. द. ५।८

बिन्दुनादमहालिङ्गविष्णुलक्ष्मीनि-
केतनम्। देहं विष्ण्वालयं प्रोक्तं
सिद्धिदं सर्वदेहिनाम् यो.शि. ९।४

बिन्दुनादात्मकं बीजं वह्निसोम-
कलात्मकम् रामर. ५।९

बिन्दुमूलशरीराणि शिरास्तत्रप्रतिष्ठिताः यो. चू. ५६

बिन्दुरीशानः ना.पू.ता.१.३

बिन्दुरीश्वरसंज्ञस्तु शत्रुघ्नश्चक्रराट्स्वयं तारसा. २।३
बिन्दुरुत्तररूपम् गणप. ७
बिन्दुर्ब्रह्मा रजः शक्तिर्बिन्दुरिन्दू रजो रविः। उभयोः सङ्गमादेव प्राप्यते परमं पदम् यो.चू. ६२
बिन्दुस्तुरीयाक्षरो भवति ता.सा. २।१
बिन्दुस्वरूपः शत्रुघ्नो भूर्भुवस्तस्मै वै नमोनमः तारसा. ३।४
बिन्दुः क्षरतिनो यस्य कामिन्यालिङ्गितस्य च। यावद्बिन्दुः स्थितो देहे तावन्मृत्युभयं कुतः ध्या.बि. ८४
बिन्दुः पञ्चमकूटाक्षरो भवति श्रीवि.ता.१।२
बिन्दुः पञ्चमाक्षरो भवति रामो. १।२
बिन्दुः शिवो रजः शक्तिर्बिन्दुरिन्दू रजो रविः ध्या.बि. ८८
बिन्दोरोङ्कारः सीतो. ११
बिन्दौ स्वप्नविश्वो नादे स्वप्नतैजस. प. हं. १०
बिभर्त्यव्यय ईश्वरः भ.गी.१५।१०
बिभर्मि धर्ममवसे जनानाम् बा. मं. १२
बिभेमि वा एतदेतेभ्यो यथैतत्पराङ्मुखन् शौनको. १।३
बिभ्रच्छ्रियं यशः सत्यं ब्रह्मचर्यं तपो वैराग्यं मन ऐश्वर्यंसप्रणवाव्याहृतय ऋग्यजुःसामाथर्वाङ्गिरसः सर्वाणि छन्दांसि तान्यङ्गे समाश्रितानि महो. १।३
बिभ्रत्याकाशाधारम् निर्वाणो. ५
बिलप्रवेशतो यत्र ब्रह्मनाड्यन्तरं व्रजेत्। तस्मान्नित्यं मूलबन्धः कर्तव्यो योगिभिः सदा योगकुं.१।४६
बिल्वद्रुमस्यान्तिकमेवपूजकःप्रदक्षिणीकृत्य ततो मतुं स्वयम्। जपन्वितरितर्प्रमिताश्च शाखाश्छित्त्वा... दलानि भक्त्या चिनुयात् १बिल्वो. १२
बिल्वपत्रं विनापूजा व्यर्था भवति सर्वदा २बिल्वो. ६
बिल्वपत्रं विना वस्तु नास्ति किञ्चित्तवानघ २बिल्वो. १५
बिल्वपूजनतोलोकेमत्पूजायाःपरा नहि २बिल्वो. १९
बिसानि भक्षयति (दुःस्वप्ने) ३ऐत. २।४।७
बीजजाग्रत्तथा जाग्रन्महाजाग्रत्तथैव च। जाग्रत्स्वप्नस्तथास्वप्नः स्वप्नजाग्रत्सुषुप्तिकम्। इति सप्तविधो मोहः महो. ५।८
बीजनिद्रायुतः प्राज्ञः आगम. १३
बीजं तदहमर्जुन भ.गी.१०।३९
बीजं प्राणं च शक्तिं च दृष्टिं वश्यादिकं तथा। मन्त्रयन्त्राख्यगायत्रीप्राणस्थापनमेव च। भूतदिक्पालबीजानि यन्त्रस्याङ्गानि वै दश त्रि.म.ना.७।१२
बीजं मायाविनिर्मुक्तं परं ब्रह्मेति कीर्त्यते रामर.५।१२
बीजं मां सर्वभूतानां भ.गी. ७।१०
बीजाक्षरं परं बिन्दुं नादं तस्योपरि स्थितम्। सशब्दं चाक्षरे क्षीणे निःशब्दं परमं पदम् ध्या. बि. २
बीजाक्षरेण ल्हौ (ह्सौ) रूपेण तज्जापकानां सम्पत्सारस्वतौ भवतः हयग्री. ६
बीजाङ्कुराख्यो दृष्टान्तः सदा साध्यसमो हि सः अ. शां.२०
बीजाज्ञानमहामोहापह्नवाद्यद्विशिष्यते। निर्बीजं त्रैपदं तत्त्वं तदस्मीति विचिन्तये सुबा.शीर्षकं
बीजानीतराणि चेतराणि चाण्डजानि... ...
बीजोक्तमुभयार्थत्वं रामनामनि दृश्यते रामर. ५।११
बुद्धयो वै धियस्ता योऽस्माकं प्रचोदयादित्याहुर्मनीषिणः मैत्रा. ६।७
बुद्धयोऽव्यवसायिनाम् भ.गी.२।४१
बुद्धिकर्मेन्द्रियप्राणपञ्चकैर्मनसा धिया। शरीरं सप्तदशभिः सुसूक्ष्मं लिङ्गमुच्यते शारीरको.११
बुद्धिगुहायां सर्वाङ्गसुन्दरं पुरुषरूपमन्तर्लक्ष्यमित्यपरे मं. ब्रा. १।५
बुद्धिग्राह्यमतीन्द्रियम् भ.गी.६।२१
बुद्धिनाशात् प्रणश्यति भ.गी.२।६३
बुद्धिप्रतिबिम्बितचैतन्यं जीवा इत्यपरे मन्यन्ते त्रि.म.ना.४।९
बुद्धिमतामनायासेनाचिरादेव तत्त्वज्ञानं भवति त्रि.म.ना.८।४
बुद्धिमेवाप्येति यो बुद्धिमेवास्तमेति सुबालो.९।११

बुद्धियुक्तो जहातीह म.गी.२।५०
बुद्धियोगमुपाश्रित्य भ.गी.१८।५७
बुद्धियोगाद्धनञ्जय भ.गी.२।४९
बुद्धिरध्यात्मं, बोद्धव्यमधिभूतं, ब्रह्मा तत्राधिदैवतम्... सुबालो. ५।७
बुद्धिरव्यक्तमेव च भ.गी.१३।६
बुद्धिरुदानयोगेन चक्षुर्द्वारा रूपगुणः पादाधिष्ठितोऽग्नौ तिष्ठति.. त्रि. ब्रा.१।६
बुद्धिर्ज्ञानमसम्मोहः भ.गी.१०।४
बुद्धिर्धृतिः स्मृतिः प्रज्ञानमित्येके मैत्रा.६।३१
बुद्धिर्बुद्धिमतामस्मि भ.गी.७।१०
बुद्धिर्मनोऽहङ्कार इति चेतनवत्येषा मैत्रा. ६।५
बुद्धिर्यस्य न लिप्यते भ.गी.१८।१७
बुद्धिर्योगे त्विमां शृणु भ.गी.२।३९
बुद्धिर्वाऽअमव्यक्तमक्षादं सुबालो.१४।१
बुद्धिर्व्यतितरिष्यति भ.गी.२।५२
बुद्धिश्च बोद्धव्यं च नारायणः सुबलो. ६।१
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च [कठो. ३।३+ पैङ्गलो. ४।१
बुद्धिं मोहयसीव मे भ.गी.३।२
बुद्धिः पत्नी (शारीरयज्ञस्य) प्रा.हो.४।१
बुद्धिः पर्यवतिष्ठते भ.गी. २।६५
बुद्धिः सा पार्थ तामसी भ.गी.१८।३२
बुद्धिः सा पार्थ राजसी भ.गी.१८।३१
बुद्धिः सा पार्थ सात्त्विकी भ.गी.१८।३०
बुद्धीन्द्रियाणि यज्ञपात्राणि [गर्भो.११+ प्रा. हो.४।३
बुद्धीन्द्रियाणि यानीमान्येतान्यस्य रश्मयः मैत्रा. २।६
बुद्धेरात्मा महान्परः कठो. ३।१०
बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रोऽप्यपरोऽपि दृष्टः श्वेताश्व. ५।८
बुद्धेर्भेदं धृतेश्चैव भ.गी.१८।२९
बुद्धेःपूर्णविकासोऽयंजागरःपरिकीर्त्यते वराहो. २।६०
बुद्धौ शरणमन्विच्छ भ.गी. २।४९
बुद्ध्या धृतिगृहीतया भ.गी. ६।२५
बुद्ध्या बुद्ध्यति, मनसा सङ्कल्पयति, वाचा वदति गर्भो. १
बुद्ध्या युक्तो यया पार्थ भ.गी. २।३९
बुद्ध्या बुध्यति, चित्तेन चेतयत्यहङ्कारेणाहङ्करोति ना. प. ६।४
बुद्ध्या विशुद्धया युक्तः भ.गी.१८।५१
बुद्ध्या सञ्चितं स्थापयित्वा तु रुद्रे अ.शिरः. ३।९
बुद्ध्वाऽनिमित्ततां सत्यां हेतुं पृथगनाप्नुवन् । वीतशोकं तथा काममभयं पदमश्नुते अ. शां. ७८
बुद्ध्वा पदमनानात्वं नमस्कुर्मोयथाबलम् अ.शां. १००
बुद्बुदादिविकारान्तस्तरङ्गः सागरेयथा आ. प्र. १५
बुद्बुदादण्डमभवत् गायत्रीर. १
बुधा भावसमन्विताः भ.गी.१०।८
बुधो बालकवत्क्रीडेत्कुशलो जडवच्चरेत् । वदेदुन्मत्तवद्विद्वान्गोचर्यां नैगमश्चरेत् ना.प.५।३८
बृहच्च तद्दिव्यमचिन्त्यरूपं सूक्ष्माच्च तत्सूक्ष्मतरंविभाति [मुण्ड.३।१।७+ गुह्यका. ३७
बृहज्जाबालाभिधां मुक्तिश्रुतिं ममोपदेशं कुरुष्व बृ. जा. १।४
बृहज्ज्योतिःकरिष्यतः सविता प्रसुवातितान् श्वेताश्व.२।३
बृहज्ज्योतिषं त्वासादयामि चित्यु.१९।१
बृहतीमभिसम्पादयेदेष वै कृत्स्न आत्मा यद्बृहती १ऐत.३।५।३
(एवमेव) बृहती सर्वतः छन्दोभिः शरीरैः परिवृता १ऐत. ३।५।४
बृहत्तिथिर्दश पञ्चच नित्यासषोडशीकं पुरमध्यं बिभर्ति त्रिपुरो. १०
बृहत्पाण्डरवासः सोमराजन्निति कौ.त. ४।१८
बृहत्पाण्डरवासा अतिष्ठाः सर्वेषां भूतानां मूर्धेति कौ. त. ४।२
बृहत्पाण्डरवासाः सोमो राजेति वा बृह. २।१।३
बृहत्पाण्डुरवासाः सोमो राजेति (मा. पा.) बृ.उ. २।१।३
बृहत्साम तथा साम्नां भ.गी.१०।३५
बृहद्बृहद्वनं मधोर्मधुवनं तालस्तालवनं काम्यं काम्यवनं बहुला बहुलवनं कुमुदः कुमुदवनं खदिरः खदिरवनं भद्रो भद्रवनं भाण्डीर इति भाण्डीरवनं श्रीवनं लोहवनं वृन्दावनमेतैरावृता पुरी भवति (मथुरा) गोपालो.१।१६

बृहद्रथन्तरयो रूपेण संहिता सन्धीयते
  इति ताक्ष्यः — ३ऐत.१।६।१
बृहद्रथन्तरे अनूच्ये भद्रयज्ञायज्ञीये — कौ.त. १।५
बृहद्रथन्तरे सामनी पूर्वौ पादौ ध्यैत — कौ. त. १।५
(ॐ) बृहद्रथो (ह) वै नाम राजा
  राज्ये ज्येष्ठं पुत्रं निधापयित्वेदम-
  शाश्वतं मन्यमानः शरीरं वैराग्य-
  मुपेतोऽरण्यं निर्जगाम [मैत्रा.१।१ — +मैत्रे. १।१
बृहन् पाण्डरवासः सोमराजन्निति — बृह.२।१।१५
बृहस्पतिरुपवक्ता — चित्युप.२।१
बृहस्पतिर्वै शुक्रो भूत्वेन्द्रस्याभयाया-
  सुरेभ्यः क्षयायेमामविद्यामसृजत् — मैत्रा. ७।९
बृहस्पतिः पुरोधया — चित्यु. ८।२
बृहस्पते अति यदर्यो अर्हाद्युमद्विभाति
  क्रतुमज्जनेषु । यद्दीदयच्छवस ऋत
  प्रजात तदस्मासु द्रविणं धेहि चित्रम् — वनदु. ३१
  [ऋ.मं.२।२३।१५+वा.सं.२६।३
  [+तै. सं. १।८।२२।२
बृहस्पते न परः साम्नो विदुः — ३ऐत.१।५।४
बोद्धव्यमेवाप्येति यो बोद्धव्यमेवास्त्मेति — सुबालो. ९।१
बोद्धव्यं च विकर्मणा — भ.गी. ४।१७
बोद्धा भवति कर्ता भवति विज्ञाता
  भवत्यन्नमुपास्स्वेति — छांदो.७।९।१
बोधचन्द्रमसि पूर्णविग्रहे मोहराहुमु-
  षितात्मतेजसि । स्नानदानयजना-
  दिकाः क्रिया मोचनावधि वृथैव
  तिष्ठते — वराहो.२।७४
बोधयन्तः परस्परम् — भ.गी.१०।९
बोधयन्तीं त्वासादयामि — चित्यु.१९।१
बोधस्योपरतिः फलम् — अध्यात्मो.२८
बोधानन्दमयानन्तधूपदीपावलिभिरति-
  शोभितं...निरतिशयाद्वैतपरमा-
  नन्दलक्षणमादिनारायणं ध्यायेत् — त्रि.म.ना.७।१२
बोधानन्दमयानन्तपरमविलासविभूति-
  विशेषसमष्टिमण्डल..चिद्रूपादित्य-
  मण्डलं द्वात्रिंशद्व्यूहभेदैरधिष्ठितम् — त्रि.म.ना ७।८
बोधानन्दमयै-रनन्तनित्यपरिजनैः
  परिसेवितां श्रीसखीमेवं लक्ष्मीं
  ध्यात्वा...बोधानन्दवनं प्राप्य...
  यदेव ब्रह्मविद्यापादवैकुण्ठं सह-
  स्रानन्दप्राकारैः समुज्ज्वलति — त्रि.म.ना.६।८
बोधानन्दमयैरनन्तनित्यमुक्तैःपरिसेवितं — सि. सा. ६
बोधानन्दमहोज्वलम् — सि.सा. ६
ब्रह्मकर्मसमाधिना — भ गी. ४।२४
ब्रह्मकर्म स्वभावजम् — भ.गी.१८।४२
ब्रह्मकल्पवनामृतपुष्पवृष्टिभिः सन्तत-
  मानन्दं ब्रह्मानन्दरसनिर्भरैरसंख्यै-
  रतिमङ्गलं... निरतिशयाद्वैतपरमा-
  नन्दलक्षणमादिनारायणं... — त्रि.म.ना.७।१२
ब्रह्मकार्यमिति ज्ञात्वा ईशानं
  प्रतिपद्यते — पञ्चब्र. २२
ब्रह्म-कैवल्य-जाबाल-श्वेताश्वो हंस
  आरुणिः — मुक्ति. १।३१
ब्रह्मक्षत्रादिकं सर्वं यस्य स्यादोदनंसदा — पा. ब्र. ४४
ब्रह्मक्षत्रियवैश्यशूद्रा इति चत्वारो
  वर्णास्तेषां वर्णानां ब्राह्मण एव
  प्रधान इति वेदवचनानुरूपं
  स्मृतिभिरप्युक्तम् — व. सू. ख. २
ब्रह्म खल्विदं वाव सर्वम् — मैत्रा. ४।६
ब्रह्मग्रन्थिं ततो भित्वा विष्णुग्रन्थिं
  भिनत्त्यसौ । विष्णुग्रन्थिं ततो
  भित्त्वा रुद्रग्रन्थिं भिनत्त्यसौ — वराहो.५।६५
ब्रह्मग्रन्थिं ततो भित्त्वा विष्णुग्रन्थिं
  भिनत्त्यतः । रुद्रग्रन्थिं च भित्त्वैव
  कमलानि भिनत्ति षट् — यो.कुं. १।८५
ब्रह्मघ्नश्च कृतघ्नश्च गोघ्नश्चगुरुतल्पगः ।
  तेषां पापानि नश्यन्ति गोपी-
  चन्दनधारणात् — गोपीचं. ११
ब्रह्मचर्यमहिंसा च शारीरं तपउच्यते — भ.गी.१७।१४
ब्रह्मचर्यमहिंसांचसत्यास्तेयापरिग्रहान् ।
  सेवेत योगी निष्कामो योग्यतां
  स्वमनो नयन् — भवसं. ३।१६
ब्रह्मचर्यमहिंसां चापरिग्रहं च सत्यं च
  यत्नेन हे रक्षत हे रक्षतं... — आरुणि. ३
ब्रह्मचर्यमेव तद्यद्रात्रौ रत्या संयुज्यन्ते — प्रश्नो. १।१३
ब्रह्मचर्यशान्तिसंग्रहणम् — निर्वाणो. ८
(यदि वेतरथा) ब्रह्मचर्यादेव प्रव्रजेत्
  गृहाद्वा वनाद्वा — प. हं. प. १

ब्रह्मचर्यं नाम सर्वावस्थासु मनोवाक्कायकर्मभिः सर्वत्र मैथुनत्यागः शांडि. १।१।३
ब्रह्मचर्यं परिसमाप्य गृही भवेत् जाबालो. ४
ब्रह्मचर्यं भवति...। किं गोत्रोन्वहमस्मीति...[मा. पा.] छां.उ.४।४।१
ब्रह्मचर्यं भवति विवत्स्यामि किं गोत्रोऽहमस्मीति छांदो.४।४।१
ब्रह्मचर्यंमृत्पात्रंवाऽलाबुपात्रंदारुपात्रंवा आरुणि. ४
ब्रह्मचर्यं समाप्य गृही भवेत्। गृहाद्वनी भूत्वा प्रव्रजेत् [ना. प. ३।७७+ याज्ञव. १
ब्रह्मचर्यं समाप्य गृही भूत्वा वानप्रस्थाश्रममेत्य वैराग्यभावेऽप्याश्रमक्रमानुसारेण यः सन्न्यस्यति स कर्मसन्न्यासीति [१सं. सो. २।१३+ ना. प. ५।३
ब्रह्मचर्यापरिग्रहाहिंसासत्यं यत्नेन रक्षन् ...भैक्षमाणो ब्रह्मभूयाय भवति प. हं. प. ६
ब्रह्मचर्याश्रमे क्षीणे(खिन्नो)गुरुशुश्रूषणे रतः। वेदानधीत्यानुज्ञात उच्यते गुरुणाऽऽश्रमी [कुण्डिको. १।६+ २सन्न्यासो.२
ब्रह्मचर्याश्रमेऽधीत्यवानप्रस्थाश्रमेऽधीत्य सर्वसंविन्न्यासंसन्न्यासंसन्न्यासम् निर्वाणो. ८
ब्रह्मचर्येण सन्तिष्ठेदप्रमादेन मस्करी कठरु. ८
ब्रह्मचर्येण सन्न्यस्य सन्न्यासाज्जातरूपधरो वैराग्यसन्न्यासी ना. प. ५।३
ब्रह्मचर्येण हरन्ति देवाः पा. ब्र. ३
ब्रह्मचर्येण ह्येव यो ज्ञाता तं विन्दतेऽथ यदिष्टमित्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येवेष्ट्वात्मानमनुविन्दते छांदो.८।५।१
ब्रह्मचर्येण ह्येव सत आत्मनस्त्राणं विन्दतेऽथ यन्मौनमित्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येवात्मानमनुविद्य मनुते छांदो.८।५।२
ब्रह्मचर्ये भगवति वत्स्याम्युपयां भगवन्तमिति छां. ४।४।३
ब्रह्मचर्येण ह्येवात्मानमनुविन्दते छांदो.८।५।१
ब्रह्मचर्येण ह्येवात्मानमनु विद्य मनुते छां. ८।५।२
ब्रह्मचात्मानमोमित्येकीकृत्य तदेकमजरममृतमभय-मोमित्यनुभूय तस्मिन्निदंसर्वं त्रिशरीरमारोप्य तन्मयं हि तदेवेति संहरेत् नृसिंहो १।२
ब्रह्मचारिव्रते स्थितः भ.गी. ६।१४
ब्रह्मचारी गृहस्थश्च २ तत्त्वो. ३
ब्रह्मचारी गृहस्थो वा ललाटहृदयकण्ठबाहुमूलेषु वैष्णवगायत्र्या कृष्णादिनामभिर्वा धारयेत् वासुदेवो. ४
ब्रह्मचारी गृही वानप्रस्थो वा मुख्यवृत्तिकाचेद्ब्रह्मचर्यसमाप्यगृहीभवेत् ना. प. ३।७७
ब्रह्मचारी ज्ञानवान्भवति ना.उ.ता.३।१
ब्रह्मचारी धनदायी मेधावी श्रोत्रियः प्रियो विद्यया वा विद्यां यः प्राह तानि तीर्थाणि षण्मम संहितो. ३ ५
ब्रह्मचारी मिताहारी योगी योगपरायणः। अब्दादूर्ध्वं भवेत्सिद्धो नात्रकार्या विचारणा [यो.चू.४२+ ध्या. बिं. ७२
ब्रह्मचारी वानप्रस्थो (वा) ललाटकण्ठ-हृदय-बाहुमूलेषु वैष्णवगायत्र्या कृष्णादिपञ्चनामभिर्वा धारयेत् [वासुदेवो. ३+ गोपीचं.४
ब्रह्मचारी वेदमधीत्य वेदोक्ताचरितब्रह्मचर्येण दारानाहृत्य पुत्रानुत्पाद्य ताननुपाधिभिर्वितत्येष्ट्वा च शक्तितो यज्ञैः कठरु. २
ब्रह्मचारी वेदमधीत्य वेदौ वेदान्वा चरेद्ब्रह्मचर्यम् कठश्रु. १७
ब्रह्म चिद्ब्रह्म भुवनं ब्रह्मभूतपरम्परा। ब्रह्माहं ब्रह्मचिच्छत्रुब्रह्मचिन्मित्रबान्धवाः अ.पू. ५।२०
ब्रह्मचैतन्यं तेषु प्रतिबिम्बितं भवति त्रि.म.ना.४।९
ब्रह्मजज्ञं देवमीड्यं विदित्वा निचाय्येमां शान्तिमत्यन्तमेति कठो. १।१७
ब्रह्मजज्ञानंप्रथमंपुरस्तात् [महाना.५।५+ [वा. सं.१३।३+अथर्व. ४।१।१+ [तै सं.४।२।८।२+ २शिवसं. ३२ साम.१।३२१
ब्रह्मज्येष्ठमुपासते तैत्ति. २।५
ब्रह्मज्ञानप्रभासन्ध्याकालो गच्छति धीमताम् पा. ब्र. ७
ब्रह्मज्ञानोत्पत्तेः प्रकृतिं व्याख्यास्यामः। को नाम स्वयम्भूः पुरुष इति गायत्रीर. १
ब्रह्मज्ञानोपायतया यद्विभूतिः प्रकीर्तिता का.रु.शीर्षकं

ब्रह्मज्ञेयमजं नित्यमजेनाजं विबुद्ध्यते अद्वैत. ३३
ब्रह्मणः पादचतुष्टयं निर्विशेषं भवति त्रि.म.ना.४।१
ब्रह्मणःसोम्यते पादंब्रवाणीति[छां.४।६।३ +७।३+८।३
ब्रह्मणश्च ते पादं ब्रवाणीति छांदो. ४।५।२
ब्रह्मणस्त्वा शपथेन शपामि वनदु. १६०
ब्रह्मणस्त्रिविधः स्मृतः भ.गी.१७।२३
ब्रह्मणस्पतिमेकाक्षरं ग.शो. ५।६
ब्रह्मण्यं बहुपुत्रताम्। श्रद्धामेधे प्रज्ञा तु जातवेदः संददातु महाना.१४।५
ब्रह्मणः कुत उद्भवः १आत्मो. २६
ब्रह्मणः कोशोऽसि मेधया पिहितः [तैत्ति. १।४।१ ना.प. ४।४९
ब्रह्मणः सकाशात्पञ्चमहाभूतानि तन्मात्राणि जायन्ते ना.पू.ता.५।३
(प्रकृतिरिति च-) ब्रह्मणः सकाशान्नानाविचित्रजगन्निर्माणसामर्थ्यबुद्धिरूपा ब्रह्मशक्तिरेव प्रकृतिः निरा. ८
ब्रह्मणः सर्वभूतानि जायन्ते परमात्मनः यो.शि. ४।५
ब्रह्मणः सलोकतांसार्ष्टितांसायुज्यं यान्ति नृ. पू. १।७
ब्रह्मणः सायुज्यमृषयोऽगच्छन् सहवै. १३
ब्रह्मणा कल्पिताकारा लक्षशोऽप्यथ कोटिशः। संख्यातीताः पुरा जाता जायन्तेऽद्यापि चाभितः (जीवाः) महो.५।१३६
ब्रह्मणा तन्यते विश्वं मनसैव स्वयम्भुवा। मनोमयमतो विश्वं यन्नाम परिदृश्यते महो. ४।५०
ब्रह्मणा त्वा शपामि वनदु. १६०
ब्रह्मणा पिहिता गुहा इतिहा. १७
ब्रह्मणा मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति छांदो.३।१०।१
ब्रह्मणा वाव सर्वे वेदा महीयन्ते तैत्ति. १।५।३
ब्रह्मणि स आत्माऽमृतत्वाय म.ना.१६।२,३
ब्रह्मणे त्वामहसा ॐ मित्यात्मानंयुञ्जीत म.ना.१७।१५
ब्रह्मणेदक्षिणांदत्त्वाशान्त्यैपुलकमाहरेत् बृ.जा. ३।१९
ब्रह्मणे स्वाहेत्यग्नौ हुत्वा मन्थे सस्रवमवनयति बृह. ६।३।२
ब्रह्मणैव मुखेनैतदेवामृतंदृष्ट्वा तृप्यन्ति छांदो.३।१०।३
ब्रह्मणो जायमानस्य ब्रह्मत्वं च तथा भवेत् (सुवर्णाज्जायमानस्य सुवर्णत्वं च शाश्वतम्) यो. शि. ४।७
ब्रह्मणोऽन्यतरन्नास्तिब्रह्मणोऽन्यज्जगन्नच ते.बिं. ६।४९
ब्रह्मणोऽन्यत्पदं नहि ते.बिं. ६।५०
ब्रह्मणोऽन्यत्फलं नहि ते.बिं. ६।५०
ब्रह्मणोऽन्यन्न किञ्चन ते.बिं. ३।३२
ब्रह्मणोऽपि मायोपाधिवशात्सगुणपरिच्छिन्नादिप्रतीतिरुपाधिविलयान्निर्गुणनिरवयवादिप्रतीतिरित्युपनिषत् त्रि.म.ना.३।७
ब्रह्मणोवाएतद्विजयेदेवामहीयध्वम्(मा.पा.)केनो. ४।१
ब्रह्मणो वा एतद्विजये महीयध्वम् केनो. ४।१
ब्रह्मणो वायुरभवत् गायत्रीर. १
ब्रह्मणो वायुर्वायोरोङ्कार ओङ्कारात्सावित्री सावित्र्या गायत्री गायत्र्या लोकाः भवन्ति [अ.शिरः.३।१५+ बटुको. २७
ब्रह्मणो वावैतत्तेजः परस्यामृतस्य.. मैत्रा. ६।२७
ब्रह्मणो वावैता अग्र्यास्तनवः परस्यामृतस्याशरीरस्य मैत्रा. ४।६
ब्रह्मणो विवरं यावद्विद्युदाभासनालकम्। वैष्णवी ब्रह्मनाडी च निर्वाणप्राप्तिपद्धतिः त्रि.ब्रा. २।६
ब्रह्मणोऽव्यक्तम् त्रि.ब्रा. १।१
ब्रह्मणो हि प्रतिष्ठाऽहं भ.गी.१४।२७
ब्रह्मणो हृदयस्थानं कण्ठे विष्णुः समाश्रितः। तालुमध्ये स्थितो रुद्रो ललाटस्थो महेश्वरः ब्र. बि.४१
ब्रह्मण्यमृते तेजोमये परञ्ज्योतिर्मये... रमते... (गणेशः) ग. शो.५।७
ब्रह्मण्यः पुण्डरीकाक्षो ब्रह्मण्यो विष्णुरच्युतः [नारा. ४+ आ. प्र. १
ब्रह्मण्याधाय कर्माणि भ.गी. ५।१०
ब्रह्मण्येव विलीनात्मा निर्विकारो विनिष्क्रियः अध्यात्मो.४३
ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः। ब्रह्मण्यः पुण्डरीकाक्षो ब्रह्मण्यो विष्णुरच्युतः [नारा. ४ आ. प्र. १
ब्रह्मण्यो ब्रह्मकृच्छब्दब्रह्मलोके महीयते इतिहा. १३
ब्रह्म तल्लक्ष्यमुच्यते मुण्ड.२।२।४
ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद बृह.४।५।७

ब्रह्मतेजोमयानन्दरसप्रवाहैरतिशोभितं ब्रह्मविद्या-तरङ्गिण्याः प्रवाहैः सुमङ्गलं निरतिशयानन्तदिव्यानन्द-तेजोज्वालाराशिमण्डलं ज्वलति सि.सा. ३।१

ब्रह्मतेजोराश्यभ्यन्तरसमासीनं... विष्वक्सेनं ध्यात्वा...विद्याविभूतिं व्याप्य...परमानन्दं प्राप त्रि.म.ना.६।६

ब्रह्मत्वं रसचेतसि वराहो.२।७९

ब्रह्मत्वे योजिते स्वामिन्जीवभावो न गच्छति वराहो.२।७०

ब्रह्म देहत्वमापन्नं वारिबुद्बुदतामिव। दशद्वारपुरं देहं दशनाडीमहापथम् यो.शि.१।१६५

ब्रह्मद्वारमिदमित्येवैतदाह यस्तपसा-हतपाप्मा मैत्रा. ४।४

ब्रह्मद्वारे प्रविष्टे तु सम्यक्कुम्भनमाचरेत् योगकुं.२।४२

ब्रह्मनिर्वाणमृच्छति भ.गी. २।७२

ब्रह्मनिष्ठस्तथा योगी पृथग्भावं न विन्दति अमन. १।३१

ब्रह्मन्नतिथिर्नमस्यः कठो. १।९

ब्रह्मन्निधिं मनसा वेदयन्तः पश्यन्तो गुह्यमपरं परं च। अनध्वगा अध्वसु पारयिष्णवः ब्राह्मणास्तु सदृशाः सूर्येण इतिहा. १८

ब्रह्मंस्त्वमसि विश्वधृत्तेजोदास्त्वमसि म.ना.१७।१५

ब्रह्मन् देवदर्शीत्याख्याथर्वणशाखायां परमतत्त्वरहस्याख्याथर्वणमहा-नारायणोपनिषदि त्रि.म.ना.१।२

(ॐ) ब्रह्मन् ॐ ब्रह्मन् ॐ ब्रह्मन् ग. शो. २।१

(एवं) ब्रह्मपरिज्ञानादेव मर्त्योऽमृतो भवेत् वराहो. २।१९

ब्रह्म पश्चात् ब्रह्म दक्षिणतश्चोत्तरेण मुण्ड.२।२।११

ब्रह्म पुच्छं प्रतिष्ठा तैत्ति. २।५

ब्रह्मपुत्रस्तपस्तेपे सिद्धक्षेत्रे महायशाः स सर्वस्य वक्ता ग. पू. १।६

ब्रह्मपूता पुनातु माम् महाना.११।२

ब्रह्म प्रजापतिं (असृजत्) बृह. ५।५।१

ब्रह्मप्रणवध्यानानुसन्धानपरो भूत्वा सर्वकर्मनिर्मुक्तः...सत्यवाक्शुचि-रद्रोही ग्राम एकरात्रं पत्तने पञ्चरात्रं क्षेत्रे पञ्चरात्रंतीर्थे पञ्चरात्रमनिकेतः स्थिरमतिर्नानृतवादी गिरिकन्दरेषु वसेदेक एव ना.प. ७।२

ब्रह्मप्रणवमनुस्मरन् भ्रमरकीटन्यायेन शरीरत्रयमुत्सृज्य सन्यासेनैव देहत्यागं करोति, स कृतकृत्यो भवति ना.प. ३।८७

ब्रह्मप्रणवसन्धानं नादोज्योतिर्मयःशिवः ना. बि. ३०

ब्रह्मप्रणवसंलग्नमनादो ज्योतिर्मयात्मकः ना. बि. ४६

ब्रह्मप्रणवः षोडशमात्रात्मकः सोऽवस्था-चतुष्टयचतुष्टयगोचरः प. हं. पं. ९

ब्रह्म प्रपद्ये ब्रह्मकोशं प्रपद्ये सहवै. २३

ब्रह्मप्रकृतौ तत्प्रणवहंससूत्रेणैव ध्यान-माचरन्ति पा. ब्र. ३

ब्रह्म ब्रह्मविदां च यत् अ.पू. ३।१९

ब्रह्म ब्रह्मविदो जनाः भ.गी. ८।२४

ब्रह्म ब्रह्मेत्यथायान्ति ये विदुर्ब्राह्मणा-स्तथा। अत्रैव ते लयं यान्ति लीनाश्चाव्यक्तशालिनः मंत्रिको. २०

ब्रह्म ब्राह्मणैश्च गां, गोभिर्ब्राह्मणान् ब्राह्मण्येन हविर्हविषा आयुरायुषा सत्येन सत्यं धर्मेण धर्मं तर्पयामि... अ.शिरः.१।१

ब्रह्म ब्राह्मीं व्याहृतिं ब्रह्मदैवतं...भूतानि स्थावरजङ्गमान्यभवत् २ प्रणवो. २

ब्रह्मभावमिदं सूत्रं धारयेद्यः स चेतनः [ब्रह्मो. ९+ ना. प.३।८०

ब्रह्मभावमिदं सूत्रं धारयेद्यः स मुक्तिभाक् परब्र. ११

ब्रह्मभावं प्रपद्यैव यतिर्नावर्तते पुनः २आत्मो.२५

ब्रह्मभावे मनश्चारं ब्रह्मचर्यं जा.द. १।१४

ब्रह्मभूतमकल्मषम् भ.गी.६।२७

ब्रह्मभूतः प्रशान्तात्मा ब्रह्मानन्दमयः सुखी। स्वच्छरूपो महामौनी वैदेही मुक्त एव सः ते.बिं. ४।३३

ब्रह्मभूतः प्रसन्नात्मा भ.गी.१८।५४

ब्रह्मभूतोऽधिगच्छति भ.गी. ५।२४

ब्रह्मभूयाय कल्पते [भ.गी.१४।२६+ १८।५३

ब्रह्मभेदो न कथितो ब्रह्मव्यतिरिक्तं न किञ्चिदस्ति त्रि.म.ना.४।२

ब्रह्ममात्रमिदं सर्वं ब्रह्मणोऽन्यन्न किञ्चन ते.बिं.३।३२
ब्रह्ममात्रं जगदिदं ते.बिं.५।३०
ब्रह्ममार्गे सम्यक्सम्पन्नः...ब्रह्मभूयाय
भवति प.हं. प. ६
ब्रह्ममूर्धानं दिक्श्रवणं ब्रह्माण्डगण्डं...
दृष्ट्वा स्तुवन्तिस्म ग.शो. ४।५
ब्रह्ममेतु माम्। मधु मेतुमाम्। ब्रह्म- त्रिसु. १+
मेव मधुमेतु माम्।[तै.आ.१०।४८+ म.ना.१२।१
ब्रह्ममेधया। मधु मेधया ब्रह्ममेव मधु-
मेधया। अद्या नो देवसेवितः
प्रजावत्सावीः सौभगम् [त्रिसु.२+ म.ना.१२।२
ब्रह्म मेधवा। मधु मेधवा ब्रह्ममेव
मधु मेधवा [म. ना. १२।३ त्रिसु. ३
ब्रह्ममेव मधु मेधवा [त्रिसु. ३+महाना १२।३+
[तै. आ.+ १०।५०
ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि
ग्रामादच्छदिर्दर्शउदीच्यांप्रागुदीच्यां
वोदित आदित्ये दक्षिणत उपवी-
योपविश्यहस्तावनिज्यत्रिराचामेत् सहवै. १५
ब्रह्मयज्ञो वा एष यत्पूर्वेषां वचनं मैत्रा. १।१
ब्रह्मरन्ध्रं गते वायौ नादश्चोत्पद्यतेऽनघ जा.द. ६।३६
ब्रह्मरन्ध्रं सुषुम्णाया वदनेन पिधाय
सा। अलम्बुसा सुषुम्णायाः
कुहूर्नाडी वसत्यसौ वराहो. ५।२३
ब्रह्मरन्ध्रे भ्रुवोर्मध्ये हृदये चिद्रविं
हरिम्। गोपीचन्दनमालिप्य
तत्र ध्यात्वाऽप्नुयात्परम् वासुदेवो.११
ब्रह्मरन्ध्रे महास्थानेवर्ततेसततं शिवा।
चिच्छक्तिः परमा देवी मध्यमे
सुप्रतिष्ठिता यो.शि.६।४७
ब्रह्मरूपतया पश्यन्ब्रह्मैव भवति स्वयम् वराहो.२।१३
ब्रह्मरूपतया ब्रह्म केवलं प्रतिभासते २ आत्मो. १
ब्रह्मरूपं च विज्ञेयं सर्वरूपं विभावयेत् २ बिल्वो. ९
ब्रह्मलोकपदान्वेषी रुद्राराधनतत्परः अ. ना. २
(अत एव) ब्रह्मलोकस्था अपि ब्रह्म-
मुखाद्वेदान्तश्रवणादि कृत्वा तेन
सह कैवल्यं लभन्ते मुक्ति.१।५८
ब्रह्मलोको गलः प्रोक्तो वायवः प्राणरूपिणः।
वनस्पतय ओषध्यो लोमानि परिचक्षते गुह्यका.१७

ब्रह्मवर्चसेन मे सम्तिष्ठस्व महाना.१६।११
ब्रह्मवर्चस्यन्नादो भवति [मा. पा.] छां.उ.२।१२।२
ब्रह्मवर्चस्यर्षिसंहिता भवति संहितो. १।१
ब्रह्मवर्चस्वी भवति यस्तथाऽधीते संहितो. १।१
ब्रह्मवर्चस्यन्नादो भवति सर्वमायुरेति
ज्योग्जीवति महान्प्रजया पशु-
भिर्भवति महान्कीर्त्या न प्रत्यङ्ङ-
ग्निमाचामेन्न निष्ठीवेत्तद्व्रतम् छांदो.२।१२।३
ब्रह्म वा इदमग्र आसीत् बृह. १।४।१
ब्रह्म वा इदं सर्वम् नृसिंहो. ७।५
ब्रह्मवाक्यं तत् महावा. २
(ॐ) ब्रह्मवादिनो वदन्ति। किं कारणं
किंब्रह्म कुतः स्म जाताजीवाम केन
क च सम्प्रतिष्ठाः श्वेताश्व. १।१
ब्रह्मवादिनो वदन्ति यद्वसूनां प्रातः स-
वनꣳ रुद्राणां माध्यन्दिनꣳ सवन-
मादित्यानां च विश्वेषां च देवानां
तृतीयसवनम् छांदो.२।२४।१
ब्रह्मवादिनो वदन्त्यस्तमित आदित्ये
कथं वास्योपस्पर्शनमिति १सं.सो. १।३
ब्रह्मवान् भवति (ब्रह्मोपासकः) तैति.३।१०।४
ब्रह्मविज्ज्ञानी किं गृह्णाति जहाति किम् पा. ब्र.३२
ब्रह्मविज्ञानलाभाय...शान्तिदान्त्या-
दिभिः सर्वैः साधनैः सहितो भवेत् ना.प. ६।२८
ब्रह्मविज्ञानसम्पन्नः प्रतीतमखिलं जगत्।
पश्यन्नपि सदा नैव पश्यति
स्वात्मनः पृथक् [पा. ब्र. ५१+ वराहो.२।२७
ब्रह्मविद इव सोम्य ते मुखं भाति
को नु त्वाऽनुशशासेति छांदो.४।१४।२
ब्रह्मविदाप्नोति परम् [तैत्ति.२।१।१+ भस्मजा. २।७
ब्रह्मविदित्येवमेवैष भगवन्निति वै
याज्ञवल्क्य जाबा. ५
ब्रह्मविदिदमयमिदमेकविंशतिरन्नादन्न-
रसमयात्प्राणो व्यानोऽपान
आकाशः पृथिवी पुच्छꣳषड्विंशतिः तैत्ति. २।१०
ब्रह्मविदिवसोम्यभासि, कोनुत्वानुशशास छांदो.४।९।२
ब्रह्मविद्भवति ज्ञानात्सर्वं ब्रह्मात्मनैव
तु। ब्रह्मक्षत्रादिकं सर्वं यस्य
स्यादोदनं सदा पा. ब्र. ४४

ब्रह्मविद्ब्रह्मणि स्थितः — भ.गी.५।२०

ब्रह्मविद्य एवं वेदेत्युपनिषत् — तैत्ति. २।१०

ब्रह्मविद्यापरिज्ञानं ब्रह्मप्राप्तिकरं स्थितम् — शु.र.उ. ३।१

ब्रह्मविद्यासाकारश्चानन्दसाकार उभयात्मकसाकारश्चेति — त्रि.म.ना.२।१

ब्रह्मविद्यासेविनो ज्ञानिन आत्मवेदनेन तां लीलां न प्राप्नुवन्ति — सामर. ५२

ब्रह्मविद्यां च बाल्यं च निर्विद्य मुनिरात्मवान् [ब. पू. ४।३८ — शाट्या. २४

ब्रह्मविन्मात्रेणाकुलमेकोत्तरशतं तारयति — पैङ्गलो. ४।१

ब्रह्मविष्णुमयो रुद्रः, अग्नीषोमात्मकं जगत् । पुल्लिङ्गं सर्वमीशानं स्त्रीलिङ्गं भगवत्युमा — रुद्रहृ. ९

ब्रह्मविष्णुमहेशानां त्र्यग्नीनां च धारणं — बृ.जा.४।३७

ब्रह्मविष्णुमहेश्वरत्वमनुसन्धाय...मूलमेकं सत्यं मृण्मयं विज्ञातं स्यात् — परब्र. ४

ब्रह्मविष्णुमहेश्वरात्मकमग्नित्रयकलोपेतं चिद्ग्रन्थिबन्धनम् — पा. ब्र. ३

ब्रह्मविष्णुरुद्रादयो यस्मादुत्पद्यन्ते लीयन्ते — सामर. २२

ब्रह्म-विष्णु-रुद्रादीनामेकलक्ष्यं सर्वकारणं परं ब्रह्मात्मन्येव पश्यमानो गुरुविहरणमेव निश्चयेन ज्ञात्वा... परं ब्रह्म प्राप्नोति — मं.ब्रा. ३।१

ब्रह्मविष्णुरुद्रेन्द्रास्ते सम्प्रसूयन्ते सर्वाणि चेन्द्रियाणि सह भूतैः — अ.शिखो. ३

ब्रह्मविष्णुशिवरूपिणी चैतन्यदीप्ता (माया) — नृसिंहो. ९।३

ब्रह्मविष्णुशिवादीनां मन्त्रं जाप्यं विशारदैः — योगरा. ३

ब्रह्मविष्ण्वादिगणानामीशभूतमित्याह तद्गणेश इति — ग. शो. ३।१

ब्रह्मविष्ण्वादिभिः सेव्यं सर्वेषां जनकं परम् (ब्रह्म) — पञ्चब्र. १३

[आसुरमिति च–]ब्रह्मविष्ण्वीशानेन्द्रादीनामैश्वर्यकामनया निरशनजपाग्निहोत्रादिष्वन्तरात्मानं सन्तापयति चात्युग्ररागद्वेषविहिंसादम्भाद्यपेक्षितं तप आसुरम् — निरा. २७

[जीव इति च–]ब्रह्मविष्ण्वीशानेन्द्रादीनां नामरूपद्वारा स्थूलोऽहमिति मिथ्याध्यासवशाज्जीवः — निरालं. ७

ब्रह्मवृत्त्या हि पूर्णत्वं तया पूर्णत्वमभ्यसेत् — ते. बिं. १।४२

ब्रह्मवेदनमात्रेण ब्रह्माप्नोत्येव मानवः — कठरु. १२

ब्रह्मवेदस्याथर्वणं शुक्रमत एव मन्त्राः प्रादुर्बभूवुः — २ प्रणवो. ४

ब्रह्मव्यतिरिक्तं न किञ्चिदस्ति — त्रि.म.ना.४।२

(तस्मात्) ब्रह्मव्यतिरिक्तं सर्वं बाधितमेव — त्रि.म.ना.३।३

ब्रह्मव्यतिरिक्तं सर्वं नश्वरमिति निश्चित्याथो क्रमेण यः सन्न्यसति स सन्न्यासोऽनिमित्तसन्न्यासः — ना. प. ५।४

ब्रह्मशब्देन तद्ब्रह्म स्वप्रकाशात्मरूपकम् — शु. र. उ. ३।८

ब्रह्म शाश्वतम् — त्रि. ता. १।५

[तप इति च–] ब्रह्म सत्यं जगन्मिथ्येत्यपरोक्षज्ञानाग्निना ब्रह्माद्यैश्वर्याशासिद्धसङ्कल्पबीजसन्तापं तपः — निरालं.२८

ब्रह्मसदनं चरतो मे ध्यातः स्तुतः परमेश्वरः... परार्धान्ते सोऽबुध्यत — गो. पू. ३।८

ब्रह्मसन्ध्याक्रिया मनोयागः — पा. ब्र. ३

ब्रह्म स ब्रह्मवित्स्वयम् — मुक्तिको.२।६४

ब्रह्म सम्पद्यते तदा — भ.गी.१३।३१

ब्रह्म सम्पद्यते योगी न भूयः संसृतिं व्रजेत् — त्रि.ब्रा.२।१६२

ब्रह्म सरूपमनुमेनमायायनं मा विवर्षीर्विक्रमस्व[महाना.१३।११+ — चित्त्यु. १५।१

(तथा) ब्रह्म सर्वान्तरात्मा मध्ये प्रकाशितम् — अद्वैतो. ३

ब्रह्मसंस्थोऽमृतत्वमेति — छां.२।२३।१

ब्रह्मसाक्षात्कारानुभवविशेषबोधसारतरानन्तप्राकारैः समुज्ज्वलितम् — सि. सा. ६।१

ब्रह्मसूत्रपदं ज्ञेयं ब्राह्मं विध्युक्तलक्षणम् — पा. ब्र. ११

ब्रह्मसूत्रपदैश्चैव — भ.गी. १३।५

ब्रह्मसूत्रमहमेव, विद्वान्त्रिवृत्सूत्रं त्यजेद्विद्वान्य एवं वेद — आरुणि. ३

ब्रह्म सोमोऽहं पवनः सोमोऽहं पवते सोमोऽहं... — भस्मजा. १।५

ब्रह्मस्थाने तु नादः स्याच्छाकिन्यमृतवर्षिणी । षट्चक्रमण्डलोद्धारं ज्ञानदीपं प्रकाशयेत् ब्र.वि. ७६
ब्रह्म स्वयम्भु ब्रह्मणे स्वयम्भुवे स्वाहा चित्यु. ६।१
ब्रह्मस्वरूपविज्ञानाज्जगद्भोज्यं भवेत्खलु पा. ब्र. ४५
ब्रह्मस्वरूपं निरञ्जनं परमं व्योमकं तस्मात्प्रश्चतुर्थं पादं जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति नृ. पू. १।२
ब्रह्मस्वरूपं निरञ्जनं परमव्योम्निकं तस्मात्प्रः षष्ठं पादं जानीयात्तेन वक्रतुण्डाय हुमिति यो जानीयात्सोऽमृतत्वं च गच्छति ग.पू. १।१२
ब्रह्मस्वात्मतया नित्यं भक्षितं सकलं तदा पा. ब्र. ४६
ब्रह्म स्वानुभूतिः, गुरुः शिवो देवः रुद्रोप. ३
ब्रह्महत्या-सुरापान-स्वर्णस्तेय-गुरुतल्पगमन-तत्संयोगिपातकेभ्यः पूतो भवति पैङ्गलो. ४।२४
ब्रह्महत्यां वा एते घ्नन्ति [त्रिसु. १+ महाना.१२।१
ब्रह्म ह देवेभ्यो विजिग्ये तस्य ह ब्रह्मणो विजये देवा अमहीयन्त त ऐक्षन्तास्माकमेवायं विजयोऽस्माकमेवायं महिमेति केनो. ३।१
ब्रह्म ह वा इदमग्र आसीत् मैत्रा. ६।१७
ब्रह्म (ह) वै ब्रह्माणं पुष्करे पुष्करे ससृजे २ प्रणवो. १
ब्रह्म ह श्वेताश्वतरोऽथ विद्वान् श्वेताश्व.६।२१
ब्रह्मंस्तपस्व तपस्वेत्युक्त्वाऽन्तर्हिते तस्मिन्ब्रह्मा तपश्चचार ग. शो. ३।८
ब्रह्मंस्तवेन्द्रियाणि याजकानि ध्यात्वा ...शरदृतुं रसं ध्यात्वैवमग्नौ हुत्वाऽङ्गस्पर्शात्कलेवरोवर्ज्जीष्यते मुद्गलो. २।५
ब्रह्माकारमनोवृत्तिप्रवाहोऽहङ्कृतिं विना ...
ब्रह्माक्षरसमुद्भवम् भ.गी. ३।१५
ब्रह्मामावपरे यज्ञं भ.गी. ४।२५
ब्रह्माग्नौ ब्रह्मणा हुतम् भ.गी. ४।२४
ब्रह्माङ्गलक्षणयुक्तो यज्ञसूत्रम् , तद्ब्रह्मसूत्रम् । पा. ब्र. ३
ब्रह्मा च नारायणः नारा. २
ब्रह्माणमीशं कमलासनस्थं भ.गी.११।१५
ब्रह्माणमुपविशति स्म ब्रह्मन् कुरु सृष्टिं ग. शो. ३।४
ब्रह्माणमेवाप्येति योब्रह्माणमेवास्तमेति सुबालो.९।११
ब्रह्माणं पृथिवीभागे विष्णुं तोयांशके तथा जा.द. ८।५
ब्रह्माण्डतद्गतलोकान्कार्यरूपांश्च कारणत्वं प्रापयित्वा...सर्वाणि भौतिकानि कारणे भूतपञ्चके संयोज्य भूमिं जले जलं वह्नौ वह्निं वायौ वायुमाकाशे चाकाशमहङ्कारे चाहङ्कारं महति महदव्यक्तेऽव्यक्तं पुरुषे क्रमेण विलीयते पैङ्गलो.३।४
ब्रह्माण्डमपि पिण्डाण्डं त्यजतां मलभाण्डवत् । चिदात्मनि सदानन्दे देहरूढामहं धियम् । निवेश्य लिङ्गमुत्सृज्य केवलो भव सर्वदा अध्यात्मो.८।९
ब्रह्माण्डस्योदरे देवा दानवा यक्षकिन्नराः । मनुष्याः पशुपक्ष्याद्यास्तत्तत्कर्मानुसारतः कठरु. १९
ब्रह्माण्डं चैव पिण्डाण्डं लोका भूरादयः क्रमात्...स्वस्वोपाधिलयादेव लीयन्ते प्रत्यगात्मनि योगकु.३।२२
ब्रह्माण्डं पञ्चभूतस्थं पञ्चभूतमयी तनुः । सर्वं भूतमयं चेति त्यक्त्वा नास्तीति भावयेत् अमन.१।१७
ब्रह्माण्डं सकलं पश्येत् पाणिस्थमिव मौक्तिकम् अमन.१।८०
ब्रह्माण्डाखण्डविग्रहम् (महेशं) पं. ब्र. ११
ब्रह्माण्डाद्बहिरूर्ध्वे हि महत्तत्वमहङ्कृतिः गुह्यका. ७
ब्रह्माण्डार्धे कपालं हि शिरस्तस्या विभावयेत् गुह्यका. ८
ब्रह्माण्डावरणं विनश्यति तद्धि विष्णोः स्वरूपम् त्रि.म.ना.३।५
ब्रह्मात्मसच्चिदानन्दात्मकमंत्रमित्युपासितव्यम् श्रीवि.ता.१।१
ब्रह्मात्मैकत्वविज्ञानं हेयं मिथ्यात्वकारणात् परब्र. ३
ब्रह्मात्मैवात्र ह्येव न विचिकित्स्यमित्योंसत्यं तदेतत्पण्डिता एव पश्यन्ति नृसिंहो. ५।८

ब्रह्मादयश्च (इंद्रादयश्च) यक्षान्ता
वृन्तभागे व्यवस्थिताः (बिल्ववृक्षस्य) २बिल्वो. १०

ब्रह्मादयस्त्रयो मूर्तयः...अकारोकारम-
कारा एते सर्वे प्रणवमयोर्ध्वपुण्ड्र-
त्रयात्मकास्तदेतदोमित्येकधा
समभवन् गोपीचं. ४

ब्रह्मादयस्त्रयो मूर्तयास्तिस्रो व्याहृतय-
स्त्रीणि छन्दांसि त्रयोऽग्नय इति वासुदे. ४

ब्रह्मादिकार्यरूपाणि स्वे स्वे संहृत्य
कारणे। सर्वकारणमव्यक्तमनिरूप्य-
मचेतनम्। साक्षादात्मनि सम्पूर्णे
धारयेत्प्रणवेन तु । इन्द्रियाणि
समाहृत्यमनसाऽऽत्मनि योजयेत् जा.द.८।८-९

ब्रह्मादिकीटपर्यन्ता प्राणिनो मयि
कल्पिताः । बुद्बुदादिविकारान्त-
स्तरङ्गः सागरे यथा आ. प्र. १५

ब्रह्मादिपञ्चब्रह्माणो यत्रविश्रान्तिमाययुः।
तदखण्डं सुखाकारं रामचन्द्रपदं भजे पं. ब्र. शीर्षकं

ब्रह्मादिपिपीलिकापर्यन्तं सर्वप्राणि-
बुद्धिष्ववशिष्टतयोपलभ्यमानः सर्व-
प्राणिबुद्धिस्थो यदा तदा कूटस्थः
इत्युच्यते सर्वसारो. ५

ब्रह्मादिलोकपर्यन्ताद्विरक्त्या यल्लभेत्
प्रियम्। सर्वत्र विगतस्नेहः
सन्तोषं परमं विदुः जा.द. २।६

ब्रह्मादिस्तम्बपर्यन्तं मृषामात्रा उपाधयः।
ततः पूर्णं स्वमात्मानं पश्येदेका-
त्मना स्थितम् अध्यात्मो.१९

ब्रह्मादीनामगोचरा (अनन्तमहामाया) त्रि.म.ना.४।९

ब्रह्मादीनां वाचकानां मन्त्रोऽन्वर्था-
दिसंज्ञकः । जप्तव्यो मन्त्रिणा नैवं
विना देवः प्रसीदति रा. पू. १।११

ब्रह्मा देवानां पदवीः कवीनामृषि-
र्विप्राणां महिषो मृगाणाम्
[महाना. ८।४+१२।३+ वनदु. ४७,६०

ब्रह्मा देवानां प्रथमः सम्बभूव यो.चू. ७२

ब्रह्मा देवानां प्रथमः सम्बभूवविश्वस्य
कर्ता भुवनस्य गोप्ता मुंडको. १।१

ब्रह्मा देवानां सवितुः कवीनामृषि-
र्विप्राणां महिषो मृगाणाम् ग.पू. १।१

ब्रह्माद्यं स्थावरान्तं च पश्यन्ति
ज्ञानचक्षुषः मंत्रिको.१६

ब्रह्माद्वितीयमेव सत्यम् त्रि.म.ना.४।२

ब्रह्माघोराङ्गिरसे ददौ (ब्रह्मविद्यां) सुबालो.७।३

ब्रह्मानन्दकारणम् (गोपीचंदनम्) गोपीचं. ६

ब्रह्मानन्दमयविमानकोटिभिरतिमङ्गल-
मनन्तोपनिषदर्थारामजालसङ्कुलं...
प्रणवाख्यं विमानं विराजते त्रि.म.ना.७।९

ब्रह्मानन्दमयानन्त-प्राकार-प्रासाद-
तोरणविमानोपवनावलिभिर्ज्वल-
च्छिखरैरुपलक्षितो निरुपमनित्य-
निरवद्यनिरतिशयनिरवधिकब्रह्मा-
नन्दाचलो विराजते [त्रि.म.ना.५।५+ सि.सा.१।१

ब्रह्मानन्दपरं ज्योतिः ते.बि.४।५९

ब्रह्मानन्दमयी विद्यायापरा सा परा गतिः गान्धर्वो. ५

ब्रह्मानन्दरसनिर्भरैरसङ्ख्यैरतिमङ्गलं...
निरतिशयाद्वैतपरमानन्दलक्षण-
मादिनारायणं ध्यायेत् त्रि.म.ना.७।१२

ब्रह्मानन्दरसारूढो ब्रह्मानन्दैकचिद्घनः ते. बि. ४।६०

ब्रह्मामृतरसे तृप्तो ब्रह्मानन्दानुभावकः ते.बि. ४।५८

ब्रह्मानन्दसमष्टिकन्द...ब्रह्मानन्द-
मयानन्तनिरतिशयानन्दसागरा-
कारम् । आत्मसमानानन्दविभूति-
पुरुषानन्तानन्दमण्डितं नित्य-
मङ्गलमनन्तविभवम् सि.सा. १।१

ब्रह्मानन्दं परमं दक्षिणे च ब्रह्मानन्दं
परमं चोत्तरे च पा. ब्र. ३५

ब्रह्मानन्दं सदा पश्यन्कथंवध्येतकर्मणा वराहो.२।१६

ब्रह्मानन्दानुसन्धाने नास्माद्न्यत्तु
किञ्चन । सुलभं त्रिषु लोकेषु
यज्ज्ञात्वाऽमृतमश्नुते गान्धर्वो. ११

ब्रह्मानन्दामृतरसाम्भोनिधितरङ्गिण्याः
प्रवाहैरतिमङ्गलम् सि. सा. ६।१

ब्रह्मानन्दाश्रुसंजातेवृन्दावननिवासिनि!
सर्वावयवसम्पूर्णे अमृतोपनिषद्रसे ।
त्वं मामुद्धरकल्याणि महापापाब्धि-
दुस्तरात् तुलस्यु. ११

ब्रह्मानन्दे निमग्नस्य विषयाशा न तद्भवेत् आ.प्र. १७
(यद्वा) ब्रह्मानन्दे विलीयताम् (धीः) १अवधू.२५
ब्रह्मा नारायणः, शिवश्च नारायणः त्रि.म.ना.२।८
ब्रह्मान्वविन्दद्दश होतारमर्णे चित्त्यु.११।१
ब्रह्मा पूरक इत्युक्तो विष्णुः कुम्भक उच्यते। रेचो रुद्र इति प्रोक्तः प्राणायामस्य देवताः ध्या. बि.२१
ब्रह्मा ब्रह्माणी वेदितव्ये देव्यु. १
ब्रह्माब्रह्माऽहं प्राञ्चः प्रत्यञ्चोऽहम् अ. शिरः. २
ब्रह्माभयं वै ब्रह्माभयꣳ हि वै ब्रह्म भवति य एवं वेद बृह.४।४।२६
ब्रह्मामृतरसासक्तो ब्रह्मामृतरसः स्वयम् ते.बि.४।५७
ब्रह्मामृतरसास्वादो ब्रह्मामृतरसायनः ते.बि.४।५६
ब्रह्मामृतरसे मग्नो ब्रह्मानन्दशिवार्चनः ते.बि. ४।५७
ब्रह्मामृतं पिबेद्भैक्षमाचरेद्देहरक्षणे। वसेदेकान्तिको भूत्वा चैकान्ते [स्कन्दो. १२+ मैत्रे. २।३
(अथ) ब्रह्मा रुद्रो विष्णुरित्यभिपतिवत्स्येषा मैत्रा. ६।५
ब्रह्मा रुद्रो विष्णुरित्येकेऽन्यमभिध्यायन्त्येकेऽन्यम् मैत्रा. ४।५
ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम्। ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना [शरभो. २७+ भ.गी. ४।२४
ब्रह्मावर्ते महाभांडीरवटमूले महासत्राय समेता महर्षयः शौनकादयस्ते ह समित्पाणयस्तत्त्वजिज्ञासवो मार्कण्डेयं चिरजीविनमुपसमेत्य पप्रच्छुः केन त्वं चिरं जीवसि केन वाऽऽनन्दमनुभवसीति द. मू. १
ब्रह्मार्होऽसि गौतम यो मामुपागा एहि त्वा ज्ञपयिष्यामीति कौ. त. १।१
ब्रह्मविलोकनधियं न जहाति योगी वराहो.२।८२
ब्रह्मावलोकयंस्तद्रूपो भवति अद्वयता. १
ब्रह्मावलोकयोगपट्टः निर्वाणो. २
ब्रह्मा विष्णुश्च रुद्रश्च सर्वा वा भूतजातयः। नाशमेवानुधावन्ति सलिलानीव वाडवम् महो. ३।५२
ब्रह्मा विश्वः कतमः स्वयम्भूः प्रजापतिः संवत्सरः म.ना.१७।१२
ब्रह्मा शक्तिर्महादेवोजन्यतेपुरुषोत्तमात् सि. वि. ३
ब्रह्मा शिवो मे अस्तु सदाशिवोम् भस्मजा. २।७
ब्रह्मासाध्यं च यो गच्छेद्ब्रह्महा स प्रकीर्तितः शिवो. ७।६२
ब्रह्माऽसि पूर्णोऽसि परात्परोऽसि ते.बि. ५।६१
ब्रह्मा सृजति लोकान्वै ते.बि.५।८८
ब्रह्मास्त्रां महाविद्यां शाम्भवीं...देवीमाहूय ध्यायेत् पीताम्बरो.१
ब्रह्मास्मि नेतरकलाकलनं हि किञ्चित् अ.पू. १।६९
ब्रह्मास्मि प्रभवोऽस्म्यहम् मैत्रे. ३।१
ब्रह्माहमस्मि अहमस्मि त्रि.म.ना.८।३
ब्रह्माहमस्मि, योऽहमस्मि, ब्रह्माहमस्मि महाना.६।७
ब्रह्माहमस्मीति कृतकृत्यो भवति मं.ब्रा. ३।३
ब्रह्माहमस्मीति चिन्तयन्निदं सर्वं यदयमात्मेति भावयन्कृतकृत्यो भवति मं.ब्रा. २।८
ब्रह्माहमस्मीति तत्त्वमस्यादिवाक्यार्थस्वरूपानुसंधानं कुर्वन्नुदीचीं दिशं गच्छेत् प. हं. प. ५
ब्रह्माहमस्मीति भावयन्गुर्वर्थं ग्राममुपेत्य ध्रुवशीलोऽष्टौ मास्येकाकी चरेद्द्वावेवाचरेत् प. हं. प. ७
ब्रह्माहमिति यस्यान्तः स जीवन्मुक्त उच्यते ते.बि. ४।२
ब्रह्माहं ब्रह्म चित्क्षत्रं ब्रह्म चिन्मित्रबान्धवाः अ.पू. ५।२०
ब्रह्माहं, विष्णुरहं, सौरोऽहं, ब्राह्मोऽहम् अद्वै. भा. १
ब्रह्मा हि परः परो हि ब्रह्मा म.ना.१६।१२
ब्रह्मा हैव ता ३ इ ऊर्ध्वं त्वंवोदसर्पत् १ऐन.१।४।२
ब्रह्मेदं बृंहिताकारं बृहद्बृहदवस्थितम् अ. पू.२।३७
ब्रह्मेन्द्रमग्निं जगतः प्रतिष्ठाम्। दिव आत्मानꣳ सवितारं बृहस्पतिम्। चतुर्होतारं प्रदिशो नु क्लृप्तम्। वाचो वीर्यं तपसाऽन्वविन्दत् चित्त्यु.११।२
ब्रह्मैकमेव, ब्राह्मणत्वमेकमेव परब्र. ६
ब्रह्मैकस्त्वं द्विधा त्रिधा शांतिस्त्वं चतुर्वे. ८
ब्रह्मैतद्ब्रह्मण उज्जहार चित्त्यु.११।६
ब्रह्मैव केवलमहं परिपूर्णमस्मि वराहो.२।७३

ब्रह्मैव केवलं शुद्धं विद्यते तत्त्वदर्शने   २ आत्मो. ३
ब्रह्मैव तेन गन्तव्यं   भ.गी. ४।२४
ब्रह्मैव पुष्पं ता अमृता आपः   छांदो. ३।५।१
ब्रह्मैव ब्रह्मवित् स्वयम्   २ आत्मो. २३
ब्रह्मैव भवति, इत्याह भगवान्ब्रह्मा   शरभो. ३७
ब्रह्मैव भवति स्वयम्   कठरु. १५
ब्रह्मैव वित्तं पुरुषस्य केवलम्   इतिहा. ४४
ब्रह्मैवविद्यते साक्षाद्वस्तुतोऽवस्तुतोऽपिच   पा. ब्र. ३२
ब्रह्मैव सकलं स्वयम्   ते.बिं. ६।४३
ब्रह्मैव सन्ब्रह्माप्येति [बृह.४।४।६+   सुबा. ३।३+
[नृसिंहो. ५।२,५।५,५।८+   सहवै. २
ब्रह्मैव सर्वमित्येव भाविते ब्रह्म वै पुमान्। सर्वत्रावस्थितं शान्तं चिद्ब्रह्मेत्यनुभूयते   अ. पू. ५।२१
ब्रह्मैव सर्वनामानि रूपाणि विविधानि च। कर्माण्यपि समग्राणि बिभर्तीति विभावय   यो.शि. ४।६
ब्रह्मैव सर्वं चिन्मात्रं ब्रह्ममात्रं जगत्त्रयम्   ते. बिं.६।४२
ब्रह्मैव सर्वं नान्योऽस्ति   ते.बिं. ६।३१
[ईश्वर इति च-] ब्रह्मैव स्वशक्तिं प्रकृत्यभिधेयामाश्रित्य लोकान् सृष्ट्वा प्रविश्यांतर्यामित्वेन ब्रह्मादीनांबुद्धीन्द्रियनियन्तृत्वादीश्वरः   निरालं. ६
ब्रह्मैवान्तत उपनिश्रयति स्वां योनिं उ य एनं हिनस्ति   बृह. १।४।११
ब्रह्मैवास्मि न चेतरः   महो.२।११
ब्रह्मैवावाप्नोति   ग.शो. ३।१
ब्रह्मैवास्मि निरामयम्   अ.पू. ५।६८
ब्रह्मैवाहमस्मीति निश्चित्य निर्विकल्पसमाधिना स्वतन्त्रो यश्चरति स सन्न्यासी   निरालं.३२
ब्रह्मैवास्मीति यावृत्तिः पूरकोवायुरुच्यते   ते.बिं.१।३२
ब्रह्मैवास्मीति सद्वृत्त्या निरालम्बतया स्थितिः   ते.बिं.१।३६
ब्रह्मैवाहमस्मीति..या भाव्यते सैषा षोडशी श्रीविद्या पञ्चदशाक्षरी...   बह्वृचो.४
ब्रह्मैवाहमस्मीत्यनवरतं ब्रह्मप्रणवानुसन्धानेन यः कृतकृत्यो भवति स ह परमहंसपरिव्राट्   प.हं.प.११
ब्रह्मैवाहमिति स्मरन्...मुक्तो भवति   ना.प. ५।५०
ब्रह्मैवाहमिति ज्ञात्वावीतशोकोभवेन्मुनिः   महो.४।२९
ब्रह्मैवाहं न जीवोऽहं ब्रह्मैवाहं न भेदभूः   ते.बिं.६।३३
ब्रह्मैवाहं न देहोऽहं ब्रह्मैवाहं न गोचरः   ते.बिं. ६।३३
ब्रह्मैवाहं न संसारी ब्रह्मैवाहं न मे मनः   ते. बिं.६।३२
ब्रह्मैवाहं परात्परः   ते.बिं.६।३४
ब्रह्मैवाहं न संशयः   ते.बिं. ३।३९
ब्रह्मैवाहं सच्चिदानन्दरूपं   सर्वसारो.११
ब्रह्मैवाहं सनातनम् [ते.बिं. ३।३२+   ६।३१
ब्रह्मैवाहं सर्ववेदान्तवेद्यं नाहं वेद्यं व्योमवातादिरूपम्   सर्वसारो. ११
ब्रह्मैवेदममृतं तत्पुरस्ताद्ब्रह्मानन्दं परमं नैव पश्चात्   पा. ब्र. ३५
ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण   मुंड. २।२।११
ब्रह्मैवेदं विजृंभते   अ. पू. २।३६
ब्रह्मैवेदं विश्वमिदं वरिष्ठम्   मुण्ड.२।२।११
ब्रह्मैवेदं सर्वं सच्चिदानन्दरूपं   नृसिंहो. ७।३
ब्रह्मैवैकमनाद्यन्तमब्धिवत्प्रविजृम्भते   अ. पू. ५।१०
मनोऽन्तरिक्षलोकः प्राणोऽसौलोकः — बृह. १।५।४

मनोऽप्यन्यत्र निक्षिप्तं चक्षुरन्यत्र पातितम् । तथापि योगिनां योगो ह्यविच्छिन्नः प्रवर्तते — ब्र. वि. ४४

मनो बुद्धिरहङ्कारश्चित्तमित्यन्तःकरणचतुष्टयम् — शारीरको. २

मनोबुद्धिरहङ्कारचित्तसङ्घातका अमी । न त्वं नाहं न चान्यद्वा सर्वं ब्रह्मैव केवलम् — ते. बिं. ६।३४

मनोबुद्धिरहङ्कारश्चित्त चेति चतुष्टयम् — वराहो. १।४

मनो बुद्धिरहङ्कारः खानिलाग्निजलानि भूः । एताः प्रकृतयस्त्वष्टौ विकाराः षोडशापरे — शारीरको. १२

मनोबुद्धिसमाधानमर्थतत्त्वपरीक्षणम् । तत्त्वस्मृतेरुपस्थानात्सर्वमेतत्प्रवर्तते — आयुर्वे. १८

मनोबुद्धिस्तथैवात्मा ह्यव्यक्तं नृपसत्तम । इन्द्रियेभ्यः पराणीह चत्वारि कथितानि च — भवसं. २।२०

मनोबुद्ध्योश्चित्ताहङ्कारौ चान्तर्भूतौ — त्रि. ब्रा. १।४

मनोब्रह्मा (यज्ञस्य) [महाना.१८।१+ — गर्भो. ११

मनो ब्रह्मेति व्यजानात् — तैत्ति. ३।४

मनो ब्रह्मेत्युपासीतेत्यध्यात्मम् — ३।१८।१

मनो भित्त्वा भूतादिं भिनत्ति — सुबालो. ११।२

मनोमयज्ञानमयान् सम्यग्दग्ध्वा क्रमेण तु । घटस्थदीपवच्छश्वदन्तरेव प्रकाशते — योगकुं. ३।३२

मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽन्ने हृदयं सन्निधाय — मुण्ड. २।२।७

मनोमयः प्राणमयः (आत्मा) — बृह. ४।४।५

मनोमयः प्राणशरीरो भारूपः सत्यसङ्कल्प आत्मेति — मैत्रा. २।९

मनोमयः प्राणशरीरो भारूपः सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः — छान्दो. ३।१४।२

मनोमयः सङ्कल्पात्मा विज्ञान-
मयः कालात्माऽऽनन्दमयो
लयात्मैकत्वं नास्ति द्वैतं कुतः सुबालो. ५।१५
मनोमयेन प्राणोऽपि तथा पूर्णः
स्वभावतः। तथा मनोमयो
ह्यात्मा पूर्णो ज्ञानमयेन तु कठरु. २३
मनोमयोऽयं पुरुषो भाः सत्यं बृह. ५।६।१
मनो मारय निश्शङ्कं त्वां
प्रबध्नन्ति नारयः महो. ४।९४
मनो मे त्वयि दधानीति पिता
मनस्ते मयि दध इति पुत्रः कौ. ब. २।१५
मनो मे दिशतु वैष्णवी लक्ष्म्यु. ३
मनो मे वाचि प्रतिष्ठितं [२ ऐत. शांतिपा.
मनो यजुर्वेदः प्राणः सामवेदः बृह. १।५।५
मनो यजुः प्रपद्ये [प्रवर्ग्या. १+ वा. सं. ३६।१
मनो यज्ञस्य हंसो यज्ञसूत्रम् पा. ब्र. ३
मनोयुक्तान्तरदृष्टिस्तारक-
प्रकाशाय भवति मं. ब्रा. १।४
मनो रथः (शारीरयज्ञस्य) प्रा. हो. ४।३
मनोलयकारणमहमेव मं. ब्रा. ५।१
मनोवचोभिरग्राह्यं पूर्णात्पूर्णं
सुखात्सुखम् महो. ५।४६
मनोवशात् प्राणवायुः स्ववशे
स्थाप्यते सदा। नासिकापुटयोः
प्राणः पर्यायेण प्रवर्तते त्रि. ब्रा. २।११६
मनो वा आयतनम् बृह. ६।१।५
मनोवाक्कायकर्माणि मे शुध्यन्तां
ज्योतिरहं विरजा विपाप्मा
भूयासꣳ स्वाहा महाना. १४।१४
मनोवागगोचरम् निर्वाणो. ३
मनोवाचामगोचरं ब्रह्म त्रि. म. ना. १।३
मनोवाचामगोचरम् त्रि. म. ना. ७।७
[+अध्यात्मो. ६३ +सि. सा. ६।१
मनो वाव वाचो भूयो यथा वै द्वे
वाऽऽमलके द्वे वा कोले द्वौ
वाक्षौ मुष्टिरनुभवत्येवं वाचं च
नाम मनोऽनुभवति छान्दो. ७।३।१
मनो वाऽश्मं बुद्धिरमादा सुबालो. १४।१

मनो विकल्पसञ्जातं तद्विकल्प-
परिक्षयात्। क्षीयते दग्ध-
संसारो निःसार इति निश्चितः महो. २।३४
मनोविनाशस्तु गुरुप्रसादान्निमेष-
मात्रेण तु साध्य एव अमन. २।२९
मनोविरचितं त्यक्त्वाऽमनस्कं भज अमन. १।७
मनोविलाससंसार इति मे
निश्चिता मतिः महो. ४।६८
मनो वै ग्रहः, स कामेनातिग्रहेण
गृहीतः बृह. ३।२।७
मनो वै ब्रह्मेति बृह. ४।१।६
मनो वै यज्ञस्य ब्रह्मा, तद्यदिदं
मनः सोऽसौ चन्द्रः स ब्रह्मा
स मुक्तिः साऽतिमुक्तिः... बृह. ३।१।६
मनो वै सम्राट् परमं ब्रह्म बृह. ४।१।६
मनोव्याधेश्चिकित्सार्थमुपायं
कथयामि ते। यद्यत्स्वाभिमतं
वस्तु तत्त्यजन्मोक्षमश्नुते महो. ४।८८
मनोव्यानयोगेन त्वग्द्वारा स्पर्श-
गुणः पाण्यधिष्ठितो वायौ
तिष्ठति वायुस्तिष्ठति त्रि. ब्रा. १।६
मनोऽस्मात्सर्वाणि ध्यातान्य-
भिविसृजते कौ. ब्र. ३।४
मनोऽस्य दैवं चक्षुः स वा एष
एतेन दैवेन चक्षुषा मनसै-
तान्कामान्पश्यन्रमते छान्दो. ८।१२।५
मनोऽहङ्कार एव च ते. बिं. ५।१००
मनो ह वा आयतनम् छान्दो. ५।१।५
मनो ह वाव यजमान इष्टफलमेवो-
दानः स एनं यजमानमहरह-
र्ब्रह्म गमयति प्रश्नो. ४।४
मनो हविः स्तिु. ६।१
मनोऽहं गगनाकारं मनोऽहं सर्वतो-
मुखम्। मनोऽहं सर्वात्मा च
न मनः केवलः परः यो. शि. ६।६०
मनो हिङ्कारो वाक्प्रस्तावश्चक्षु-
रुद्गीथः श्रोत्रं प्रतिहारः प्राणो
निधनमेतद्गायत्रं प्राणेषु प्रोतं छान्दो. २।११।१

मनो हि द्विविधं प्रोक्तं–शुद्धं चाशुद्धमेव च । अशुद्धं कामसङ्कल्पं (ल्पात्) शुद्धं कामविवर्जितम्	ब्र. विं. १
[+ त्रि. ता. ५।२+	मैत्रा. ६।३४
मनो हि ब्रह्म मन उपास्व	छान्दो. ७।३।१
मनो हि विजिज्ञास्यं	बृह. १।५।९
मनो होच्चक्राम तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति	बृह. ६।१।११
मनो हृदि निरुध्य च	भ. गी. ८।१२
मनो ह्यात्मा, मनो हि लोको मनो ब्रह्म, मन उपास्वेति	छान्दो. ७।३।१
मन्तव्यमेवाप्येति मन्तव्यमेवास्तमेति	सुबालो. ९।१०
मन्त्रकल्पो ब्राह्मणमृग्यजुस्सामाथर्वाण्येषा व्याहृतिश्चतुर्णां वेदानामानुपूर्व्येण	२ प्रणवो. १८
मन्त्रपूतं तु यच्छ्राद्धममन्त्राय प्रयच्छति (छिन्दन्ति दातृहस्तं च जिह्वामितरस्य च)	इतिहा. २७,२८
मन्त्रमित्युच्यते ब्रह्मन् मदधिष्ठानतोऽपि वा । मूलत्वात् सर्वमन्त्राणां मूलाधारसमुद्भवात् ...मूलमन्त्र इति स्मृतः	यो. शि. २।८-९
मन्त्रयोगो लयश्चैव राजयोगो हठस्तथा । योगश्चतुर्विधो प्रोक्तो योगिभिस्तत्त्वदर्शिभिः	योगराजो. १,२
मन्त्रराजाय विद्महे महामन्त्राय धीमहि । तन्नो मन्त्रः प्रचोदयात्	वनदु. १५२
मन्त्रहीनमदक्षिणम्	भ. गी. १७।१३
मन्त्रं विना कर्म कुर्याद्भस्मन्याहुतिवद्भवेत्	ना. प. ३।८
मन्त्राणांपरमोमन्त्रस्तारेतिपरमा तारा सा देवतानां च देवता	तारोप. १३
मन्त्राणां मातृका देवी	देव्यु. २१
मन्त्राणा॰सङ्कॢप्त्यै कर्माणि सङ्कल्पन्ते कर्मणा॰ संकॢप्त्यै लोकः सङ्कल्पते	छान्दो. ७।४।२
मन्त्रानधीयीतेत्यथाऽधीते कर्माणि कुर्वीतेत्यथ कुरुते पुत्रा॰श्च पशू॰श्चेच्छेयेत्यथेच्छत इमं च लोकममुं चेच्छेयेत्यथेच्छते	छान्दो. ७।३।१
मन्त्राश्च मामभिमुखीभवेयुः	२ प्रणवो. ४
मन्त्रोपनिषदं ब्रह्म पदक्रमसमन्वितम् । पठन्ति भार्गवा ह्येते ह्यथर्वाणो भृगूत्तमाः	मन्त्रिको. १०
मन्त्रो लयो हठो राजयोगोऽन्तर्भूमिकाः क्रमात् । एक एव चतुर्धाऽयं महायोगोऽभिधीयते	यो. शि. १।१२९
मन्त्रोऽहमहमेवाज्यं	भ. गी. ९।१६
मन्थे स॰स्रवमवनयति	बृह. ६।३।२
मन्दं परिहरन्कर्म स्वदेहमनुपालयेत् । वर्षासु जीर्णकटवत्तिष्ठन्नप्यवसीदति	शिवो. ७।१२४
मन्मथक्षेत्रपालाः	निर्वाणो. १
मन्मना भव मद्भक्तः [भ.गी.९।३४+	१८।६५
मन्मना मय्याहितासुर्मय्येवार्पिताखिलकर्मा भस्मदिग्धाङ्गो रुद्राक्षभूषणो मामेव सर्वभावेन प्रपन्नो मदेक-पूजा-निरतः सम्पूजयेत्	भस्मजा. २।१०
मन्मया मामुपाश्रिताः	भ. गी. ४।१०
मन्यन्तां संशयापन्ना न मन्येऽहमसंशयः	१ अवधू. १६
मन्यते तमसाऽऽवृता	भ. गी. १८।३२
मन्यते नाधिकं ततः	भ. गी. ६।२२
मन्यन्ते मामबुद्धयः	भ. गी. ७।२४
मन्यसे यदि तच्छक्यं	भ. गी. ११।४
मन्युरकार्षीन्मन्युः करोति, नाहं करोमि	महाना. १४।४
मन्युरिन्द्रो मन्युरेवास देवो मन्युर्होता वरुणो जातवेदाः	वनदु. १०१
[+ऋ.मं.१०।८३।२+	अथर्व. ३।२।२
मन्युः कारयिता नाहं कारयिता	महाना. १५।४
मन्युः कर्ता, नाहं कर्ता	महाना. १४।४
मन्युः पशुः (यज्ञस्य)	महाना. १८।१

मन्येऽहं मां तद्विद्वांस माहं पौत्र-
मघं रुदमिति न ह्यस्मात्पूर्वाः
प्रजाः प्रैति — कौ. उ. २।१०
मन्वानो वै तत्र मनुते — बृह. ४।३।२८
मम चरणस्मरणेन पूजया च
स्वकृतमसः परिमुच्यते हि जन्तुः — वराहो. ३।१२
मम जातरूपं तेजो दर्शय दर्शय — चाक्षुषो. २
मम तेजोंऽशसम्भवम् — भ. गी. १०।४१
ममत्वेनभवेज्जीवोनिर्ममत्वेनकेवलः — यो. चू. ८४
मम देहे गुडाकेश — भ. गी. ११।७
मम पुत्रो मम धनमहं सोऽयमिदं
मम । इतीयमिन्द्रजालेन
वासनैव विवल्गति — महो. ४।१२९
मम प्रतिष्ठा भुव आण्डकोशा
विचैमि सं च हि नु यो विदश्वी — वा. मं. ९
मम प्रसादं कुरु कुरु — लाङ्गूलो. ६
मम प्रियेण बिल्वेन त्वं कुरुष्व
मदर्चनम् — १ बिल्वो. ४
मम भूतमहेश्वरम् — भ. गी. ९।११
मम माया दुरत्यया — भ. गी. ७।१४
मम यशसा विरजां वा अयं नदीं
प्रापन्न वायं जिगीष्यतीति — कौ. उ. १।३
मम योनिरप्स्वन्तःसमुद्रे । य
एवं वेद स दैवीपदमाप्नोति — देव्यु. ४
मम योनिर्महद्ब्रह्म — भ. गी. १४।३
मम यो वेत्ति तत्त्वतः — भ. गी. १०।७
मम रूपमिति ज्ञेयं सर्वरूपं तदेव हि — १ बिल्वो. ६
मम रूपा रवेस्तेजश्चन्द्रनक्षत्र-
महतेजांसि च — पा. ब्र. २
मम वचमसुवेनावभावै कात्यायनाय — महाना. ६।१२
मम वर्त्मानुवर्तन्ते [भ.गी.३।२३+ ४।११
मम वशानि सर्वाणि युगान्यपि — पा. ब्र. २
मम समिद्धेऽहौषीः प्राणापानौ त
आददेऽसाविति (जुहुयात्) — बृह. ६।४।१२
मम समिद्धेऽहौषीः पुत्रपशूं त
आददेऽसाविति (जुहुयात्) — बृह. ६।४।१२
मम समिद्धेऽहौषीरिष्टासुकृते त
आददेऽसाविति — बृह. ६।४।१२
मम समिद्धेऽहौषीराशापराकाशौ
त आददेऽसाविति (जुहुयात्) — बृह. ६।४।१२
मम सर्वकार्याणि साधय साधय — लाङ्गूलो. ६
मम साधर्म्यमागताः — भ. गी. १४।२
ममाकर्तुरलेपस्य यथारब्धं प्रवर्ततां — १ अवधू. २२
(ॐ) ममाग्रतः सदा विष्णुः
पृष्ठतश्चापि केशवः । गोविन्दो
दक्षिणे पार्श्वे वामे च मधुसूदनः — विष्णुहृ. १।१
ममाऽऽत्मा भूतभावनः — भ. गी. ९।५
ममाव्ययमनुत्तमम् — भ. गी. ७।२४
ममेति द्व्यक्षरं मृत्युस्त्र्यक्षरं न
ममेति च — शिवो. ७।११५
ममेति बध्यते जन्तुर्निर्ममेति विमुच्यते — पैङ्गलो. ४।२०
[महो. ४।७२+वराहो.२।४४+ शिवो. ७।११४
ममैवांशो जीवलोके — भ. गी. १५।७
ममूला भवन्ती त्वासादयामि — चित्त्यु. १९।१
मया ततमितीदमश्रुते तद्यथा-
सद्यदि मे असद्विदुः — वा. मं. १९
मया ततमिदं सर्वं — भ. गी. ९।४
मयाऽतिरिक्तं यत्तद्वा तत्तन्नास्तीति
निश्चिनु । अहं ब्रह्मास्मि सिद्धो-
ऽस्मि नित्यशुद्धोऽस्म्यहं सदा — ते. बिं. ३।२०
मया दृष्टमिति प्रभो — भ. गी. ११।४
मयाऽध्यक्षेण प्रकृतिः — भ. गी. ९।१०
मया प्रमादात्प्रणयेन वाऽपि — भ. गी. ११।४१
मया प्रसन्नेन तवार्जुनेदं — भ. गी. ११।४७
मया भूतं चराचरम् — भ. गी. १०।३९
मया हतांस्त्वं जहि मा व्यथिष्ठाः — भ. गी. ११।३४
मयि चानन्ययोगेन — भ. गी. १३।११
मयि जीवत्वमीशत्वं कल्पितं
वस्तुतो नहि। इति यस्तु वि-
जानाति स मुक्तो नात्र संशयः — सरस्व. ६७
मयि तेज इन्द्रियं यशो द्रविणं सुकृतं — बृह. ६।४।६
मयि ते तेऽपि चाप्यहम् — भ. गी. ९।२९
मयि प्राणांस्त्वयि मनसा जुहोमि
स्वाहा — बृ. उ. ६।४।२४
मयि बुद्धिं निवेशय — भ. गी. १२।८

मयि मेधां मयि प्रज्ञां मयि सूर्यो भ्राजो दधातु   महाना. १३।६
[तै. सं. ३।३।१।२+   तै.आ.४।४२।२
मयि मेधां मयि प्रज्ञां मयीन्द्र इन्द्रियं दधातु   महाना. १३।६
मयि मेधां मयि प्रज्ञां मय्यग्निस्तेजो दधातु   महाना. १३।६
मयि सन्न्यस्य मत्परः   भ. गी. १८।५७
मयि सन्न्यस्य मत्पराः   भ. गी. १२।६
मयि सर्वमिदं प्रोतं   भ. गी. ७।७
मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम्   कैव. १९
मयि सर्वं प्रतिष्ठितम्   कैव. १९
[+भस्मजा. २।६+   २।१३
मयि सर्वाणि कर्माणि   भ. गी. ३।३०
मयैव चेतनेनेमे सर्वे घटपटादयः । सूर्यान्ता अवभासन्ते दीपेनेवात्मतेजसा   १ सं. सो. २।२२
मयैव विहितान्हि तान्   भ. गी. ७।२२
मयैवैताः स्फुरन्तीह विचित्रेन्द्रियवृत्तयः । तेजसाऽन्तःप्रकाशेन यथाऽग्निकणपङ्क्तयः   १ सं. सो. २।२३
मयैवैते निहताः पूर्वमेव   भ. गी. ११।३३
मयोपदिष्टे कैवल्ये साक्षाद्ब्रह्मणि शाश्वते । विहाय पुत्रो निर्वेदात्प्रकाशं यास्यति स्वयम्   शु. र. १।४
मयो मह्यमस्तु प्रतिगृहीत्रे   चित्यु. १०।१,४
मय्यखण्डसुखाम्भोधौ बहुधा विश्ववीचयः । उत्पद्यन्ते विलीयंते मायामारुतविभ्रमात्   कुं. उ. १४
मय्यग्नौ स्वात्मानं हविर्ध्यायेन तथैवानुष्टुमर्चा । ध्यानयोगोऽयमेव   अव्यक्तो. ४
मय्ययमग्निर्दधातु   चित्यु. ११।८
मय्यर्पितमनोबुद्धिः [भ.गी. ८।७   +१२।१४
मय्यावेशितचेतसाम्   भ. गी. १२।७
मय्यावेश्य मनो ये मां   भ. गी. १२।२
मय्यासक्तमनाः पार्थ   भ. गी. ७।१
मय्येव मन आधत्स्व   भ. गी. १२।८

मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम्   कैव. १९
मरणं न तु वायोश्च भयं भवति योगिनः   १ यो. त. ९७
मरणं यत्र सर्वेषां तत्रासौ परिजीवति । यत्र जीवन्ति मूढास्तु तत्रासौ मृत एव वै   यो. शि. १।४६
मरणं यदि चेज्जन्म जन्माभावे मृतिर्न च   ते. बिं. ५।२४
मरणादतिरिच्यते   भ. गी. २।३४
मरणे सम्भवे चैव गत्यागमनयोरपि । स्थितो सर्वशरीरेषु आकाशेनाविलक्षणः   अद्वैत. ९
मरीचयः स्वायम्भुवः   अरुणो. १
मरीचयोऽर्कस्यास्तं गच्छतः सर्वा एतस्मिंस्तेजोमण्डल एकीभवन्ति । ताः पुनः पुनरुदयतः प्रचरन्त्येवं ह वै तत्सर्वं परे देवे मनस्येकीभवन्ति   प्रश्नो. ४।२
मरीचिर्मरुतामस्मि   भ. गी. १०।२१
मरीचीनां पदमिच्छन्ति वेधसः
[चित्यु. ११।११+   १३।२
मरुज्जयो यस्य सिद्धः सेवयेत्तं गुरुं सदा   यो. शि. १।८०
मरुतः प्राणैरिन्द्रं बलेन बृहस्पतिं ब्रह्मवर्चसेन...   सहवै. २२
मरुतः सदो हविर्धानाभ्यां   चित्यु. ८।१
मरुतामेव तावदाधिपत्यꣳ स्वाराज्यं पर्येता   छान्दो. ३।९।४
मरुतामेवैको भूत्वा सोमेनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति   छान्दो. ३।९।३
मरुतो जगती सप्तदशो वै रूपं वर्षा अपानः शुक्र आदित्याः पश्चादुद्यन्ति   मैत्रा. ७।३
मरुत्वन्तं वृषभं वावृधान- [ऋ.सं. ३।४७।५+
[६।१९।११+   शौनको. ४
[वा.सं.७।३६+तै.सं.१।४।१७।१

मरुदभ्यसनंसर्वमनोयुक्तंसमभ्यसेत्। इतरत्र न कर्तव्या मनोवृत्तिर्मनीषिणा — शांडि. १।७।३७

मरुभूमौ जलं सर्वं मरुभूमात्रमेव तत् [महो. ४।८४+ — वराहो. २।७२

मर्कट एनमास्कन्दयति (दुःस्वप्ने) — २ ऐत. २।४।७

मर्त्ये चामृतं च स्थितं च यच्च सच्च त्यच्च — बृह. २।३।१

मर्त्ये नास्त्यमृतं कुतः — सुबालो. ५।१०

मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति। जात एव न जायते को न्वेनं जनयेत्पुनः — बृह ३।९।३१

मर्त्यं वा इदꣳ शरीरमात्तं मृत्युना — छांदो. ८।१२।१

मर्त्यानि हीमानि शरीराणी ३ अमृतैषा देवता... — १ ऐत. १।८।४

मर्त्येनामृतमीप्सत्येवं सम्पन्नः — १ ऐत. ३।२।३

मलं त्यजेत्कुहूर्नाडी मूत्रं मुञ्चति वारुणी — यो. शि. ५।२६

मलं संवेद्यमुत्सृज्य मनो निर्मूलयन् परम्। आशापाशानलं छित्त्वा संविन्मात्रपरोऽस्म्यहम् — १ सं. सो.२।४८

मलिना (वासना) जन्महेतुःस्याच्छुद्धा जन्मविनाशिनी — मुक्तिको. २।६१

मलिना वासना यैषा साऽसङ्ग इति कथ्यते — अ. पू. ।५

मशकेन कृतं युद्धं सिंहौघैरणुकोटरे — महो. ४ ६४

मशकेन हतेसिंहेजगत्सत्यं तदास्तु ते — ते. बि. ६।८६

मस्तकस्थामृतास्वादं पीत्वा ध्यानेन सादरम्। दीपाकारं महादेवं ज्वलन्तं नाभिमध्यमे। अभिषिच्यामृतेनैव हंस हंसेति यो जपेत्। जरामरणरोगादि न तस्य भुवि विद्यते — ब्र. वि. २२

मस्तिष्कादूर्ध्वं प्रेरयत्पवमानोऽधिशीर्षतः। तद्वा अथर्वणः शिरो देवकोशः समुज्झितः — अ. शिरः. ३।१४

मह इति चन्द्रमाः — तैत्ति. १।५।२

मह इति ब्रह्म — तैत्ति. १।५।३

मह इति ब्रह्मणि — तैत्ति. १।६।२

मह इति महर्लोकः — गायत्रीर. २

मह इत्यन्नम्। अन्नेन वाव सर्वे प्राणा महीयन्ते — तैत्ति. १।५।३

मह इत्यादित्यः। आदित्येन वाव सर्वे लोका महीयन्ते — तैत्ति. १।५।२

महच्छैलेन्द्रनीलं वा सम्भवेचेदिदं जगत्। मेरुरागत्य पद्माक्षे स्थितश्चेदस्त्विदं जगत् — ते. बि. ६।८५

महल्लोकभयं प्राप्ताः स्मो न चैतत्सर्वैः समभिहितं ते वयं भगवन्तमेवोपधावाम — २ प्रणवो. १९

महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषात्तु परा देवी सा काष्ठा सा परा गतिः — गुह्यका. ४२

महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः — कठो. ३।११

महता दुःखेन जातमात्रस्तु वैष्णवेन वायुना संस्पृष्टस्तदा न स्मरति जन्ममरणानि न च कर्म शुभाशुभं विन्दति — गर्भो. १०

महतां च लोकं परं च लोकं दहति — सुबालो. १५।२

महतां वा अयं महात्रोदसी व्याप्य स्थितः — अव्यक्तो. ३

महति स्यन्दने स्थितौ — भ. गी. १।१४

महति श्रूयमाणे तु महाभेर्यादिकध्वनौ। तत्र सूक्ष्मं सूक्ष्मतरं नादमेव परामृशेत् — ना. बि. ३६

महतीं श्रियमश्नुते — नृ. पू. ३।२

महती ज्ञानसंपत्तिः शुचिर्धारणतः सदा (रुद्राक्षाणां) — रु. जा. ९

महतो महत्तरं (ब्रह्म) — त्रि. म. ना. ७।७

महतोऽव्यक्तमुत्तमम् — कठो. ६।७

महतोऽहङ्कारः [+त्रि.म.ना.२।५+ [त्रि. ब्रा. १।३+ — गोपालो. २।१३

महत्तरा महिमा देवतानाम् — त्रि. महा. १

महत्पदमत्रैतत्समर्पितम् — मुण्ड. २।२।१

महत्पदमत्रैतत्सर्वमर्पितम् (मा.पा.) — मुण्ड. २।२।१

महत्पदं ज्ञात्वा वृक्षमूले वसेत — सुबालो. १३।२

महत्यज्ञानतमसि मग्नो जरामरण.. द्वंद्वैरभिभूयमानः...निर्मुच्यते निरुक्तो. २।२
महत्त्वं जडत्वं काठिन्यं विद्यते यस्मिन्नक्षतेरेतन्महि लकारः परं धाम त्रि. ता. १।८
महत्त्वान्महत्त्वान्मानत्वान्मुक्तत्वान्महादेवत्वात्...सच्चिदानन्दमात्रः स स्वराट् भवति नृसिंहो. ७।१
महदव्यक्तेऽव्यक्तं पुरुषे क्रमेण विलीयते पैङ्गलो. ३।४
महदहङ्कार-पृथिव्यप्तेजोवाय्वाकाशत्वेन बृहद्रूपेणाण्डकोशेन कर्मज्ञानार्थरूपतया भासमानमद्वितीयमखिलोपाधिविनिर्मुक्तं... चैतन्यं ब्रह्म निरा. ५
महदहङ्कृतितमोभिश्च मूलप्रकृत्या परिवेष्टितं (ब्रह्माण्डं) त्रि. म. ना. ६।२
महदादि जगन्मायामयं मत्त्वेव केवलम् वराहो. ३।१५
महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति कठो. ६।२
महदेहा जिह्वया भुवं लिहानाः दंष्ट्राभ्यामाकाशा महच्छब्दाः (प्राणिनः) ब्रह्माणं हंतुमुद्युक्ताः ग. शो. ३।६
महर्षयः सप्त पूर्वे भ. गी. १०।६
महर्षिवेद्यं अन्तर्बहिरिन्द्रियैरदृश्यम् मं. ब्रा. १ ४
महर्षीणां च सर्वशः भ. गी. १०।२
महर्षीणां भृगुरहं भ. गी. १०।२५
महः पुच्छं प्रतिष्ठा तैत्ति. २।४
महान् इन्द्रो वज्रबाहुः षोडशी महाना. ५।८
महाकर्ता महाभोक्ता महात्यागी भवानघ अ. पू. १।१८
महाकालाय विद्महे स्मशानवासिने धीमहि । तन्नो रुद्रः प्रचोदयात् पारायणो. १
महाखरो वा सिंहेन युद्ध्यते चेज्जागत्स्थितिः तै. बिं. ६।९२
महाखरो गजगति गतश्चेज्जागद्गस्तु तत् तै. बिं. ६।९३
महाचमस्यः प्रवेदयते तैत्ति. १।५।१
महाचिदेकैवेहास्ति महासत्तेति योच्यते अ. पू. ५।५५
महात्मनश्चतुरो देव एकः छांदो. ४।३।६
महात्मानस्तु मां पार्थ भ. गी. ९।१०
महात्रिपुरसुन्दरी वै प्रत्यक् चितिः बह्वृचो. २
महात्रिपुरसुन्दरी बहिरन्तरनुप्रविश्य स्वयमेकैव विभाति बह्वृचो. २
महादेवमन्तःपार्श्वेनोषिष्ठहनुशिश्नीनिकोशाभ्याम् चित्यु. २१।१
महादेवे त्रिपुण्ड्रस्य धारणे भस्मकुण्ठने । पुण्यलेशविहीनस्य श्रद्धा नैव प्रजायते भि. शि. ५
महादेवो भगवान्नन्दिकेशः षडाननस्तुम्बुरुर्नारदश्च । सरस्वती पर्वत-श्चित्रकेतु-र्हाहाहूहूश्चेति गाने रसज्ञाः गान्धर्वो. १०
महादेव्यै च विद्महे विष्णुपत्न्यै (त्न्यैं)च धीमहि । तन्नो लक्ष्मीः प्रचोदयात् [ना.पू. ता.४।३+ वनदु. १२५
महाधियः शान्तधियो ये याता विमनस्कतां... महो. ५।६१
महानग्निः काष्ठमार्द्रं च शुष्कं कृत्वा दहेदीश्वरोत्कृष्टबुद्धिः । दहेत्पापान्याशु विज्ञानदात्री न संसारे मज्जते वा कदाचित् सि. शि. ४
महानन्दमुदकमुपस्पृश्यापोऽवगाह्य... सूर्यता. १।८
महानदीपूर्मय इवानिवर्तकमस्य यत्पुराकृतम् मैत्रा. ४।२
महानरकसाम्राज्ये मत्तदुष्कृतवारणाः । आशाशरशलाकाढ्या दुर्जया हीन्द्रियारयः महो. ५।७६
महानवोऽयं पुरुषो योऽङ्गुष्ठाग्रे प्रतिष्ठितः । तमद्भिः परिषिञ्चामि सोऽस्यान्ते अमृताय च प्रा. हो. २।२
महानव्यक्ते विलीयतेऽव्यक्तमक्षरे विलीयते, अक्षरं तमसि विलीयते, तमः परे देव एकीभवति सुबालो. २।२
महानहं विश्वमहं विचित्रम् कैव. २।१
महानुकम्पासिन्धुर्बन्धुर्भुवनस्य गोप्ता हेरम्बो. २

महान्कीर्त्यैर्तुं न निन्देत्तद्व्रतम् छांदो. २।१६।२
महान्कीर्त्या तपन्तं न निन्देत्तद्व्रतम् छांदो. २।१४।२
महान्कीर्त्या न काञ्चन परिहरेत्तद्व्रतम् छांदो. २।१३।२
महान्कीर्त्या न प्रत्यङ्ङग्निमाचामेन्न निष्ठीवेत्तद्व्रतम् छांदो. २।१२।२
महान्कीर्त्या पशून्न निन्देत्तद्व्रतम् छांदो. २।१८।२
महान्कीर्त्या ब्राह्मणान्न निन्देत्तद्व्रतम् छांदो. २।२०।२
महान्कीर्त्या महामनाः स्यात्तद्व्रतम् छांदो. २।११।२
महान्कीर्त्यालोकान्न निन्देत्तद्व्रतम् छांदो. २।१७।२
महान्कीर्त्या वर्षन्तं न निन्देत्तद्व्रतम् छांदो. २।१५।२
महान्कीर्त्या संवत्सरं मज्ज्ञो नाश्नीयात्तद्व्रतम् छांदो. २।१९।२
महान्प्रजया पशुभिर्भवति [छांदो. २।११।२–२।२०।२
महान्तमस्य महिमानमाहुः, अनश्नमानो यदनश्नमस्तीति वै वयं ब्रह्मचारिन्नेदमुपास्महे छांदो. ४।३।७
महान्तं दहत्यव्यक्तं दहत्यक्षरं दहति मृत्युं दहति मृत्युर्वै परे देव एकीभवति सुबालो. १५।२
महान्तं भिनत्ति, महान्तं भित्त्वाऽव्यक्तं भिनत्त्यव्यक्तं भित्त्वाऽक्षरं भिनत्त्यक्षरं भित्वा मृत्युं भिनत्ति, मृत्युर्वै परे देव एकीभवति सुबालो. ११
महान्तममहान्तं विष्णुमविष्णुं... नमाम्यनमाम्यहमनहं नृसिंहानुष्टुभैव बुबुधिरे नृसिंहो. ६।१
महान्तं विभुमात्मानं मत्वा धीरो न शोचति [कठो.२।२१+४।४+ ना. प. ९।१५
महान्धकार इव रागान्धमिन्द्रजालमिव मायामयं मैत्रा. ४।२
महान् प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तकः श्वेताश्व. ३।१२
महान् भवति तैत्ति. ३।१०।३
महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन महान्कीर्त्या तैत्ति. ३।६
महान् भोगः प्रजापतेः चित्त्यु. १४।४
महान् वा अस्य महिमा शौनको. १।४

महापातकपापिष्ठसङ्गत्या सञ्चितं च यत् । नाशयेत्तत्कथालापशयनासनभोजनैः रामो. ५।१७
महापातकयुक्तानां पूर्वजन्मार्जितागसाम् । त्रिपुण्ड्रोद्धूलनद्वेषो जायते सुदृढं बुधाः बृ. जा. ५।११
महापातकात्पूतो भवति मुद्गलो. ५।१
महापातालपादान्तलम्बा तस्या जयं स्मरेत् । ब्रह्माण्डार्धे कपालं हि शिरस्तस्या विभावयेत् गुह्यका. ८
(अथ) महापीठे सपरिवारं समेतं चतुस्समप्रातमानं चतुरात्मानं मूलामात्रमिरूपं प्रणवं संध्यायात् नृसिंहो. ३।४
महापुरुष आत्मानं चतुर्धा कृत्वा त्रिपादेन परमे व्योम्नि चासीत मुद्गलो. २।४
महापुरुषइनियमवोचाम संवत्सरव्रत ३ गेत. २।३।१
महापुरुषोपेनं यो वेद स एव नित्यपूतस्थः लिङ्गोप. २
महापुरुषो यश्चित्तं तत्सदा मध्ये वावतिष्ठते प. हं. २
महापुरुषो यस्तच्चित्तं मध्येव तिष्ठते तुरीया.३
महाप्रथमान्तार्थस्याद्यन्तवन्तो द्वितीयान्तार्थस्याद्यं परं तृतीयान्तार्थस्याद्यं नाम चतुर्थ्यन्तार्थस्याद्यं साम जानीते सोऽमृतत्वं च गच्छति नृ. पू. १।६
महाप्रलयसम्पत्तौ ह्यसत्तां समुपागते । अशेषदृश्ये सर्गादौ शान्तमेवावशिष्यते मुण्डो. ४।५५
महाबाहो बहुबाहूरुपादं भ. गी. ११।२३
महाभारतमाख्यानं कुरुक्षेत्रं सरस्वतीम् । केशवं गां च गङ्गां च कीर्तयन्नावसीदति विष्णुहृ. १।८
महाभूतानि प्रयाजाः प्रा. हो. ४।२
महाभूतान्यहङ्कारः भ. गी. १३।६
महाभूतैः पंचभिरावृतं महदहंकृतितमोभिश्च मूलप्रकृत्या परिवेष्टितम् (ब्रह्माण्डं) त्रि. म. ना. ६।२

महामूलोत्थसूक्ष्माङ्गोपाधिकाः सर्वे जीवा इत्येके वदन्ति त्रि. म. ना. ४।९
महामनुपमुग्रं तदिति ब्रह्म शाश्वतम् त्रि. ता. १।५
महामायं महाविभूति सच्चिदानन्दमात्रमेकरसं पुरमेव ब्रह्म मकारेण जानीयात् नृसिंहो. ५।७
महामाया महालक्ष्मीर्महादेवी सरस्वती । आधारशक्तिरव्यक्ता यया विश्वं प्रवर्तते यो. शि. २।११
महामुद्रा नभोमुद्रा ओड्याणं च जलन्धरम् । मूलबन्धं च यो वेत्ति स योगी मुक्तिभाजनम् यो. चू. ४५
महामुद्रा महाबन्धो महावेधश्च खेचरी १ यो. त. २६
महामेघं वा मरीचिरिव पश्येत्, तदप्येतमेव विद्यात् ३ ऐत. २।४।६
महायोगेश्वरो हरिः भ. गी. ११।९
महाराज बृहद्रथेक्ष्वाकुवंशध्वजशीर्षात्मज्ञः कृतकृत्यस्त्वं मरुन्नाम्नोविश्रुतोऽसीत्ययंखल्वात्मातेकतमोभगवान्वर्ण्येइति मैत्रे. १।५
महारात्र उषस्युदिते व्रज ४- स्तिष्ठन्नासीनः शयानोऽरण्ये ग्रामे वा यावत्तरस ४ स्वाध्यायमधीतेसर्वाँल्लोकाञ्जयति सहवै. १९
महालक्ष्मीर्महादेवी सर्वलोकैकमोहिनी ना. पू. ता. २।२
महालक्ष्मीर्मूलप्रकृतिर्भवति ना. पू. ता. २।४
महालक्ष्मीश्च विद्महे सर्वसिद्धिश्च धीमहि । तन्नो देवी प्रचोदयात् देव्यु. ९
महालीलास्थानं क्षराक्षराभ्यामधिकं पुरुषोत्तमाभिधानम् सामर. ५
महावाक्यत्रयं भवेत् गुह्यका. ८०
महावाक्यान्युपदिशेत्सषडङ्गानि देशिकः शु. र. ३।१५
महावाक्यार्थतो दूरो ब्रह्मास्मीत्यतिदूरतः ते. बिं. ५।५
महावाक्यार्थमनुस्मरन् ब्रह्माहमस्मि अहमस्मिब्रह्माहमस्मियोऽहमस्मि ब्रह्माहमस्मि अहमेवाहं मां जुहोमि स्वाहा त्रि. म. ना. ८।३
महाविज्ञानमिव प्रतिपदेनाध्यवसायमिव यत्रैतदित्येत्त्येत्यभिपश्यति आर्षे. ९।१
महाविद्या जगन्माता मुनीनां मोक्षदायिनी ना. पू. ता. २।३
महाविद्यावतां पुंसां मनःक्षोभं करोति यः । सप्तरात्रौ व्यतीतायां सवशत्रुर्विनश्यति वनदु. ९६
महाविभूति सच्चिदानन्दमात्रमेकरसं पुरमेव ब्रह्म मकारेण जानीयात् नृसिंहो. ५।७
महाविष्णुमहेशानां प्रलयेष्वपि योगिनाम् । नास्ति पातो लयस्थानां महातत्त्वेऽपि वर्तिनाम् अमन. १।८३
महाविष्णुमित्याह—महतां वा अयं महान्रोदसी व्याप्य स्थितः अव्यक्तो. ३
महाविष्णुं तृतीयं स्थानं(जानीयात्) नृ. पू. २।३
महाविष्णोरेकैकरोमकूपान्तरेष्वनन्तकोटिब्रह्माण्डानि सावरणानि भवन्ति त्रि. म. ना. ६।३
महाविष्णोश्च देवस्य तत्सूक्ष्मं रूपमुच्यते यो. शि. ५।३४
महाविष्णोः करतले विलसंत्यनन्तकोटिब्रह्माण्डानि त्रि. म. ना. ६।३
महाविष्णोः क्रीडाशरीररूपिणी ब्रह्मादीनामगोचरा (महामाया) त्रि. म. ना. ४।९
महाव्याहृतिभिः सन्धाय गायत्रीं जपेत् सन्ध्यो. २
महाशनो महापाप्मा भ. गी. ३।३७
महाशून्यं ततो याति सर्वसिद्धिसमाश्रयम् सौभाग्य. १३
महाश्मशानेऽप्यानन्दवने वासः निर्वाणो. ४
महाश्रेयांसि सेवन्ते त्रि.म.ना. ८।७
महासिद्धान्तः निर्वाणो. ४

महास्थूलं महासूक्ष्मे महासूक्ष्मं महाकारणे च संहृत्य मात्राभिरोतानुज्ञात्रनुज्ञाविकल्परूपं चिन्तयन् ग्रसेत् नृसिंहो. ३।४
महाहविर्होता चित्त्यु. ५।१
महिमान एवैषामेते त्रयः त्रिंशत्त्वेव देवा इति बृह. ३।९।२
महिमानमस्या वक्तुं स्वायुर्मानेनापि वक्तुं न चोत्सहे राधिको. ५
महिमानं त्वमुष्येह पश्यामीति यदिदमस्मिन्नन्वायत्तमिति आर्षे. २।२
महिमानं स्वेवास्योपासे, य एतदस्मिन्नन्तर्हिरण्मयः पुरुषो हिरण्यवर्णो हिरण्यश्मश्रुरानखाग्रेभ्यो दीप्यमान इव.. आर्षे. ६।२
महिमानं स्वेवास्योपासे यदिदमत्रान्वायत्तमिति आर्षे. ४।२
महिम्न एवाप्नोति सर्वमायुरेति वसीयान् भवति आर्षे. ८।२
महिम्नः पश्येमाविज्ञान इति आर्षे. ८।१
महिषीत्युच्यते भार्या भगेनोपार्जितं धनम् । तद्द्रव्यमुपजीवन्यः स वै माहिषिकः स्मृतः इतिहा. ६९
महीत्यनेनाशेषं काम्यं रमणीयं द्वयं शक्तिकूटं स्पष्टीकृतमिति त्रि. ता. १।१५
महेश्वरत्वान्महासत्त्वान्महाचित्वात्महानन्दत्वान्महाप्रभुत्वाच्च मकारार्धेनानेनात्मनैकीकुर्यात् नृसिंहो. ७।१
(सौः) महो अर्णः सरस्वती प्रचेतयति केतुना । धियो विश्वा विराजति सरस्व. १४
[ऋ. मं. १।३।१२+ वा. सं. २०।६
महोरगदष्ट इव विपदष्टं (भूतात्मानं) मैत्रा. ४।२
महोल्काय वीरोल्काय वृद्धोल्काय पृथूल्काय विद्युदुल्काय ज्वलदुल्काय च षडङ्गकल्पिता नमः स्वाहा वषड्वौषट्पदान्ता अङ्गन्यासा भवन्ति ना. पू. ता.४।११
मह्यमिन्द्रो नियच्छतु चित्त्यु. ११।७
मंस्यन्ते त्वां महारथाः भ. गी. २।३५
मा कर्मफलहेतुर्भूः भ. गी. २।४७
मा खेदं भज हेयेषु नोपादेयपरो भव । हेयादेयदृशौ त्यक्त्वा शेषस्थः सुस्थिरो भव महो. ६।२८
मा गृधः कस्यस्विद्धनम् ईशो. १
मा च तेरुयास्म तीरिषत् अरुणो. १
मा छिदो मृत्यो मावधीर्मा मे बलं विवृहो मा प्रमोषीः महाना. १३।१३
मा छिदो मृत्यो मावधीः.. चित्त्यु. १५।१
माण्डूक्यमेकमेवालं मुमुक्षूणां विमुक्तये मुक्तिको. १।२६
मातरं पितरं भार्यां पुत्रान्... अनुमोदयित्वा... कठश्रु. ३
मातरिश्वा वा अहमस्मीति केनो. ३।८
मातरीव परं यान्ति विषमाणि मृदूनि च । विश्वासमिह भूतानि सर्वाणि शमशालिनि महो. ४।३०
मातरो विविधा दृष्टाः पितरः सुहृदस्तथा निरुक्तो. १।६
मातर्मे मधुकैटभघ्नि महिषप्राणापहारोद्यमे...शुम्भध्वंसिनि कालि सर्वदुरितंदुर्गेनमस्तेहर वनदु. १६६
माता धाता पितामहः भ. गी. ९।१७
माता पिता भ्राता निवासः शरणं सुहृद्गतिर्नारायणो विराजा सुबालो. ६।१
मातापित्रोर्मलोद्भूतंमलमांसमयंवपुः अध्यात्मो. ६
माता पूर्वरूपम् तैत्ति. १।३।६
मातामही सावित्री गायत्री जगत्युर्वी पृथ्वी बहुला विश्वा भूता कतमा का या सा सत्येत्यमृतेति वसिष्ठः महाना. १०।१४
माताऽमाता (भवति) बृह. ४।३।२२
मातुलाः श्वशुराः पौत्राः भ. गी. १।३४
मातृ रेतोधिकास्त्री भवति गर्भो. ३
मातृकादियुतं मंत्रं द्वादशाब्दं तु यो जपेत् । क्रमेण लभते ज्ञानमणिमादिगुणान्वितम् १ यो. त. २१

मातृकामालया मंत्री मनसैव मनुं जपेत्। अभ्यर्च्य वैष्णवे पीठे जपेदक्षरलक्षकम्	रामर. ४।७
मातृकारहितं मंत्रमादिशन्ते न कुत्रचित्	ब्र. वि. ६३
मातृदेवो भव	तैत्ति. १।११
मातृमानविहीनोऽस्मि मेयहीनो शिवोऽस्म्यहम्	मैत्रे. ३।१२
मातृश्राद्धे मातृ-पितामही-प्रपितामहीः	ना. प. ४।३९
मातृसूतकसम्बंधंसूतकेसह जायते। मृतसूतकजं देहं स्पृष्ट्वा स्नानं विधीयते	मैत्रे. २।७
मातृहा वै त्वमसि	छांदो. ७।१५।२
मा ते मूर्धा व्यतप्तदनतिप्रश्न्यां वै देवतामतिपृच्छसि, गार्गि मातिप्राक्षीः	बृह. ३।६।१
मातेव पुत्रान्...विधेहि नः (मा.पा.)	प्रश्नो. २।१३
मातेवास्मा अदिते शर्म यच्छ	सह्वै. ६
मातेव पुत्रान्रक्षस्व श्रीश्च प्रज्ञां च विधेहि	प्रश्नो. २।१३
मा ते व्यथा मा च विमूढभावः	भ. गी. ११।४९
मा ते सङ्गोऽस्त्वकर्मणि	भ. गी. २।४७
मात्राद्वादशयोगेन प्रणवेन शनैः शनैः। पूरयेत्सर्वमात्मानं सर्वद्वारं निरुध्य च	क्षुरिको. ३
मात्राद्वादशसंयुक्तौ दिवाकरनिशाकरौ। दोषजालमबध्नन्तौ ज्ञातव्यौ योगिभिः सदा	यो. चू. १०२
मात्रा बलम्	तैत्ति. १।२।१
मात्राभिरोतानुज्ञात्रनुज्ञाविकल्परूपं चिन्तयन् ग्रसेत्	नृसिंहो. ३।४
मात्रामात्राः प्रतिमात्राः कुर्यात्	नृसिंहो. २।७
मात्रामात्राः प्रतिमात्रागताः सम्यक्समस्तानपिपादाञ्जतीति स्वयम्प्रकाशः स्वयं ब्रह्म भवति	ब्र. शिखो. ३
मात्रालिङ्गपदं त्यक्त्वा शब्दव्यञ्जनवर्जितम्। अस्वरेण मकारेण पदं सूक्ष्मं च गच्छति	अ. ना. ४
(अथ) मात्राऽशितपीतनाडीसूत्रगतेन प्राण आप्यायते	गर्भो. ३
मात्राश्च पादाः, अकार उकारो मकार इति	माण्डू. ८
मात्रासङ्गादिनिर्गतः	ना. प. ५।६
मात्रासम्प्रतिपत्तौ तु लयसामान्यमेव च	आगम. २१
मात्रासम्प्रतिपत्तौ स्यादाप्तिसामान्यमेव च	आगम. १९
मात्रासम्प्रतिपत्तौ स्यादुभयत्वं तथाविधम्	आगम. २०
मात्रास्पर्शास्तु कौन्तेय	भ. गी. २।१४
मा त्वं मामपहाय परागाः, नाहं त्वामपहाय परागामिति	कठरु. २
मादकं दुर्जरं चैव दग्धान्नं विषमिश्रितम्।...प्राप्तं यत्पीडनाज्जन्तोरभक्ष्यं तत्प्रचक्षते	भवसं. ४।१३,१४
मा देव्यस्तंतुछेदि मा मनुष्यः	चित्त्यु. ५।२
माद्यति प्रमदां दृष्ट्वा सुरां पीत्वा च माद्यति। तस्माद्दृष्टिविषां नारीं दूरतः परिवर्जयेत्	ना. प. ६।३७
माधवः पाण्डवश्चैव	भ. गी. १।१४
माधुकरेण करपात्रेणास्यपात्रेण कालं नयेत् (यतिः)	१सं. सो. २।९९
माधूकरमसंक्लृप्तं प्राक्प्रणीतमयाचितम्। मधुमक्षिकवत्कृत्वा भैक्षं पञ्चविधं स्मृतम्	१ सं. सो. २।६५
माध्यन्दिनꣳ सवनमनुसन्तनुतेति	छांदो. ३।१६।२
मानवान् भवति	तैत्ति. ३।१०।३
मानवो ब्रह्मैवैक ऋत्विक्कुरूनश्वाभिरक्षत्येवंविद्ध वै ब्रह्मा यज्ञं यजमानꣳ सर्वांश्चर्त्विजोऽभिरक्षति	छांदो. ४।१७।१०
मानसपूजया जपेन ध्यानेन कीर्तनेन स्तुत्या मानसेन सर्वेण नित्यस्थलं प्राप्नोति	राधोप.१।६+४।४
मानसमिति विद्वाꣳसस्तस्माद्विद्वाꣳस एव मानसे रमन्ते	महाना. १६।१२

मानसश्च तथोपांशोः सहस्रगुण
उच्यते (जपः) जा. द. २।१५
मानसस्तेजोमयोऽमृतमयः पुरुषः बृह. २।५।७
मानसं कोटिगुणं (जपकर्म) शांडिल्यो.१।२।१
मानसं तु मनसाध्यानयुक्तं (जपकर्म) शांडि. १।२।१
मानसं ब्रह्म माहेश्वरं ब्रह्म मानसं
हंसः सोऽहं हंसः पा. ब्र. ३
मानसं मननं विदुः (शौचं) जा. द. १।२०
मानसं वै प्राजापत्यं पवित्रं
मानसेन मनसा साधु पश्यति महाना. १७।११
मानसा ऋषयः प्रजा असृजन्त महाना. १७।११
मानसीर्वासना: पूर्वं त्यक्त्वा
विषयवासनाः । मैत्र्यादि-
वासनानाम्नीर्गृहाणामलवासनाः मुक्तिको. २।६९
मानसे च विलीने तु यत्सुखं...
तद्ब्रह्म चामृतं शुक्रं.. सागतिः मैत्रा. ६।२४
मानसे तु कृते दण्डे प्राणायामो
विधीयते १सं. मो. २।९७
मानसेन मनसा साधु पश्यति महाना. १७।११
मानसे विलयं याते कैवल्य-
मवशिष्यते शांडि. १।७।२३
मानसे सर्वं प्रतिष्ठितं तस्मान्मानसं
परमं वदन्ति महाना. १७।११
मानसो मननध्यानभेदाद्द्वैविध्य-
माश्रितः जा. द. २।१४
मानस्तोक इति सद्योजातमित्या-
दिपञ्चब्रह्ममन्त्रैर्भस्मसङ्गृह्याग्नि-
रिति भस्म वायुरिति..जलमिति
भस्म स्थलमिति भस्म व्योमेति
भस्म देवा भस्म ऋषयो भस्म
सर्वं ह वा एतदिदं भस्म पूतं
पावनं नमामि भस्मजा. १।४
मानस्तोक इति समुद्धृत्य मानो
महान्तमिति जलेन त्रियायुष-
मिति शिरोललाटवक्षःस्कन्धेषु
...तिस्रो रेखाः प्रकुर्वीत का. रुद्रो. २
मानस्तोक इति समुद्धृत्य जलेन
संसृज्य त्र्यायुषमिति शिरो-
ललाटवक्षःस्कन्धेष्विति... जाबाल्यु. ६

मा नस्तोके तनये मान आयुषि
मानो गोषु मानो अश्वेषु
रीरिषः ।...तन्मे मनः शिव-
सङ्कल्पमस्तु २ शिवसं. २९
मा नस्तोके तनये मा न आयुषि
...हविष्मन्तः सदमित्त्वा
हवामहे (नमसा विधेम ते) महाना. १३।१५
[श्वेता.४।२२+ऋ.नं.१।११४।८+
[वा. सं. २०।१६ तै.सं. ३।४।११।२
मानस्तोकेतिमंत्रेण मन्त्रितं भस्म
धारयेत् बृ. जा. ५।१
मा नः प्रजा॰ रीरिषो मोत वीरान्
[महाना. १३।८+ पिरयु. १५।२
मानापमानयोस्तुल्यः भ. गी. १४।२५
मानावमानहीनोऽस्मि मैत्रे. ३।४
मानुषस्य भगवन्गौतम वित्तस्य
वरं वृणीथाः... छान्दो. ५।३।६
मानुषं च स्वाध्यायप्रवचने च तैत्ति. १।९।१
मानुषीं तनुमाश्रितम् भ. गी. ९।११
मानुषे तेजोमयोऽमृतमयः पुरुषः बृह. २।५।१३
मा नो महान्तमिति जलेन सम्मृज्य का. रुद्रो २
मा नो महान्तमुत मानो अर्भकं
मा न उक्षन्तमुत मा न उक्षितम् महाना. १३।१४
[ऋ.मं.१।११४।७+वा.सं.१६।१७ अथर्व. १।२।२९
मा नो महान्तमुत मानो अर्भकं...
तन्मे मनः शिवसङ्कल्पमस्तु २ शिवसं २८
मा नो हिꣳसीज्जातवेदो
गामश्वं पुरुषं जगत् महाना. २।१०
मा नो भवान् बहोरनन्तस्या-
पर्यन्तस्याभ्यवदान्योऽभूदिति बृह. ६।२।७
मा पुत्र रोदꣳ रुदम् छान्दो. ३।१५।२
मा फलेषु कदाचन भ. गी. २।४७
(ते होचुः) मा भगव उत्क्रमीर्न
वै शक्ष्यामस्त्वदृते जीवितुं बृह. ६।१।१३
मा भगवानवोचत्कतमासादेवतेति छांदो. १।११,४६
मा भव ग्राह्यभावात्मा ग्राहकात्मा
च मा भव । भावनामखिलां
त्यक्त्वा यच्छिष्टं तन्मयो भव मैत्र. २।२८
[अ. पू. ५।१०४+ वराहो. ४।१९

मा भवाब्धो भवब्धस्त्वं जहि संसार-
भावनाम् । अनात्मन्यात्म-
भावेन किमन्य इव रोदिषि महो. ४।१३०
मा भैषीर्गौतम जितो वै ते लोक इति सूर्यता. ३।१
मामकाः पाण्डवाश्चैव भ. गी. १।१
मामनुस्मरतश्चित्तंमामेवात्र विलीयते यो. शि. ३।२५
मामनुस्मर युद्ध्य च भ. गी. ८।७
मामन्तेवासिनमनुशासयामोक्षमिति भस्मजा. १।१
मामप्राप्यैव कौन्तेय भ. गी. १६।२०
मामात्मगुप्तां वहते स्वभूत्यैं तां
राजिमन्तां घूर्धूरयन्तीं घूरसि
ध्रुवाय स्वाहा पारमा. ९।६
मामात्मपरदेहेषु भ. गी. १६।१८
मा मा ब्रह्म निराकरोदनिराकरणं
मेऽस्त्वनिराकरणं मेऽस्तु.. केनो. शां. पा.
मामायुरमृतमित्युपास्व कौ. उ. ३।२
मामाश्रित्य यतन्ति ये भ. गी. ७।२९
मामिकामेवव्याहृतिमादित: कुरुध्व-
मित्येवं मामका अधीयन्ते २ प्रणवो. २०
मामिच्छाप्तुं धनञ्जय भ. गी. १२।९
मामुपेत्य तु कौन्तेय भ. गी. ८।१६
मामुपेत्य पुनर्जन्म भ. गी. ८।१५
मामेकं शरणं व्रज [त्रि.म.ना.८।६+ भ. गी. १८।६६
मा मे बलं विवृहो मा प्रमोषी: चिरयु. १५।१
[महाना. १३।१३+ नै. आ. ३।१५।१
मामेभ्यः परमव्ययम् भ. गी. ७।१३
मामेव ये प्रपद्यन्ते भ. गी. ७।१४
मामेव विजानीहि, एतदेवाहं
मनुष्याय हिततमं मन्ये कौ. त. ३।१
मामेव विदित्वाऽमृतत्वमेति
तरति शोकम् भस्मजा. २।५
मामेव विदित्वा सांसृतिकीं रुजं
द्रावयति भस्मजा. २।५
मामेव वेदाश्चतुर्मूर्तिधरा: भस्मजा. २।१३
मामेव स्तुवन्ति वेदा: साङ्गा:
सोपनिषद: भस्मजा. २।११
मामेवं विदित्वा संसृति-
पाशात्प्रमुच्यते भस्मजा. २।७

मामेवानुत्तमां गतिम् भ. गी. ७।१८
मामेवैष्यसि युक्त्वैवं भ. गी. ९।३४
मामेवैष्यसि सत्यं ते भ. गी. १८।६५
मामेवैष्यत्यसंशयः भ. गी. १८।६८
मामेवैष्यस्यसंशय: भ. गी. ८।७
मामैतस्मिन् संवदिष्ठा अतिष्ठाः
सर्वेषां भूतानां राजेति बृह. २।१।२,३,६
मामैतस्मिन् संवादयिष्ठा असुरितिवा कौ. त. ४।१२
मा मैतस्मिन्संवदिष्ठाः असुरिति
वा अहमेतमुपासे बृह. २।१।१०
मामैतस्मिन्संवदिष्ठा आत्मन्वीति
वा अहमेतमुपासे बृह. २।१।१३
मामैतस्मिन् संवादयिष्ठाः इन्द्रो
वैकुण्ठोऽपराजिता सेनेति वा कौ. त. ४।७
मा मैतस्मिन्संवदिष्ठा इन्द्रो
वैकुण्ठोऽपराजिता सेनेति बृह. २।१।६
मा मैतस्मिन्संवदिष्ठास्तेजस्वीति
वा अहमेतमुपास इति स य
एतमेवमुपास्ते तेजस्वी ह भवति बृह. २।१।४
मा मैतस्मिन्संवदिष्ठाः, (समवाद्-
यिष्ठाः) द्वितीयोऽनपग इति
वा अहमेतमुपासे [बृह.२।१।११+ कौ.त. ४।११
मा मैतस्मिन् संवादयिष्ठा नाम्न
आत्माऽग्निरात्मा ज्योतिष्ट
आत्मेति वा अहमेतमुपास इति कौ. त. ४।१६
मा मैतस्मिन् संवादयिष्ठा नाम्न्य-
स्यात्मेति वा अहमेतमुपास इति कौ. त. ४।९
मा मैतस्मिन्संवादयिष्ठाः पूर्णम-
प्रवर्तीति वा अहमेतमुपास इति बृह. २।१।५
मा मैतस्मिन्संवादयिष्ठाः पूर्ण-
मप्रवर्ति ब्रह्मेति वा... कौ. त. ४।६
मा मैतस्मिन् संवादयिष्ठाः प्रजा-
पतिरिति वा अहमेतमुपास इति कौ. त. ४।१४
मा मैतस्मिन्संवदिष्ठाः प्रतिरूप
इति वा अहमेतमुपास इति
[बृह. २।१।८+ कौ. त. ४।१०
मा मैतस्मिन्संवदिष्ठा अतिष्ठाः
सर्वेषां भूतानां मूर्धा राजेति वा बृह. २।१२

मा मैतस्मिन्संवदिष्ठा बृहत्पाण्डरवासा: सोमो राजेति बृह. २।१।३
मा मैतस्मिन्संवदिष्ठाः, मृत्युरिति वा अहमेतमुपास इति बृह. २।१।१२
मा मैतस्मिन् संवादयिष्ठा मृत्युरिति वा अहमेतमुपास इति कौ. त. ४।१३
मा मैतस्मिन् संवादयिष्ठा यमो राजेति वा अहमेतमुपास इति कौ. त. ४।१५
मा मैतस्मिन्संवदिष्ठा रोचिष्णुरिति वा अहमेतमुपास इति बृह. २।१।९
मा मैतस्मिन्संवदिष्ठाः, विषासहिरिति वा अहमेतमुपास इति बृह. २।१।७
मा मैतस्मिन्संवादयिष्ठा विषासहिरिति वा अहमेतमुपास इति कौ. त. ४।८
मा मैतस्मिन् संवादयिष्ठाः शब्दस्यात्मेति वा अहमेतमुपास इति कौ. त. ४।५
मामैतस्मिन् संवादयिष्ठाः सत्यस्यात्मा विद्युत आत्मा तेजस आत्मेति वा अहमेतमुपास इति कौ. त. ४।१७
मा मैतस्मिन्संवादयिष्ठाः सोमो राजन्नस्यात्मेति वा कौ. त. ४।३
मामैतस्मिन्समवादयिष्ठास्तेजस आत्मेति वा अहमेतमुपास इति कौ. त. ४।४
मा मोपरोत्सीरति मा नृजैनं कठो. १।२१
मायया एतत्सर्वं वेष्टितं भवति नृ. पू. ५।२
माययाऽपहृतज्ञाना: भ. गी. ७।१५
माययाभिद्यतेह्येतन्नान्यथाजंकथञ्चन अद्वैत. १९
मायया मोहिताः शम्भोर्महादेवं जगद्गुरुम् । न जानन्ति सुराः सर्वे सर्वकारणकारणम् पञ्चब्र. १८,१९
मायया ह्यन्यदिव नृसिंहो. ९।१
मायाकार्यमिदं भेदमस्ति चेद्ब्रह्मभावनम् ते. बिं. ६।१००
मायाकार्यादिकंनास्तिमायानास्ति ते. बिं. ५।३३
मायाकुण्डलिनी क्रियामधुमती कालीकलामालिनी...ह्रींकारी त्रिपुरा परा परमयी माता कुमारीत्यसि वनदु. ५
मायाक्लृप्तौ बन्धमोक्षौ न स्तः स्वात्मनि वस्तुतः आत्मो. २६
माया च तमोरूपानुभूतिः नृसिंहो. ९।२
माया चाविद्या च स्वयमेव भवति नृसिंहो. ९।३
मायातत्कार्यविलये नेश्वरत्वं न जीवता वराहो. २।५२
मायातीतं गुणातीतं ब्रह्म त्रि. म. ना. १।३
मायादेवो बलगहनो ब्रह्मारातीस्त्वं देवमीडे दक्षिणास्यम् ग. पू. १।६
मायानाम अनादिरन्तवती प्रमाणाप्रमाणसाधारणा न सती नासती न सदसती स्वयमधिका विकाररहितानिरूप्यमाणा सतीतरलक्षणशून्या सा मायेत्युच्यते सर्वसारो. ६
मायाऽन्तरा याश्च बाह्या अलक्ष्मीः [श्रीसू. ६+ ऋ. खि. ५।८७।६
मायाभिरेको अभिचाकशानः बा. मं. ११
मायाममताहङ्कारदहनम् निर्वाणो. ६
मायामात्र एष एवोग्रः नृसिंहो. ५।१
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः आगम. १७
मायामात्रविकासत्वान्मायातीतोऽहमद्वयः आ. प्र. २०
मायामात्रं जगत्कृत्स्नं तदा भवति निर्वृतिः जा. द. १०।१२
मायामात्रं विदित्वैवं सच्चिदेकरसो ह्ययम् ना. प. ८।२१
मायामेतां तरन्ति ते भ. गी. ७।१४
मायायाः समुत्पन्ना आसुराः कर्मजडा अन्यधर्मरता एव भवन्ति सामर. २
मायावशादेव देवा मोहिता ममताविभिः शरभो. २८
माया वा एषा नारसिंही सर्वमिदं सृजति नृ. पू. ३।२
माया वा एषा वैनायकी सर्वमिदं सृजति, सर्वमिदं रक्षति, सर्वमिदं संहरति ग. पू. ता. २।३

मायावाद्दमदान्धकारमुषितप्रज्ञोऽसि यस्मादहं ब्रह्मास्मीति मुहुर्मुहुर्वेद-सि रे जीव त्वमुन्मत्तवत् — भवसं. २।३३
मायाविद्ये विहायैव उपाधी परजीवयोः। अखण्डं सच्चिदानंदं परं ब्रह्म विलक्ष्यते — अध्यात्मो. ३२
मायावी मायया क्रीडति स ब्रह्मा — शाण्डि. ३।१।३
मायाशक्तिर्ललाटाग्रभागे व्योमाम्बुजे तथा। नादरूपा परा शक्तिर्ललाटस्य तु मध्यमे — यो. शि. ६।४८
(अथ) मायाशबलितब्रह्मासीत् — गोपीचं. ८
मायाशरीरो मधुरस्वभावस्तस्य ध्यानात्पूजनात्तत्स्वरूपाः — हेरम्बो. ६
माया सत्त्वरजस्तमोमयी — राधिको. ९
मायासम्बन्धतश्शेशो..अन्तःकरणसम्बन्धात् प्रमातेत्यभिधीयते — कठरु. ४२
माया सा त्रिविधा प्रोक्ता सत्त्वराजसतामसी — कृष्णोप.४
मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्। तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् — श्वेता. ४।१०
मायां तु प्रकृतिं विद्यात्प्रभुं तस्या महेश्वरीम्। अस्या अवयवैः सूक्ष्मैर्व्याप्तं सर्वमिदंजगत् — गुह्यका. ५९
मायेत्यसुराः (उपासते) — मुद्गलो. ३।२
मायैषा तस्य देवस्य ययाऽयं मोहितः स्वयम् — वैतथ्य. १९
मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः — अध्यात्मो. ३०
मायोपाधिविनिर्मुक्तं शुद्धमित्यभिधीयते — कठरु. ४१
मायोपाधिः सच्चिदानन्दलक्षणो जगद्योनिस्तत्पदवाच्यो भवति — पैङ्गलो. ३।१
मारणमोहनवशीकरणस्तम्भनजृम्भणाकर्षणोच्चाटनमिलनविद्वेषणयुद्धतर्कमर्माणि बन्धय.. — लांगूलो. ७
मारय मारय नमः सम्पन्नायनमः सम्पन्नाय स्वाहा — दत्तात्रे. २।२
मारयेद्विषवृक्षजैः (हुनेत्) — ग. पू. २।१३
मारुतक्षये वेपथुः सम्भवेन्नित्यं नाम्भसैनैव जीवति — वराहो. ५।५
मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् — मैत्रा. ७।११
मारुतस्य लयो नाथस्तन्नाथं लयमाश्रय — वराहो. २।८०
मारुते मध्यसञ्चारे मनस्स्थैर्यं प्रजायते। यो मनःसुस्थिरो भावः सैवावस्था मनोन्मनी — शांडि. १।७।१०
मारुतो नैनं शोषयति — सामर. १००
मारूपत्वादतो रामो भुक्तिमुक्तिफलप्रदः। आद्यो रा तत्पदार्थः स्यान्मकारस्त्वम्पदार्थवान् — रामर. ५।१२
मार्गे बिन्दुं समाबध्य वह्निं प्रज्वाल्य जीवने। शोषयित्वा तु सलिलं तेन कायं दृढं भवेत् — वराहो. ५।३७
मार्दवं ह्रीरचापलम् — भ. गी. १६।२
माला निगद्यते ब्रह्मन् — गोपालो. २।३३
मा शुचः सम्पदं दैवीं — भ. गी. १६।५
मा शोचीरात्मविज्ञानी शोकस्यान्तं गमिष्यति — शांडिल्यो. २।४
माषमात्रां तथा दृष्टिं श्रोत्रे स्थाप्य तथा भुवि। श्रवणे नासिके गन्धा यतः स्वं न च संश्रयेत् — क्षुरिकको. १९
माषैरेताबद्भिरभिषिच्यवरुणलोककामो वरुणलोकमवाप्नोति — भस्मजा. २।१२
मासचतुष्केण त्वग्व्यादेशः — निरुक्तो. १।४
मासत्रयेण ग्रीवाव्यादेशः — निरुक्तो. १।४
मासत्रयेण पादप्रदेशो भवति — गर्भो. ३
मासद्वयमृतुर्भवति — त्रि. म. ना. ३।४
मासद्वयेन शिरः सम्पद्यते — गर्भो. ३
मासमात्रं त्रिसन्ध्यायां जिह्वयाऽऽरोप्य मारुतम्। अमृतं च पिबेन्नाभौ मन्दं मन्दं निरोधयेत् — जा. द. ६।२९
मासमात्रात्कठिनो भवति — निरुक्तो. १।४
मासमेकं त्रिसन्ध्यं तु जिह्वयारोप्य मारुतम्।... ज्वराः सर्वेऽपि नश्यन्ति... — शांडि. १।७।५०

मासमेकं लयो यस्य लयस्तिष्ठेद-खण्डितः। प्रजागर्ति स योगीन्द्रो यावन्मोक्षं स गच्छति अमन. १।७३
मा सङ्कल्पय सङ्कल्पं मा भावं भावय स्थितौ। सङ्कल्पनाशने यत्तो न भूयोऽननुगच्छति महो.५।१८२
मा सर्वं सम्भयमितोऽमुनजदिति बृह. १।५।१७
मासं दीक्षितो भवति, यो मासः स संवत्सरः, संवत्सरादेवात्मानं पुनीते सहवै. १२
मासात्पूर्वं मृतो मर्त्यो ह्यागतश्च-जगद्भवेत् ते. बिं. ६।८०
मासानां मार्गशीर्षोऽहं भ. गी. १०।३५
मासाभ्यन्तरे कठिनो भवति गर्भो. ३
मासाभ्यन्तरे पिण्डो भवति गर्भो. ३
मासि मासि कुशाग्रेण जलबिन्दुं च यः पिबेत् योगो. १७
(अथ) मासि मास्यमावास्यायां पश्चाच्चन्द्रमसं दृश्यमानमुप-तिष्ठेत कौ. त. २।८
मासेभ्यः पितृलोकं पितृलोका-च्चन्द्रं प्राप्यान्नं भवन्ति बृह. ६।२।१६
मासेभ्यः संवत्सरं छांदो. ४।१५।५
मासेभ्यो देवलोकं, देवलोका-दादित्यमादित्याद्वैद्युतं तान् वैद्युतान्पुरुषो मानस एत्य ब्रह्मलोकान् गमयति बृह. ६।२।१५
मासो वै प्रजापतिस्तस्य कृष्णपक्ष एव रयिः शुक्लः प्राणः प्रश्नो. १।१२
माऽस्माकं प्राणेन प्रजया पशुभि-रवक्षेष्ठाः कौ. त. २।९
माहात्म्यमपि चाव्ययम् भ. गी. ११।२
माऽहं पौत्रमघं रुदं [कौ.त.२।८+ आ.श्र.गृ.१।१३।७
माहं प्राणानामादित्यानां मध्ये यज्ञो विलोप्सीय छांदो. ३।१६।६
माहं प्राणानां मध्ये वसूनां यज्ञो विलोप्सीय छांदो. ३।१६।२
माहं प्राणानां रुद्राणां मध्ये यज्ञो विलोप्सीय छांदो.३।१६।४
माहं ब्रह्म निराकुर्यां मा मा.. केनो. शां. पा.
मां च योऽव्यभिचारेण भ. गी. १४।२६
मां चवान्तःशरीरस्थं भ. गी. १७।६
मां तु वेद न कश्चन भ. गी. ७।२६
मां ध्यायन्त उपासते भ. गी. २।६
मां प्रति मां प्रतीति सर्वेण समस्तेन साम छान्दो. २।९।१
मांसपाञ्चालिकायास्तु यंत्रलोले-ङ्गपञ्जरे।...स्त्रियः किमिव शोभनम् याज्ञव. ८
मांसमुद्रीयः छांदो. २।१९।१
मांसान्मेदः गर्भो. १
मांसान्यस्य शकराणि किनाटं स्नाव तत्स्थिरम् बृह. ३।९।३०
मांसासृक्पूयविण्मूत्रस्नायुमज्जास्थि-संहतौ। देहे चेत्प्रीतिमान्मूढो भविता नरकेऽपिसः[ना.प.३।४८ +४।२८
मां हि पार्थ व्यपाश्रित्य भ. गी. ४।३०
मिताहारो नाम चतुर्थांशावशेषक-सुस्निग्धमधुराहारः शांडिल्यो. १।१।३
मितेरपीतेर्वा मिनोति ह वा इदं सर्वमपीतिश्च भवति माण्डू. ११
मितेरपीतेर्वा स्थूलत्वात्सूक्ष्मत्वा-द्बीजत्वात्साक्षित्वाच्च मिनोति ह वा इदं सर्वमपीतिश्च भवति नृसिंहो. २।६
मित्रद्रोहे च पातकम् भ. गी. १।३८
मित्र उपवक्ता चित्त्यु. ३।१
मित्ररविसूर्यभानुखगपूषहिरण्य-गर्भमरीच्यादित्यसवित्रर्क-भास्कराख्यैःषड्बीजैः संपुटिताः सूर्यता. १।९
मित्रस्य श्रद्धा चित्त्यु. ५।१
मित्रस्य चक्षुषा समीक्षे [प्रवर्ग्या.१८ +वा.सं. ३६।१८
मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे [प्रवर्ग्या. १८+ वा. सं. ३६।१८
मित्रस्वजनबन्धूनां कुर्यान्नाम शिवात्मकम् शिवो. १।२२
मित्रादिषु समो मैत्रः समस्तेष्वेव जन्तुषु। एकोज्ञानी प्रशान्तात्मा स संतरति नेतरः ना. प. ६।३१

मित्रार्थैः सह सम्मन्त्र्य सम्बद्धो न प्रपद्यते अ. शां. ३५
मित्रावरुणावपरपादौ सहवै. २३
मित्रावरुणावाशिषा चित्त्यु. ८।१
मित्रावरुणौ पङ्क्तिस्त्रिणवत्रयस्त्रिंशौ शाक्वररैवते मैत्रा. ७।५
मित्राह्लादकं मूत्रमिव (त्यजेत्) ना. प. ७।१
मित्रः सुपर्णश्चन्द्र इन्द्रो वरुणो रुद्रस्त्वष्टा विष्णुः सविता गोपतिस्त्वम् एका. १२
मिथुनान्मिथुनात्प्रजायते सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति छान्दो. २।१३।२
मिथ्याचारः स उच्यते भ. गी. ३।६
मिथ्याभूतान् स्वप्नतुल्यान् विषयभोगाननुभूय...अतृप्तः सदा परिधावति त्रि. म. ना. ५।३
मिथ्यैव व्यवसायस्ते भ. गी. १८।५९
मिनोति ह वा इदं सर्वमपीतिश्च भवति [माण्डू. ११+ नृसिंहो. २।६
मिश्रं ह्येतद्दैवानभाजयदिति हुतं च प्रहुतं च बृह. १।५।२
मीमांसते ब्रह्मवादिनो ह्रस्वा दीर्घा प्लुता चेति नृ. पू. ३।३
मीमांसते ब्रह्मवादिनो ह्रस्वा वा दीर्घा वा प्लुता वेति ग. पू.२।३
मुक्तसङ्गः समाचर भ. गी. ३।९
मुक्तसङ्गोऽनहंवादी भ. गी. १८।२६
मुक्ताकारस्त्वैच्छिकः त्रि. म. ना. २।१
मुक्तात्मानः सर्वमेवापियन्ति (मा.) मुण्डको. ३।२।५
मुक्ता वेणुमिवोत्तमम् महो. ६।१६
मुक्ता हर्षविषादाभ्यां शुद्धा भवति वासना अ.पू.५।६
मुक्तिस्तु ज्ञेयमित्युक्ता भूमिका- सप्तकात्परम् महो.५।२३
मुक्तिहीनोऽस्मि मुक्तोऽस्मि मैत्रे. ३।२२
मुक्तोऽखण्डानन्दबोधो ब्रह्मभूयाय कल्पते १ बिल्वो. २३
मुक्तो यः स च मे प्रियः भ. गी. १२।१५

मुक्तोऽहं मोक्षरूपोऽहं निर्वाणसुखरूपवान् ते. बिं. ३।४०
मुखतोऽस्मा अन्नꣳ राध्यते तैत्ति. ३।१०।१
मुखमग्नितृप्तं सर्वं प्रोक्षति आचम. ५
मुखं किमस्य कौ बाहू चित्त्यु. १२।५
[ऋ.मं.१०।९०।११+ वा. सं. ३१।१०
मुखं च परिशुष्यति भ. गी. १।२८
मुखं च रोदसी ज्ञेयं द्यौर्लोकश्चिबुकं तथा (देव्याः) गुह्यका. १६
मुखं प्रतीकं, मुखेनेत्येतत्स देवानपि गच्छति बृह. १।५।२
मुखꣳ ह्यस्याः सम्राण्न विदाञ्चकारेति होवाच बृह. ५।१४।८
मुखꣳ ह्यस्याः ससम्भ्रमं विदांचकारेति होवाच गायत्र्यु. ५
मुखात्सत्त्वं स वै विष्णुः गणेशो. ३।४
मुखादग्निरजायत [पु.सू.१२+ वा. सं. ३१।१२
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत [ऋ. मं.१०।९०।१३+ चित्त्यु. १२।६
मुखाद्वाग्वाचोऽग्निर्नासिके निरभिद्येतां नासिकाभ्यां प्राणः २ ऐत. १।४
मुखे आहवनीय उदरे गार्हपत्यो हृदि दक्षिणाग्निः गर्भो. ११
मुखेन मुखꣳसन्धाय [बृह.६।४।९, १०,११,२१
मुखेन वायुं संगृह्य घ्राणरंध्रेण रेचयेत् यो. शि. १।९५
मुख्यमेवाप्येति यो मुख्यमेवास्तमेति सुबालो. ९।६
मुख्यात्पूर्वोत्तरैर्भागैर्भूते भूते चतुश्चतुः । पूर्वमाकाशमाश्रित्य पृथिव्यादिषु संश्रिताः त्रि. ब्रा. २।२
मुख्यादूर्ध्वे परा ज्ञेया न परानुत्तरान्विदुः त्रि. ब्रा. २।३
मुच्यन्ते तेऽपि कर्मभिः भ. गी. ३।३१
मुच्यन्ते सर्वकिल्बिषैः भ. गी. ३।१३
मुण्डोऽपरिग्रहः शुचिरद्रोही भैक्षमाणो ब्रह्मभूयाय भवति याज्ञव. २
मुदिता करुणा मैत्री उपेक्षा च चतुष्टयम् वराहो. १।१३

मुदितामुदिताख्योऽस्मि मैत्रेय्यु. ३।१६
मुद्रा-पुस्तक-वह्नि-नागविलसद्बाहुं प्रसन्नाननं मुक्ताहारविभूषणं शशिकला-भास्वत्किरीटोज्ज्वलम् ।...न्यग्रोधान्तनिवासिनं परगुरुं ध्यायाम्यभीष्टाप्तये द. मू. १५
मुद्रा भवति खेचरी यो. शि. ५।४०
मुद्रां भद्रार्थदात्रीं सपरशुहरिणं बाहुभिर्बाहुमेकं जान्वासक्तं दधानो भुजगविलसमाबद्ध-कक्ष्यो वटाधः...दद्यादाद्यः शुकाद्यैर्मुनिभिरभिसृतो भाव-शुद्धिं भवो नः द. मू. ६
मुद्रेयं खलु खेचरी भवति सा लक्ष्यैकताना शिवा शून्या-शून्यविवर्जितं स्फुरति सा तत्त्वं परं वैष्णवी शांडि. १।७।१५
मुनयो वाग्वदन्ति न तस्य ग्रहणं अ. शिरः. ३।१०
(अथ) मुनिरमौनं च मौनं च निर्विद्य बृह. ३।५।१
मुनिरुन्मत्तबालवत् । कविर्मूक-वदात्मानं तद्दृष्ट्यादर्शयेन्नृणाम् ना. प. ५।३४
मुनिर्मोक्षपरायणः भ. गी. ५।२८
मुनिः कौपीनवासाः स्यान्नग्नो वा ध्यानतत्परः । एवं ज्ञानपरो योगी ब्रह्मभूयाय कल्पते ना. प. ४।३२
मुनिः स्यात्सर्वनिस्स्पृहः ना. प. ३।३४
मुनीनामप्यहं व्यासः भ. गी. १०।३७
मुनीनां विवेकबुद्धिर्भवति ना. पू. ता. २।१
मुनीनां सम्प्रयुक्तं च न देवा न परं विदुः ते. विं. १।१२
मुने तत्त्वावाप्तिर्निजगुरुमुखादेव हि भवेत् अमन. १।५
मुने नासाग्रतेतद्धि पदमक्षयमुच्यते महो. ५।११४
मुमुक्षवः काश्यामेवासीना वीर्यवन्तो विद्यावन्तः भस्मजा. २।१६
मुमुक्षवः पुरुषाः... सुकुलभवं श्रोत्रियं... सद्गुरुं विधिवदुप-सङ्गम्योपहारपाणयोऽष्टोत्तर-शतोपनिषदं विधिवदधीत्य... विदेहमुक्तिः सैव कैवल्य-मुक्तिरिति मुक्तिको. १।५८
मुमुक्षवो ब्रह्मवादिनश्च (यंनमन्ति) नृ. पू. २।१३
मुमुक्षुर्भवति जपात् नृ. पू. १।९
मुमुक्षुभिः प्राणजयः कर्तव्यो मोक्षहेतवे यो. शि. १।६६
मुमुक्षुः परहंसाख्यः साक्षान्मोक्षैक-साधनम् ना. प. ६।२७
मुमुक्षुः सर्वदा संसारतारकं तारक-मनुस्मरन् जीवन्मुक्तो वसेत् ना. प. ७।१२
मुमुक्षूणां विरक्तानां तथा चाश्रम-वासिनाम् । प्रणवस्त्वात्सदाध्येयो.. रामर. ५।१६
मुमुक्षूणां मोक्षलक्ष्मीर्भवति ना. पू. ता. २।१
मुमुक्षोरन्तःशिखोपवीतधारणम् परब्र. २
मुहुर्मुहुः शिरः श्मश्रु न स्पृशेत्कर-जैर्बुधः । न लिक्षाकर्षणं कुर्या-दात्मनो वा परस्य वा शिवो. ७।५५
(एवं)* मुहूर्तत्रयं भावनापरो जीवन्मुक्तो भवति भावनो. १०
मुहूर्तमपि यो नित्यं नासाग्रेमनसा सह । सर्वं तरति पाप्मानं तस्य जन्म शतार्जितम् शांडि. १।७।५१
मुहूर्तं चिन्तयेन्मां यः सर्वबन्धैः प्रमुच्यते वराहो. २।३२
मुमूर्षोर्दक्षिणे कर्णे यस्य कस्यापि वा स्वयम् । उपदेक्ष्यसि मन्मन्त्रं स मुक्तो भविता शिव रामो. ३।८
मूकीकरणमाननमुद्रेव बाधिर्यं महानुपचय इवेदं नात्रहेलनया भवितव्यमेवं दृढवैराग्याद्बोधो भवति महो. ४।२६
मूढग्राहेणात्मनो यत् भ. गी. १७।१९
मूढयोनिषु जायते भ. गी. १४।१५
मूढा जन्मनि जन्मनि भ. गी. १६।२०

* (एवं) मुहूर्तत्रितयं मुहूर्तद्वितयं मुहूर्तमात्रं वा भावनापरो जीवन्मुक्तो भवति इति पाठान्तरम् ।

मूढैः प्रकल्पितं दैवं तत्परास्ते क्षयं गताः। प्राज्ञास्तु पुरुषार्थेन पदमुत्तममागताः भवसं. १।४४
मूढोऽयं नाभिजानाति म. गी. ७।२५
मूत्रश्लेष्मरक्तशुक्रस्वेदा अवंशाः शारीरको. ३
मूत्रं मुञ्चति वारुणी यो. शि. ५।२६
मूत्रं (धेनोः) चोपनिषत्प्रोक्तं कुर्याद्भस्म ततः परम् बृ. जा. ३।२
मूर्च्छितो हरति व्याधिं मृतो जीवयति स्वयम्। बद्धः खेचरतां धत्ते ब्रह्मत्वं रसचेतसि वराहो. २।७९
मूर्त इति मूर्तविदोऽमूर्त इति च तद्विदः वैतथ्य. २३
मूर्तयः सम्भवन्ति याः म. गी. १४।४
मूर्तं भगवतो रूपं सर्वापाश्रय-निस्स्पृहम्। एषा वै धारणा ज्ञेया यच्चित्तं तत्र धारयेत् भवसं. ३।२८
मूर्तामूर्तं च नारायणः त्रि. म. ना. २।८
मूर्तामूर्तादि चिन्मयम् ते. बिं. २।३३
मूर्तित्रयमसद्विद्धि सर्वभूतमसत् सदा। सर्वतत्त्वमसद्विद्धि ह्यहं भूमा सदाशिवः ते. बिं. ३।५१
मूर्तिमद्भिरनन्तमहामायाजाल-विशेषैः परिषेविता (योगमाया) त्रि. म. ना. ६।५
(अथ) मूत्रद्वारेण निष्क्रान्त-मस्थिभिश्चितं शरीरं.. मैत्रा. ३।४
मूर्धा ते व्यपतिष्यद्यन्मां नागमिष्यः छांदो. ५।१२।२
मूर्धा त्वेष आत्मन इति होवाच छांदो. ५।१२।२
मूर्धा द्रोणकलशः प्रा. हो. ४।२
मूर्धानमस्य संसेव्याप्यथर्वा हृदयं च यत् अ. शिरः. ३।१४
मूर्धानमिति मूर्धन्यग्रे न्यसेत् भस्मजा. १।५
मूर्धा ब्रह्मा शिखान्तः गायत्रीर. १०
मूर्ध्नि चित्तसंयमात्सत्यलोकज्ञानं शांडि. १।७।५२
मूर्ध्नि द्वारमथापरम् अ. ना. २७
मूर्ध्नि शतकुबेरः आचम. ५
मूर्ध्नि संयमाद्ब्रह्मलोकज्ञानं (मनसः) शांडि. १।७।५२
मूर्ध्न्याधायात्मनः प्राणं भ. गी. ८।१२

मूर्ध्न्याधायात्मनः प्राणान् योगाभ्यासं स्थितश्चरन् त्रि. ब्रा. २।१९
मूलच्छेदादिव द्रुमः अ. पू. ४।५४
मूलप्रकृतिजननीमविद्यालक्ष्मीमेवं ध्यात्वा विविधोपचारैराराध्य ...महाविराट्पदं प्राप त्रि. म. ना. ६।२
मूलप्रकृतिरूपत्वात् सा सीता प्रकृतिः स्मृता सीतो. १
मूलमन्त्रद्वयं च ' विष्णोर्नुकम् ' ' गन्धद्वाराम् ' इत्येताभिरभि-मन्त्रयेत् नारदो. १
मूलमृल्लेपनान्महापापभञ्जिनीं तर्पणाद्न्तर्मलनाशिनीं य एवं वेद स वैष्णवो भवति तुलस्यु. २
मूलमेकं सत्यं मृण्मयं विज्ञातं स्यात् परब्र. ४
मूलशृङ्गाटमध्यस्था बिन्दुनाद-कलाश्रया अ. पू. १।४
मूलाधारगता शक्तिः स्वाधारा.. तस्यामुत्पद्यते नादः यो. शि. ३।३
मूलाधारत्रिकोणस्था सुषुम्ना द्वादशाङ्गुला। मूलार्धच्छिन्न-वंशाभा ब्रह्मनाडीति सा स्मृता यो. शि. ५।१७
मूलाधारं यदा प्राणः प्रविष्टः पण्डितोत्तम। तदाद्यं विषुवं प्रोक्तं तापसैस्तापसोत्तम जा. द. ४।४३
मूलाधारं स्वाधिष्ठानं मणिपूरं तृतीयकम्। अनाहतं विशुद्धं च आज्ञाचक्रं च षष्ठकम् योगकुं. ३।९
मूलाधारादाब्रह्मरन्ध्रपर्यन्तं...ब्रह्म-रन्ध्रादामूलाधारपर्यन्तं गता-गतरूपेण प्रादक्षिण्यं भावनो. १०
मूलाधारादारभ्य ब्रह्मरन्ध्रपर्यन्तं सुषुम्ना सूर्याभा मं. ब्रा. १।२
मूलाधारादिषट्चक्रं सहस्रारोपरि स्थितम्। योगज्ञानैकफलकं रामचन्द्रपदं भजे यो. चू. शीर्षकं
मूलाधारादिषट्चक्रं शक्तिस्थानमुदी-रितम्। कण्ठादुपरि मूर्धान्तं शाम्भवं स्थानमुच्यते वराहो. ५।५३

मूलाधारे स्मरेद्दिव्यं त्रिकोणं तेजसां निधिम् — कालिको. ४
मूलाविद्या प्रथमपादे, नान्यत्र.. — त्रि. म. ना. १।४
मूले शून्यं विजानीयात् । शून्यं वै परं ब्रह्म — ग.पू. ३।१
मूलेन म्रियते होता ध्रुवस्थानं कथं भवेत् — आत्मो. १
मूषास्थद्रुतहेमाभं स्फुरितं विमलाम्बरे । सन्निवेशमथादत्ते तत्तेजः स्वस्वभावतः — महो. ५।१५५
मृगतृष्णाजलं पीत्वा तृप्तश्चेद्स्त्विदं जगत् — ते. बिं. ६।७४
मृगाणां च मृगेन्द्रोऽहं — भ. गी. १०।३०
मृगतृष्णाम्बुबुद्ब्यादिशान्तिमात्रात्मकस्त्वसौ — महो. ५।४१
(तत्र) मृज्जलाभ्यां बाह्यं मनःशुद्धिरान्तरम् — शांडिल्यो. १।१।३
मृडाजरित्रे रुद्रस्तवानो अन्यन्ते अस्मन्निवपन्तु सेनाः — नृ. पू. २।४
[ऋ. मं. २।३३।११+ ते.सं. ४।५।१०।४
[अथर्व. १८।१।४०+
मृणालतन्तुसूक्ष्मा कुण्डलिनी — मं. ब्रा. १।२
मृण्मयान्यप्सु(पात्राणि) जुहुयात — कठरु. २
मृतगात्रस्यशोभादेर्धनंजय उदाहृतः — त्रि. ब्रा. २।८७
मृतश्चाहं पुनर्जातो जातश्चाहं पुनर्मृतः । नानायोनिसहस्राणि मया यान्युषितानि वै — निरुक्तो. १।५
मृतसूतकजं देहं स्पृष्ट्वा स्नानं विधीयते — मैत्रे. २।७
मृतस्य मरणं कुतः — यो. शि. १।४५
मृता मोहमयी माता जातो बोधमयः सुतः । सूतकद्वयसम्प्राप्तौ कथं सन्ध्यामुपास्महे — मैत्रे. २।१३
मृते च नेदं शरीरं चेतनवत्प्रतिष्ठापितं प्रचोदयिता चैषोऽस्येति — मैत्रे. २।९
मृतो मोक्षमश्नुत इति — गोपीचं. ८
मृत्तिकानां सहस्रेण चोदकुम्भशतेन च । न शुद्ध्यन्ति दुरात्मानो येषां भावो न निर्मलः — भ.जा. ३।१९

मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम् — महाना. ४।५
मृत्तिके प्रतिष्ठितं सर्वं तन्मे निर्णुद मृत्तिके — महाना. ४.७
मृत्तिके ब्रह्मदत्ताऽसि काश्यपेनाभिमन्त्रिता — महाना. ४।६
मृत्तिके हन मे पापं त्वयि सर्वं प्रतिष्ठितम् — यज्ञोप. ३
मृत्तिके हन मे पापं यन्मया दुष्कृतं कृतम् — महाना. ४।५
मृत्यवे त्वा ददानीति [मा.पा.] — कठो. १।४
मृत्यवे त्वां ददामीति — कठो. १।४
मृत्यवे स्वाहा मृत्यवे स्वाहा — महाना. १४।१
मृत्युचक्रगतस्यापि तस्य मृत्युभयं कुतः — यो. शि. १।८३
मृत्युनैवेदमावृतमासीत् — बृह. १।२।१
मृत्युमृत्युत्वान्नमामित्वात् — नृसिंहो. ७।५
मृत्युमृत्युममृत्युमृत्युं (नारसिंहं) — नृसिंहो. ६।१
मृत्युमृत्युं नवमं स्थानं (जानीयात्) — नृ. पू. २।३
मृत्युमेवाप्येति यो मृत्युमेवास्तमेति — सुबालो. ९।८
मृत्युरपानो भूत्वानाभिंप्राविशत् — २ ऐत. २।४
मृत्युरस्यात्मा भवति — बृह. १।२।७
मृत्युरेवाप पुनर्मृत्युं जयति — बृह. १।२।७
मृत्युर्धावति पञ्चमः [कठो. ६।३+ — तैत्ति. २।८
मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिं च कृत्स्नम् । ब्रह्मप्राप्तो विरजोऽभूद्विमृत्युः — कठो. ६।१८
मृत्युर्न जननाभावात् — ते. बिं. ५।२०
मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः — कठो. २।२४
मृत्युर्वा असत्सदमृतम् — बृह. १।३।२८
मृत्युर्वै तमो ज्योतिरमृतं — बृह. १।३।२८
मृत्युर्वै परे देव एकीभवति
[सुबालो. ११।२+१३।४+ १४।१+१५।२
मृत्युसंसारवर्त्मनि — भ. गी. ९।३
मृत्युसंसारसागरात् — भ. गी. १२।७
मृत्युं चतुर्थस्याद्यार्धन्त्यं साम तु जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति — नृ. पू. १।५

मृत्युं च नाभिनन्देत जीवितं
  वा कथञ्चन ना. प. ३।६०
मृत्युं यजे प्रथमजामृतस्य चिन्त्यु. १५।३
मृत्युं श्रुतिपरायणाः भ. गी. १३।२७
मृत्युः सर्वहरश्चाहं भ. गी. १०।३०
मृत्योर्माऽमृतं गमय [चक्षु. २+ चाक्षुषो. २
मृत्योर्माऽमृतं गमयामृतं मा
  कुर्वित्येतदाह बृ. उ. १।३।२८
मृत्योर्मामृतं गमयेति...(मा.पा.) बृ. उ. १।३।२८
मृत्योर्मृत्युमित्याह मृत्योर्वा अयं
  मृत्युरमृतत्वं प्रजानामन्नादानाम् अव्यक्तो. ३
मृत्योस्तुल्यं त्रिलोकीं ग्रसितुमति-
  रसान्निःसृता किं नु जिह्वा...
  देवैर्दोर्भ्यास्त्रिशूलक्षतमहिषजुषो
  रक्तधारा जयन्ति वनपं. ४
मृत्योः स मृत्युमाप्नोति य इह नानेव
  पश्यति [कठो. ४।१०+ आ. प्र. १
  [बृ. उ. ४।४।१९+
मृत्योः स मृत्युमाप्नोति नृसिंहो. ८।७
मृत्योः स मृत्युं गच्छति य इह
  नानेव पश्यति कठो. ११
मृदभिन्नं हि कार्यकम् पञ्चब्र. २९
मृदा तोयेन शुद्धिः स्यान्न क्लेशो
  न धनव्ययः भवसं. ३।२०
मृदु स्मणं वायोः छांदो. २।२२।१
मृद्भस्मगोमयजलं पत्रपुष्पेन्धनं
  समित् । पर्याप्तमष्टकं ह्येत-
  द्दैवेऽर्थे तु समाहरेत् शिवो. ७।२६
मृद्वत्संस्थमयस्पिण्डं यथाऽयय-
  स्कारादयो नाभिभवन्ति मैत्रा. ६।२७
मृल्लोहविस्फुलिंगैस्तु (लिङ्गाद्यैः) अद्वैता. १५
मृषा वै किल मासं वदिष्ठा ब्रह्म
  ते ब्रवाणीति कौ. त. ४।१८
मृषैवोदेति सकलं मृषैव प्रविलीयते । योगकुं. १।८०
(ततः) मेघापायेऽंशुमानिवा-
  त्माविर्भवति [पैङ्गलो. ३।४+ कलिसं. ४
मेघा यथा व्योम न च स्पृशन्ति
  संसारदुःखानि न मां स्पृशन्ति वराहो. ३।३

मेघे अमेघे वा विद्युतं पश्येत्,
  मेघे वा विद्युतं न पश्येत् ३ ऐत. २।४।६
मेघो जायते स प्रस्तावो वर्षति
  [छांदो. २।३।१+ २।१५।१
मेघो भूत्वा प्रवर्षति त इह व्रीहि-
  यवा ओषधिवनस्पतयस्तिल-
  माषा इति जायन्ते छांदो. ५।१०।६
मेघो यत्संप्लवते स हिङ्कारो य-
  द्वर्षति स प्रस्तावो याः प्राच्यः
  स्यन्दन्तेसउद्गीथो याःप्रतीच्यः
  स प्रतिहारः समुद्रो निधनम् छांदो. २।४।१
मेढ्रादुपरि निक्षिप्य सव्यं गुल्फं
  ततोपरि । गुल्फान्तरं च
  संक्षिप्य मुक्तासनमिदं मुने जा. द. ३।९
मेदसः स्नायवः गर्भो. २
मेदसः स्नावा, स्नावोऽस्थीनि निरुक्तो. १।२
मेधया मनीषा महाना. १७।१३
मेधया हि तपसाऽजनयत्पिता बृह. १।५।२
मेधातिथिं काण्वमिन्द्रो जहार वा. मं. १
मेधा इष्टिर्धृतिर्मतिर्मनीषा २ ऐत. ५।२
मेधा देवी जुषमाणा न आगा-
  द्विश्वाची भद्रा सुमनस्यमाना महाना. १३।१
मेधावी छिन्नसंशयः भ. गी. १८।१०
लोके साधु प्रजायास्तन्तुं तन्वानः पितृणामनृणो भवति महाना. १०।७
लोकेऽस्मिन् द्विविधा निष्ठा भ. गी. ३।३
लोको ब्रह्म गुरुर्ब्रह्म शिष्यो ब्रह्म सदाशिवः । पूर्वं ब्रह्म परं ब्रह्म शुद्धं ब्रह्म शुभाशुभम ते. बिं. ६।३४
लोको मामजमव्ययम् भ. गी. ७।२५
लोको म्रियते जननाय च भवसं. १।२५
लोकोऽयं कर्मबन्धनः भ. गी. ३।९
लोपामुद्रायाः शक्तिकूटराजं पठित्वा वैष्णवी विद्या द्वादशे धामनि व्याचक्षते त्रि. ता. १।१६
लोभक्रोधादयो दैत्याः कृष्णो. ९
लोभं मोहं भयं दर्पं कामं क्रोधं च किल्बिषम् ते.बिं. १।१२
लोभः प्रवृत्तिरारम्भः भ.गी.१४।१२
लोभादयः पशवः (शा. यज्ञस्य) गर्भो. ११
लोभोपहतचेतसः भ. गी. १।३८
लोमभ्य ओषधिवनस्पतयो हृदयं निरभिद्यत २ प्रेत. १।४
लोमभ्य ओषधिवनस्पतयो ललाटात्क्रोधजो रुद्रो जायते सुबालो. १।१
लोमशां पशुभिः सह स्वाहा वैचि. १।५।१

लोमशेन ह स्म वै चर्मणा पुरा वीणा अपिदधति	३ ऐत. २।५।२
लोम हिङ्कारस्त्वक्प्रस्तावो मा५स- मुद्गीथोऽस्थि प्रतिहारो मज्जा निधनमेतद्यज्ञायज्ञीयमङ्गेषु प्रोतम्	छांदो. २।१९।१
लोम चरोष्ठमथर्ववेदः प्रीणातु	आचम. ४
लोमानि धूमो योनिरर्चिर्यदन्तः करोति तेऽङ्गारा अभिनन्दा विस्फुलिङ्गाः	बृह. ६।२।१३
लोमानि बर्हिः (यज्ञस्य)	महाना. १८।१
लोहानां काञ्चनं वरम्	इतिहा. ४९
लोहितशुक्लकृष्णगुणमयीगुणसाम्या- निर्वाच्यामूलप्रकृतिरासीत्	पैङ्गलो. १।२
लोहितं तिलकं ध्यायेत्	गुह्यका. ११
लोहिनी द्यौर्भवति	३ ऐत. २।४।४
लौकिकवैदिकमप्युपसंहृत्य सर्वत्र पुण्यापुण्यवर्जितो ज्ञानाज्ञान- मपि विहाय...देहत्यागं करोति यः सोऽवधूतः	तुरीया. ३
लौकिकवैदिकसा मध्ये स्वचतुर्दश- करणप्रवृत्तिं चेत् पुत्रे समारोप्य तदभावे शिष्ये तदभावे स्वा- त्मन्येव...तत्त्वमस्यादिवाक्यार्थ- स्वरूपानुसन्धानं कुर्वन्नुदीचीं दिशं गच्छेत्	प. हं. प. ५
लौकिकाग्नीनुदराग्नौ समारोपयेत्	आरुणि. २

व

वकारं जीवबीजं च उदानं शङ्खवर्णकम्	ध्या. बिं. ९६
वक्तव्यमेवाप्येति यो वक्तव्य- मेवास्तमेति	सुबालो. ९।६
वक्ता चास्य त्वादृगन्यो न लभ्यो...	कठो. १।२२
वक्त्राणि ते त्वरमाणा विशन्ति	भ.गी. ११।२७
वक्त्रेण सीत्कारपूर्वकं वायुं गृहीत्वा यथाशक्ति कुंभयित्वा नासाभ्यां रेचयेत्, तेन क्षुत्तृष्णालस्य- निद्रा न जायते	शांडि. १।७।१४
वक्त्रेणापूर्य वायुं हुतवहनिलये- ऽपानमाकृष्य धृत्वा स्वाङ्गुष्ठा- द्यङ्गुलीभिर्वरकरतलयोः षड्भि- रेवं निरुध्य। ... पश्यन्ति प्रत्ययांशं प्रणवबहुविधध्यान- संलीनचित्ताः	सौभाग्य. ७
वक्त्रेणोत्पलनालेन तोयमाकर्षये- न्नरः । एवं वायुर्ग्रहीतव्यः पूरकस्येति लक्षणम्	अ. ना. १३
वक्तुमर्हस्यशेषेण	भ.गी.१०।१६
वक्रतुण्डाय हुमिति चतुर्थः पादः	ग. पू. ता.१।१३
वक्षोन्यस्तवपुः प्रपीड्य सुचिरं योनिं च वामाङ्घ्रिणा...सेयं	
व्याधिविनाशिनी सुवासनो पद्यते मुद्रा नृणां कथ्यते	यो. चू. ६६
वक्षोन्यस्तहनुर्निपीड्य सुचिरं वामाङ्घ्रिणा हस्ताभ्यामनुधृतै- धारयन्प्रविततं पादं तथा दक्षिणम् । आपूर्य श्वसनेन कुक्षियुगलं बध्वा शनै रेचये देषा पातकनाशिनी ननु मह मुद्रा नृणां प्रोच्यते	महत्. राधोप. ४
	भ. गी.
	भ. गी. ११
	आर्षे. ७।१
	भ.गी. ११।१३
वक्षो वसत्यस्य वरां वरिष्ठ वाकं दधाना वबृधे समस्तं तस्मै वरिष्ठाय वरप्रवृद्धयै स्वाहा	महो. ५।१२
वक्ष्यन्ते कारणान्यष्टौ स्मृतिर्यै- रुपचर्यते	भ.गी. युर्वे. २०
वक्ष्यामि भरतर्षभ	भ. गी. ८।२३
वक्ष्यामि हितकाम्यया	भ. गी. १०।१
वचनात्पुरुषो ह्यव्यक्तमुखेन त्रिगुणं भुङ्क्ते	मैत्रा. ६।१०
वचनादानगमनविसर्गानन्द- पञ्चकम्	वराहो. १।१२
वचनादानगमनविसर्गानन्दहानो- पेक्षाबुद्धयोऽनङ्गकुसुमादिशक्त- योऽष्टौ	भाव. २

वचनादानगमनविसर्गानन्दास्त-
द्विषयाः (कर्मेन्द्रियाणां) पैङ्गलो. २।३
वचनादानगमनविसर्गानन्दाः
पृथिवीकार्यकर्मेन्द्रियविषयाः त्रि. ब्रा. १।४
वचसा तज्जपेन्नित्यं वपुषा तत्सम-
भ्यसेत् । मनसा तज्जपेन्नित्यं
तत्परं ज्योतिरोमिति यो. चू. ८७
वचसो वाग्व्यापारः ना. प. ६।३
वज्रदण्डसमुद्भूता मणयश्चैक-
विंशतिः । सुषुम्नायां स्थिताः
सर्वे सूत्रे मणिगणा इव यो.शि. १।११८
वज्रदेह वज्रपुच्छ वज्रकाय... लांगूलो. ३
वज्रनखाय विद्महे तीक्ष्णदंष्ट्राय
धीमहि । तन्नो नारसिंहः
(नृसिंहः) प्रचोदयात् महाना. ३।९
[त्रि. म. ना. ७।१०+ वनदु. १३७
वज्रपञ्जरनाम्नैव यः कुर्याद्भस्म-
धारणम् । स सर्वभयनिर्मुक्तः
साक्षाच्छिवमयो भवेत् वज्रपं. ६
वज्रपञ्जरेण भस्मधारणं कुर्यात् वज्रपं. १
वज्रशक्तिपाशाङ्कुशगदात्रिशूल-
चन्द्रमुसलपद्मानि द्वादशे.. सूर्यता. ५।१
वज्रस्तम्भवदात्मानमवलम्ब्य
स्थिरोऽस्म्यहम् १सं. सो.२।५०
वज्राङ्गं पिङ्गनेत्रं कनकमयलस-
त्कुण्डलाक्रान्तगण्डं...
ध्यायन्तं रामचन्द्रं प्लवगपरिवृढं
सत्त्वसारं प्रसन्नम् लांगूलो. २
वज्रोली चामरोली च सहजोली
त्रिधा मता १ यो. त. २७
वज्रोलीमभ्यसेद्यस्तु स योगी
सिद्धिभाजनम् १ यो.त. १२६
वज्रोऽसि वार्त्रघ्नः शर्म मे भव
यत्पापं तन्निवारय आरुणि. ३
(तद्यथा) वटबीजसामान्यमेक-
मनेकान्स्वाव्यतिरिक्तान्वटान्
सबीजानुत्पाद्य तत्र तत्र पूर्णं
सत्तिष्ठत्येवमेवैषा माया स्वा-
व्यतिरिक्तानि पूर्णानि क्षेत्राणि
दर्शयित्वा जीवेशावाभासेन
करोति माया चाविद्या च
स्वयमेव भवति नृसिंहो. ९।३
वटबीजस्थमिव दत्तबीजस्थं
सर्वं जगत् दत्तात्रे. १।१
वडवाग्निः शरीरस्थो ह्यस्थिमध्ये
प्रवर्तते यो. शि. ५।३०
वडवेतराभवदश्ववृष इतरः बृह. १।४।४
वत्सरशतं ब्रह्ममानेन ब्रह्मणः
परमायुःप्रमाणम् त्रि.म.ना. ३।४
वत्सस्तु स्मृतयश्चास्य तत्सम्भूतं तु
गोमयम् । आगाव इति मन्त्रेण
धेनुं तत्राभिमन्त्रयेत् बृ. जा. ३।३
(अथ) वत्सं जातमाहुस्तृणाद इति बृह. १।५।२
वत्सं पयसा पुनानाः चित्यु. १४।२
वदन्तिबहुभेदेनवादिनोयोगभूमिकाः महो. ५।२२
वदन्ते चात्मनो भावं वेदान्तोप-
निषद्विदः अमन. २।२४
वदन्त्येव परं ब्रह्म बुद्धिमन्तस्तु सूरयः अमन. २।२३
वदन् वाक् पश्यंश्चक्षुः शृण्वन् श्रोत्रं
मन्वानो मनस्तान्यस्यैतानि
कर्मनामान्येव बृह. १।४।७
वदन्वै तन्न वदति न हि वक्तुर्वक्ते-
र्विपरिलोपो विद्यतेऽविनाशित्वात् बृह. ४।३।२६
वदिष्यन्ति तवाहिताः भ. गी. २।३६
वदिष्याम्येवाहमिति वाग्दध्रे बृह. १।५।२१
वदेदुन्मत्तवद्विद्वान् गोचर्यां नैगमश्चरेत् ना. प. ५।३७
वधाय दत्तं तमहं हनामि चित्यु. १४।४
वनभाराअष्टादशजायन्ते पुरुषोत्तमान् सि. वि. २
वनस्पतयओषध्यो लोमानिपरिचक्षते गुह्यका. १७
वनस्पतयः शान्तिर्विश्वेदेवाः
शान्ति...[वा. सं. ३६।१७+ प्रवर्ग्या. १७
वनावनिविहारेण चित्तोपशम-
शोभिना । असङ्गसुखसौख्येन
कालं नयति नीतिमान् अक्ष्युप. २०
वनितादिषु वाक्कर्ममनोभि-
र्निस्स्पृहः शुचिः रामर. ४।२
वनी भूत्वा प्रव्रजेत् जाबालो. ४

वने शुष्कं शकृत् सङ्गृह्य कल्पोक्तविधिना कल्पितमुपकल्पं स्यात् (भस्म) बृ. जा. ३।३४
वन्दे रुद्रप्रियां नित्यमुत्पन्नां कामरूपिणीम्। उल्कामुखीं रुद्रजटीं नागपुष्पशिरोरुहाम् वनदु. ८५
वन्ध्याकुमारवचने भीतिश्चेदस्ति किञ्चन ते. बिं. ६।७३
वन्ध्यापुत्रो न तत्त्वेन मायया वाऽपि जायते अद्वैत. २८
वपुर्वह्निकणाकारं स्फुरितं व्योम्नि पश्यति महो. ५।१५२
वमनाहारमिव प्रवृत्तिं सर्वं हेयं मत्वा साधनचतुष्टयसम्पन्नो यः सन्न्यस्यति स एव ज्ञानसन्न्यासी १सं.सो. २।१३
वमनाहारवद्यस्य भाति सर्वेषणादिषु। तस्याधिकारः सन्न्यासे त्यक्तदेहाभिमानिनः मैत्रे. २।१८
वयमाद्यस्य दातारः पिता त्वं मातरिश्व नः प्रश्नो. २।११
वयमेतद्बाणमवष्टभ्य विधारयामः प्रश्नो. २।२
वयं कृतार्था इत्यभिमन्यन्ति बालाः मुण्ड. २।९
वयं देवस्य भोजनमिस्याचामति छांदो. ५।२।७
वयं नाम प्रब्रवामा घृतेना- (घृतस्या) स्मिन्यज्ञे धारयामा नमोभिः महाना. ८।९
[+तै. आ. १०।१०।२+ऋ.मं. ४।५८।२
[+वा. सं. १७।९०
वयं ब्रह्मचारिन्निदमुपास्महे (मा.पा.) छांदो. ४।३।७
वयं ब्रह्मचारिन्नेदमुपास्महे दत्तास्मै भिक्षामिति छांदो. ४।३।७
वयं सोम व्रते तव मनस्तनुषु बिभ्रतः लिङ्गोप. १
[+ऋ.मं.१०।५७।६+वा.सं.३।५६
वयᳪ स्वर्गलोकमेष्यामो वयमेष्यामः सहवै. १
(ॐ) वयः सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः महाना. १६।७
[चाक्षुषो.९+ऋ.मं१०।७३।११
[+साम. १।३१९ तै.आ. ४।४२।३
वयांसि वैतद्धिमपीरक्षिति बृह. ३।९।२५
वयो दात्रे मयो मह्यमस्तु प्रतिग्रहीत्रे चित्यु. १०।१,४
वरणायां ना-(-स्यां) इयां च मध्ये प्रतिष्ठितः [जाबालो. २+ रामो. ३।२
वरदं सर्वभूतानां सर्वं व्याप्यैव तिष्ठति १ प्रणवो. ११
वराकृतप्राप्तिः ज्ञानम् आत्मपू. १
वराह एनं हन्ति, मर्कट एनमास्कन्दति (दुःस्वप्ने) ३ ऐत. २।४।१७
वराहरूपिणं मां ये भजन्ति मयि भक्तितः। विमुक्ताज्ञानतत्कार्या जीवन्मुक्ता भवन्ति ते वराहो. १।१६
वरुण एव सविताऽऽपः सावित्री स यत्र वरुणस्तदापो यत्र वा आपस्तद्वरुणस्ते द्वे योनिस्तदेकं मिथुनम् साविश्यु. २
वरुणमेवाप्येति यो वरुणमेवास्तमेति सुबालो. ९।४
वरुणस्य विराट् चित्यु. ९।१
वरुणेन मुखेन न वै देवा अश्नन्ति न पिबन्ति छांदो. ३।८।१
वरुणेनैव मुखेनैतदेवामृतंदृष्ट्वातृप्यति छांदो. ३।८।३
वरुणोऽपामघमर्षणस्तस्मात् प्रमुच्यते महाना. ६।८
वरुणो यादसामहम् भ.गी.१०।२९
वरुणोऽर्यमाः चन्द्रमा कला कलिर्धाता...सर्वं नारायणः सुबालो. ६।१
वरेण्यं श्रेष्ठं भजनीयमक्षरं नमस्कार्यम् त्रि. ता. १।६
वरो दक्षिणा, वरेणैव वरं स्पृणोत्यात्मा हि वरः सहवै. २०,२२
वर्गोऽसि पाप्मानं मे वृङ्ग्धीत्येतयैवाऽऽवृता मध्ये सन्तमुद्वर्गोऽसि पाप्मानं म उद्वृङ्धि कौ. त. २।७
वर्चोदास्त्वमसि सूर्यस्य महाना.१७।१५
वर्जयित्वा स्त्रियाः सङ्गं कुर्यादभ्यासमादरात्। योगिनोऽङ्गे सुगन्धश्च जायते बिन्दुधारणात् १ यो. त. ६२
वर्णत्रयात्मकाः प्रोक्ता रेचपूरककुम्भकाः। स एष प्रणवः प्रोक्तः प्राणायामस्तु तन्मयः जा. द. ६।२

वर्णे रक्तं कामदं च सर्वाधिव्याधि-
भेषजम् । सृष्टिस्थितिलयादीनां
कारणं सर्वशक्तिधृक् पञ्चब्र. १२
वर्णे शुभ्रं तमोमिश्रं पूर्णबोधकरं
स्वयम् । धामत्रयनियन्तारं
धामत्रयसमन्वितम् पञ्चब्र.८
वर्णः स्वरः । मात्रा बलम् । साम
सन्तानः तैत्ति. १।२।१
वर्णाक्षरपदाङ्कशो विभक्त्यामृषि-
निषेवितामिति वाचं स्तुवन्ति २ प्रणवो. १७
वर्णादिधर्मं हि परित्यजन्तः
स्वानन्दतृप्ताः पुरुषा भवन्ति मैत्रे. १।१८
वर्णानां ब्राह्मण एव प्रधान इति
वेदवचनानुरूपं स्मृतिभिरप्युक्तम् व. सू. २
वर्णाश्रमधर्मकर्मसङ्कल्पो बन्धः निरा. उ. २१
वर्णाश्रमं सावयवं स्वरूपमाद्यन्त-
युक्तं ह्यतिकृच्छ्रमात्रम् । पुत्रा-
दिदेहेष्वभिमानशून्यं भूत्वावसे-
त्सौख्यतमे ह्यनन्ते मैत्रे. १।१९
वर्णाश्रमाचारयुता विमूढाः
कर्मानुसारेण फलं लभन्ते मैत्रे. १।१८
वर्णाश्रमाचारविशेषाः पृथक्पृथक्
शिखावर्णाश्रमिणामेककैव परम. ६
वर्णाश्रमादयो देहे मायया परि-
कल्पिताः नात्मनो बोधरूपस्य
मम ते सन्ति सर्वदा । इति यो
वेद वेदान्तैः सोऽतिवर्णाश्रमीभवेत् ना. प. ६।१६
वर्णाश्रमेषु ये धर्माः शास्त्रोक्ता नृप-
सत्तम । तेषु तिष्ठन्नरो विष्णु-
माराधयति नान्यथा भवसं. २।६१
वर्णो ह वै पुरुषः स लोकाधि-
ष्ठितो भवत्यनुष्ठुब्वै पुरुषः ग. पू. ३।१
वर्ण्यन्ते स्वस्तिकं पादतलयो-
रुभयोरपि । पूर्वोत्तरे जानुनी
द्वे कृत्वाऽऽसनमुदीरितम् त्रि. ब्रा. २।३५
वर्त एव च कर्मणि भ. गी. ३।२२
वर्तते कामकारतः भ.गी. १६।२३
वर्तते विदितात्मनाम् भ. गी. ५।२६
वर्तन्त इति धारयन् भ. गी. ५।९
वर्तमानानि चार्जुन भ. गी. ७।२६
वर्तेतात्मैव शत्रुवत् भ. गी. ६।६
वर्त्याधारस्नेहयोगाद्यथा दीपस्य
संस्थितिः । अन्तर्याण्डोपयोगा-
दिमौ स्थितावात्मशुची तथा मैत्रा. ६।३६
वर्षति स उद्गीथः [छां.उ.२।३।१+ २।१५।१
वर्षस्येव यथा धर्मामृतधाराःसहस्रशः अध्यात्मो. ३८
वर्षन्तं न निन्देत्तद्व्रतम् छांदो. २।१५।२
वर्षन्तु ते विभावरि दिवो अभ्रस्य
विद्युतः । रोहन्तु सर्वबीजान्यव
ब्रह्म द्विषो जहि [वनदु.३८,४०+ ऋ.खि.५।८४।१
वर्षस्य रेत ओषधयः १ ऐत. १।३।१
वर्षस्य संक्लृप्त्या अन्नं सङ्कल्पयते छांदो. ७।४।२
वर्षो उद्गीथः छांदो. २।१६।१
वर्षाभ्योऽन्यत्र यत्स्थानमासनं तदु-
दाहृतम् । उक्तालाब्वादिपात्रा-
णामेकस्यापीह सङ्ग्रहः १सं.सौ. २।८०
वर्षाभ्योऽन्यत्र वर्षासु मासांश्च
चतुरो वसेत् । द्विरात्रं वा
वसेद्ग्रामे भिक्षुर्यदि वसेत्तदा ना. प. ४।१५
वर्षासु ध्रुवशीलोऽष्टौ मासानेकाकी
यतिश्चरेत् आरुणि. ४
वर्षास्वेकत्र तिष्ठेत स्थाने पुण्य-
जलावृते (यतिः) ना.प. ४।२१
वल्मीकताडनादेव मृतः किंनु महोरगः वराहो. २।४०
वशः कौलेयकेनेव ब्रह्मन्मुक्तोऽस्मि
चेतसा महो. ३।१९
वशिन्येका निष्क्रियाणां बहूनामेकं
बीजं बहुधा या करोति गुह्यका. ७०
वशी सर्वस्य लोकस्य स्थावरस्य
चरस्य च श्वेताश्व. ३।१८
वशे सततमत्रः स्यात्संहृत्याङ्गानि
कूर्मवत् । तत्सम्मुखं च निर्गच्छे-
न्नमस्कारपुरःसरः शिवो. ७।६७
वश्यमायत्वमेकं सर्वज्ञत्वं च तस्य तु सरस्व. ३९
वश्याय पङ्कजैर्विद्वान् धनार्थी
मोदकैर्हुनेत् ग. पू. २।१३
वश्यां स्फुरन्तीमसतीं निपीड्य
सम्भक्ष्य सिंहेन स एव वीरः नृसिंहो. ४।३

वश्यो वाणो रागः पाशः द्वेषोऽङ्कुशः भावनो. ६
वसन्तो अस्यासीदाज्यम् चित्यु. १२।३
[+ऋ.मं.१०।९०।६+ पु. सू.६,१४
वसन्तो हिङ्कारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत्प्रतिहारो हेमन्तो निधनमेतद्वैराजमृतुषु प्रोतम्
[छांदो. २।५।१+ २।१६।१
वसापराणि द्वात्रिंशतं वर्षाणीति सहापराणि द्वात्रिंशतं वर्षाण्युवास छांदो. ८।९।३
वसिष्ठवालखिल्यविश्वामित्रकश्यपात्रिभरद्वाजाङ्गीरसजामदग्निगौतमागस्त्यजाबालिकपिला द्वादशदलाः ना.पू. ता.६।१
वसिष्ठवैयासकिवामदेवविरिञ्चिमुख्यैर्हृदि भाव्यमानः । सनत्सुजातादिसनातनाद्यैरीड्यो महेशो भगवानादिदेवः शरभो. २०
वसिष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेत् छांदो. ५।२।५
(यो ह वै) वसिष्ठां वेद, वसिष्ठः स्वानां भवति, वाग्वै वसिष्ठा बृह. ६।१।२
वसीयान् भवति स य एतदेनमुपास्ते आर्षे. ४।३
वसुरण्वो विभुरसि प्राणे त्वमसि सन्धाता ब्रह्मंस्त्वमसि.. महाना.१७।१५
वसुरुद्रादित्यैः सर्वैर्देवैः सेवितं दिवं तद् साम्नस्तृतीयं पादं जानीयात् [नृ. पू. १।२ ग.पू.ता. १।१२
वसूनामेव तावदाधिपत्यं स्वाराज्यं पर्येता छांदो. ३।६।४
वसूनामेवैको भूत्वाऽग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति छांदो. ३।६।३
वसूनां पावकश्चास्मि भ. गी. १०।२३
वसूनां प्रातस्सवनं रुद्राणां माध्यंदिनं सवनमादित्यानां च विश्वेषां च देवानां तृतीयसवनम् छांदो. २।२४।१
वसेदेकान्तिको भूत्वा चैकान्ते द्वैतवर्जिते । इत्येवमाचरेद्धीमान्स एवं मुक्तिमाप्नुयात्
[स्कन्दो. १२+ मैत्रे.२।३
वसोर्धाराणामिन्द्रनगरं तदसुराः पर्यवारयन्त २ प्रणवो. ७
वसोः पवित्रमसि सवितुश्च रश्मयः पुनन्त्वन्नं ममदुष्कृतं च यदन्यत् मैत्रा. ६।९
वस्तुतो नोपादानमत एव नोपादेयम् स्वसंवे. १
वस्त्रमपि भूमौ वाऽप्सु वा विसृज्य ....ब्रह्माहमस्मीति तत्त्वमस्यादिवाक्यार्थस्वरूपानुसन्धानं कुर्वन्नुदीचीं दिशं गच्छेत् प. हं. प. ५
वस्त्रमुच्छिष्टपात्रमिव (त्यजेद्यति:) ना. प. ७।१
वस्त्वभावं सुबुध्यैव निःसङ्गं विनिवर्तते अ. शां. ७९
वस्त्वेकं परब्रह्म नारायणः सनातनः ना.पू.ता. ५।६
वस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते, स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति छांदो.५।१८।१
वहन्ति ह वा एनं तन्तिसम्बद्धाः, य एवं वेद १ ऐत. १।६।१
वह्नित्रयं तच्च जगत्त्रयं यद्गुणत्रयं तच्च शक्तित्रयं स्यात् सि. शि. १५
वह्निर्यस्य चन्द्रसूर्यौ च नेत्रे दिशः श्रोत्रे प्राणमाहुश्च वायुः विष्णुहृ. १।४
वह्निस्त्रिकोणं रक्तं च रेफाक्षरसमुद्भवम् यो. त. ९१
वह्निःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि त्रि. ब्रा. १।३
वह्नेर्यथा योनिगतस्य मूर्तिर्न दृश्यते नैव च लिङ्गनाशः श्वेताश्व. १।१३
वह्नेश्च यद्वत्खलु विस्फुलिङ्गाः सूर्यान्मयूखाश्च तथैव तस्य । प्राणादयो वै पुनरेव तस्मादभ्युच्चरन्तीहयथाक्रमेण [मैत्रा.६।२६ +६।३१
वह्नौ चानिलमारोप्य रेफाक्षरसमुज्ज्वलम् १ यो. त. ९२
वह्नौ विवर्धमाने तु सुखमन्नादि जीर्यते वराहो. ५।४७
वंशस्तु भगवान् रुद्रः शृङ्गमिन्द्रः सगोसुरः कृष्णो. ८
वाको वा अनुवाको वाकं वाकं सञ्जुषमाणो देवस्य स्वे स्वगुणवे स्वयं जेनातिवे ज्योतिषे स्वाहा पारमा. ४।१

वाक् च वक्तव्यं च नारायणः — सुबालो. ६।१
वाक्तदा प्राणं रेतुश्च यत्र तूष्णीं वा भवति स्वपिति वा तदा वाग्भवति — ३ ऐत. १।६।६
वाक्पतिर्होता — चित्यु. १।१
वाक्पतिश्चक्षुष्पतिः, श्रोत्रपतिर्विज्ञानपतिः, एतत्ततो भवति — तैत्ति. १।६।२
वाक्परस्ताच्चक्षुराकुन्धे — कौ. त. २।२
वाक्पाणिपादपायूपस्थाख्यानि कर्मेन्द्रियाणि — शारीरको. १
वाक्पाणिपादपायूपस्थास्तद्वृत्तयः (कर्मेन्द्रियाणां) — पैङ्गलो. २।३
वाक् पूर्वरूपं, मन उत्तररूपं, प्राणः संहितेति शूरवीरो माण्डूकेयः — ३ऐत. १।१।२
वाक्प्राविशद्यशयदेव — १ ऐत. १।४।६
वाक्यमप्रतिबद्धं सत्प्राक्परोक्षावभासिते । करामलकवद्बोधमपरोक्षं प्रसूयते — अध्यात्मो.४
वाक्यार्थस्य विचारेण यदाप्नोति शरच्छतम् । एकवारजपेनैव ऋष्यादिध्यानतश्च यत् — शु. र. १।१७
(अथ) वाक्श्रोत्रं चक्षुर्मनः प्राण इत्येकेऽथ बुद्धिर्धृतिः स्मृतिः प्रज्ञानमित्येके — मैत्रा. ६।३१
वाक् सन्धिः, जिह्वा सन्धानम् — तै. उ. १।३।७
वाक्संहितेति पञ्चालचण्डः, वाचा वै वेदाः सन्धीयन्ते — ३ ऐत. १।६।५
वागध्यात्मं,वक्तव्यमधिभूतं,अग्निस्तत्राधिदैवतं, नाडी तेषां निबन्धनम् — सुबालो. ५।१०
वागष्टमी ब्रह्मणा संविदाना वाग्घ्यष्टमी ब्रह्मणा संवित्ते — बृह. २।२।३
वागनुष्टुबेवद्वाग्वमनुष्टुमः — बृह. ५।१४।५
(तस्य) वागर्चिश्चक्षुरङ्गाराः श्रोत्रं विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति — बृह. ६।२।१२
वागस्मात्सर्वाणि नामान्यभिविसृजते, वाचा सर्वाणि नामान्याप्नोति — कौ. त. ३।४
वागुदक्रामदवदन्नश्नन्पिबन्नास्तैव — १ऐत. १।४।४
वागेव गीथोच्चगीथा चेति स उद्गीथः — बृ. ह. १।३।२३
वागेवदेवाः,मनःपितरः,प्राणोमनुष्याः — बृह. १।५।६
वागेव ब्रह्मणश्चतुर्थः पादः, सोऽग्निना ज्योतिषा भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन — छांदो. ३।१८।३
वागेवर्क् प्राणः सामोमित्येतदक्षरमुद्गीथस्तद्वा एतन्मिथुनं यद्वाक् च प्राणश्चर्क् च साम च — छांदो. १।१।५
वागेवर्क्, प्राणः साम, तदेतदस्यामृच्यध्यूढ४ साम तस्मादृच्यध्यूढ४ साम गीयते — छांदो. १।७।१
वागेवर्ग्वेदो मनो यजुर्वेदः प्राणः सामवेदः — बृह. १।५।५
वागेव सम्राडिति होवाच–वाचा वै सम्राड् बन्धुः प्रज्ञायते — बृह. ४।१।२
वागेव ह्यनुजानाति चिन्मयो ह्ययमोङ्कारश्चिदेव ह्यनुज्ञाता — नृसिंहो. ८।६
वागेवात्रिर्वाचा ह्यन्नमद्यतेऽत्ति ह वै नामैतद्यदत्रिरिति — बृह. २।२।४
वागेवायतनमाकाशः प्रतिष्ठा प्रज्ञेत्येनदुपासीत — बृह. ४।१।२
वागेवायं लोकः, मनोऽन्तरिक्षं, लोकः प्राणोऽसौ लोकः — बृह. १।५।४
वागेवास्या एकमङ्गमुदूढं तस्यैनाम परस्तात्प्रतिविहिता भूतमात्रा — कौ. त. ३।५
वागेवास्य ज्योतिर्भवतीति, वाचैवायं ज्योतिषास्ते पल्ययते... — बृह. ४।३।५
वागेवेदं सर्वमनुजानाति चिन्मयो ह्ययमोङ्कारश्चिद्धीदं सर्वं निरात्मकमात्मसात्करोति — नृसिंहो. ८।४
वागेवेदं सर्वं, न ह्यशब्दमिवेहास्ति, चिन्मयो ह्ययमोङ्कारश्चिन्मयमिदं सर्वम् — नृसिंहो. ८।२
वागेवैतत्सर्वं विज्ञापयति वाचमुपास्स्वेति — छांदो. ७।२।१
वागोजः सहौजो मयि प्राणापानौ [प्रवर्ग्या. १+ — वा. सं. ३६।१

वाग्गीर्वाचो ह गिर इत्याचक्षते	छांदो. १।३।६
वाग्घि बृहती, तस्या एष पतिः (उद्गीथः)	छांदो. १।२।११
वाग्घि विज्ञाता वागेनं तद्भूत्वाऽवति	बृह. १।५।८
वाग्घोच्चक्राम, सा संवत्सरं प्रोष्या-गत्योवाच कथमशकत मदृते जीवितुमिति	बृह. ६।१।८
वाग्घोता, दीक्षा पत्नी, वातोऽध्वर्युः	चित्त्यु. ६।१
वाग्दण्डः कर्मदण्डश्च मनोदण्डश्च ते त्रयः। यस्यैते नियता दण्डाः स त्रिदण्डी महायतिः	ना. प. ६।११
वाग्दण्डे मौनमातिष्ठेत्कायदण्डे त्वभोजनम्। मानसे तु कृते दण्ड प्राणायामो विधीयते	१ सं.सो.२।९७
वाग्देवीं गायत्रीं शरणमहं प्रपद्ये	गायत्रीर. १०
वाग्घ्यष्टमी ब्रह्मणा संविदा...(मा.पा.)	बृह. २।२।३
वाग्वा अनुष्टुप् वाचैव प्रयन्ति वा-चो-(चैवो-) द्यन्ति, परमा वा एषा छन्दसां यदनुष्टुबिति [नृ. पू. १।१+	ग. पू. १।६
वाग्वा इदं सर्वं भूतं गायति च त्रायते च	छांदो.३।१२।१
वाग्वा ऋग्वेदं विज्ञापयति यजुर्वेदं सामवेदमाथर्वणं चतुर्थमिति-हासपुराणं पञ्चमं वेदानां वेदं..	छांदो. ७।२।१
वाग्वा ओङ्कारो वागेव ह्यनुजानाति चिन्मयो ह्ययमोङ्कारश्चिदेव ह्यनुज्ञाता	नृसिंहो. ८।६
वाग्वाओङ्कारोवागेवेदंसर्वमनुजानाति	नृसिंहो. ८।४
वाग्वा ओङ्कारो वागेवेदं सर्वं, न ह्यशब्दमिवेहास्ति	नृसिंहो. ८।२
वाग्वा साम्नो भूयसी	छांदो. ७।२।१
वाग्वेदिः, अधीतं बर्हिः, केतो अग्निः	चित्त्यु. १।१
वाग्वै ग्रहः, स नाम्नाऽतिग्राहेण गृहीतो वाचा हि नामान्य-भिवदति	बृह. ३।२।३
वाग्वै बृहती तस्या एष पतिस्त-स्मादु बृहस्पतिः	बृह. १।३।२०
वाग्वै ब्रह्म, तस्या एष पति-स्तस्मादु ब्रह्मणस्पतिः	बृह. १।३।२१
वाग्वै ब्रह्मेत्यवदतो हि किं स्यात्	बृह. ४।१।२
वाग्वै माता, प्राणः पुत्रः	३ ऐत. १।६।६
वाग्वै यज्ञस्य होता तद्येयं वाक् सोऽयमग्निः स होता स मुक्तिः साऽतिमुक्तिः	बृह. ३।१।३
वाग्वै रथन्तरस्य रूपं, प्राणो बृहतः, उभाभ्यामु खलु संहिता सन्धीयते वाचा च प्राणेन च	३ ऐत. १।६।१
वाग्वै वसिष्ठा, वसिष्ठः स्वानां भवति	बृह. ६।१।२
वाग्वै सम्राट् परमं ब्रह्म, नैनं वाग्जहाति	बृह. ४।१।२
वाग्वै सामैष सा चामश्चेति तत्साम्नः सामत्वम्	बृह. १।३।२२
वाङ्मामदेवतावरोधिनी सा मेऽमुष्मादिदमवरुन्धाम्	कौ. ब्रा. २।३
वाङ्मनश्चक्षुश्श्रोत्रजिह्वाघ्राणरेतो-बुद्ध्याकूतिसङ्कल्पा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा	महाना. १४।८
वाङ्मनःकायसङ्क्षोभं प्रयत्नेन विवर्जयेत्। रसभाण्डमिवा-त्मानं सुस्थिरं धारयेत्सदा	अमन. २।५५
वाङ्मनोगोचरश्चाहं सर्वत्र सुखवानहम्	ते. बिं. ३।३८
वाङ्मयस्तेजोमयोऽमृतमयः पुरुषो-ऽयमेव स योऽयमात्मा	बृह. २।५।३
वाङ्मयं तप उच्यते	भ.गी. १७।१५
वाङ्मया ब्रह्मभूस्तस्मात्षष्ठं वक्त्र-समन्वितम्। सूर्यो वामश्रोत्र-बिन्दुः संयुताष्टतृतीयकः	१ देव्यु. १६
वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरावीर्मएधि	२ ऐत. ६।१
वाच ऋग्रस ऋचः साम रसः साम्न उद्गीथो रसः	छांदो. १।१।२
वाचमष्टापदीमहमित्यष्टौ हि चतुरक्षराणि भवन्ति	१ पैत. ३।६।२

वाचमुद्गीथमुपासाञ्चक्रिरे ताᳬ हासुराः पाप्मना विविधुः	छांदो. १।२।३
वाचमेवाप्येति यो वाचमेवास्तमेति	सुबालो. ९।६
वाचस्पतिः सोममपात्	चित्त्यु. ५।१
वाचस्पतिः सोमं पिबति	चित्त्यु. २।१
वाचस्पतिः सोमं पिबतु	चित्त्यु. १,२
वाचस्पते च्छिद्रया वाचा	चित्त्यु. ४।१
वाचस्पते वाचो वीर्येण	चित्त्यु. २।१
वाचस्पते विधे नामन्	चित्त्यु. १।२
वाचस्पते हृद्विधे नामन्	चित्त्यु. ५।१
(एवं) वाचं च नाम च मनोऽनुभवति स यदा मनसा मनस्यति मन्त्रानधीयीयेत्यथाधीते	छांदो. ७।३।१
वाचं तदा प्राणे जुहोति	कौ. उ. २।५
वाचं ते मयि जुहोम्यसौ स्वाहा	कौ. उ. २।४
वाचं ते मयि दध इति पुत्रः	कौ. उ. २।१५
वाचं धेनुमुपासीत तस्याश्चत्वारः स्तनाः स्वाहाकारो वषट्कारो हन्तकारः स्वधाकारः	बृह. ५।८।१
वाचं मे त्वयि दधानीति पिता	कौ. उ. २।१५
वाचं मे दिशतु श्रीर्देवी मनो मे दिशतु वैष्णवी	लक्ष्म्यु. ३
वाचंयमोऽप्रसाहः स यदि स्त्रियं पश्येत्समृद्धं कर्मेति विद्यात्	छांदो. ५।२।८
वाचंयमोऽभिप्रव्रज्य संस्पर्शं जिगमिषेत्	कौ. उ. २।४
वाचंयमोऽभिप्रवृज्यार्थं ब्रुवीत	कौ. उ. २।३
वाचं वदन्तीं सर्वे प्राणा अनुवदन्ति	कौ. उ. ३।२
वाचं वेदा हृदयं वै नभश्च रसा पादौ तारका रोमकूपाः। साङ्गोपाङ्गान्यधिदैवानि ता विद्यादुपस्थं च तथा समुद्रम्	विष्णुहृ. १।५
वाचा च ह्येव स प्राणेन चोद्गायदिति	बृह. १।३।२४
वाचा छन्दांसि, वाचा मित्राणि सन्दधति वाचा सर्वाणि भूतानि। अथो वागेवेदं सर्वमिति	३ ऐत. १।६।९
वाचामगोचरनिराकारपरब्रह्मस्वरूपोऽहमेव	त्रि.म.ना. ८।६
वाचामगोचरानन्तदिव्यतेजोराश्याकारो भवति	त्रि.म.ना. ३।६
वाचामगोचरानन्तशुद्धबोधविशेषविग्रहं... चिद्रूपादित्यमण्डलं द्वात्रिंशद्व्यूहभेदैरधिष्ठितम्	त्रि.म.ना. ७।८
वाचामगोचरानन्दब्रह्मतेजोराशिमंडलमखण्डतेजोमंडलविशेषं ...शिवाद्वैतोपासका भजन्ते	सि. सा. ६।१
वाचामतीतविषयो विषयाशादशोज्झितः। परानन्दरसालुब्धो रमते स्वात्मनाऽऽत्मनि	अ. पू. ५।९६
वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यं [छांदो.	६।४।१।२,३,४
वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् [छांदो.६।१।४	+परम. ५
वाचारम्भणं विकारो नामधेयं लोहमित्येव सत्यम्	छांदो. ६।१।५
वाचारम्भणं विकारो नामधेयं कृष्णायसमेव सत्यम्	छांदो. ६।१।६
वाचा वदति यत्किञ्चित्सङ्कल्पैः कल्प्यते च यत्। मनसा चिन्त्यते यद्यत्सर्वं मिथ्या न संशयः	ते. बिं. ५।४५
वाचा वै वेदाः सन्धीयन्ते	३ ऐत. १।६।५
वाचा वै सम्राड् बन्धुः प्रज्ञायते	बृह. ४।१।२
(अथ) वाचा व्याहरति, तस्मान्मन एव पूर्वरूपं, वागुत्तररूपम्	३ ऐत. १।१।२
वाचा सर्वाणि नामान्याप्नोति	कौ. उ. ३।४
वाचा ह स्मैव पूर्व उपयन्ति स होपायनकीर्त्योवास	बृह. ६।२।७
वाचा हि नामान्यभिवदति	बृह. ३।२।३
वाचा होताऽध्वर्युरुद्गातान्यतराᳬ स यत्रोपाकृते प्रातरनुवाके पुरा परिधानीयाया ब्रह्माव्यववदति	छांदो. ४।१६।२
वाचा ह्यन्नमयतेऽत्त्रिर्ह वै नामैतद्यदत्त्रि.. (मा. पा.)	बृ. उ. २।२।४

वाचा ह्यमघतेऽस्ति ह वै नामैव- घदृत्रिरिति सर्वस्यात्ता भवति सर्वमस्यान्नं भवति बृह. २।२।४

वाचिकोपांशुरुच्चैश्च (जपः) द्विविधः परिकीर्तितः। मानसो मनन- ध्यानभेदाद्द्वैविध्यमाश्रितः जा. द. २।१४

वाचि तृप्यन्त्यामग्निस्तृप्यति छांदो.५।२१।२

वाचि वै तदैन्द्रं प्राणं न्यचायन्नित्ये- तत्तदुक्तं भवति १ ऐत. ३।५।२

वाचि हि खल्वेष एतत्प्राणः प्रतिष्ठितो गीयते बृह. १।३।२७

वाचि हि प्राणं जुहुमः, प्राणे वा वाचं ३ऐत. २।६।३

वाचे स्वाहा प्रतिष्ठायै स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति बृह. ६।३।२

वाचैव प्रयन्ति वाचो-(चैवो)द्यन्ति [नृ. पू. १।१+ ग. पू. १।६

वाचोऽग्निः (निरभिद्यत) २ ऐत. १।४

वाचो यस्मान्निवर्तन्ते तद्वक्तुं केन शक्यते ते. बि. १।२१

वाचो वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीतु छांदो. ७।२।२

वाचो वीर्यं तपसाऽन्वविन्दन् चित्यु. ११।२

वाचो ह गिर इत्याचक्षते छां. उ. १।३।६

वाचो ह वाचं स उ प्राणस्य प्राणश्चक्षुपश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति केनो. १।२

वाच्यं लक्ष्यमिति द्विधाऽर्थसरणी- वाच्यस्य हि त्वम्पदे वाच्यं भौतिकमिन्द्रियादिरपि यल्लक्ष्यं त्वमर्थश्च सः। वाच्यं तत्पद- मीशताकृतमतिर्लक्ष्यं तु सच्चि- त्सुखानन्दब्रह्म तदर्थ एष च तयोरैक्यं त्वसीदं पदम् शु. र. ३।१०

वाजपेयः पशुहर्ता, अध्वर्युरिन्द्रो देवता अहिंसा धर्मयागः परम- हंसोऽध्वर्युः परमात्मा देवता पशुपतिर्ब्रह्मोपनिषदो ब्रह्म पा. ब्र. ५

वाञ्छाक्षणे तु या तुष्टिस्तत्र वाञ्छैव कारणम्। तुष्टिस्त्व- तुष्टिपर्यन्ता तस्माद्वाञ्छां परित्यज अ. पू ५।३७

वातरशना ह वा ऋषयः श्रमणा ऊर्ध्वमन्थिनो बभूवुः सह्वै. ११

वातं प्राणं मनसाऽन्वारभामहे प्रजापतिं यो भुवनस्य गोपाः महाना. १३।९

वातं प्राणः, द्यौः पृष्ठम् चित्यु. ४।१

वातं प्राणः (अप्येति)चक्षुरादित्यं, मनश्चन्द्रम् बृह. ३।२।१३

वातापेर्हवनः श्रुतः स्वाहा चित्यु. ३।१

वातोऽध्वर्युः चित्यु. ६।१

(तद्यथा-)वातोऽप्सु शनैर्वाति सुखीभवेति, एवं... संहितो. १।४

वातो वाति, प्रजा निर्मुच्यते संहितो. १।३

(तद्यथा-)वातो वाति शीघ्रं...बहु विभग्नं प्रभग्नंश्येतैव ते मे वैनया संहितो. १।४

वातोऽस्माज्जीवः पवते ग.शो.ता. ४।२

वादः प्रवदतामहम् भ.गी. १०।३२

वादा इति वादविदो भुवनानीति तद्विदः वैतथ्य. २४

वानप्रस्थगृहस्थाभ्यां न संसृज्येत कर्हिचित्। अज्ञातचर्यां लिप्सेत न चैनं दर्प आविशेत् ना.प. ५।३०

वानप्रस्थशतमेकमेकेन यतिना तत्समं यतीनां तु शतं पूर्णमेक- मेकेन रुद्रजापकेन नृ.पु.उ. ५।१६

वानप्रस्था अपि चतुर्धा भवन्ति वैखानसा औदुम्बरा वाल- खिल्या यायावराः... आश्रमो. २

वामकर्णे संयमाद्वायुलोकज्ञानम् शांडि.१।७।५२

वामचक्षुषि संयमाच्छिवलोकज्ञानम् शांडि.१।७।५२

वामदक्षिणे सिद्धिबुद्धिः (गणेशस्य) ग. पू.ता.२।१०

वामदेवं महाबोधदायकं पावकात्मकम् पञ्चब्र. ५

वामदेवं येऽनुसरन्ति नित्यं मृत्वा जनित्वा च पुनः पुनस्तत्। ते वै लोके क्रममुक्ता भवन्ति योगैः साङ्ख्यैः कर्मभिः सत्त्वयुक्तैः वराहो. ४।३५

(ॐ) वामदेवः परमेश्वरं सृष्टि- स्थितिलयकारणमुमासहितं स्वशिरसा प्रणम्येति होवाच बिल्वो. १

वामदेवात् क्षत्रिया वै विशश्च सि. शि. ९
वामदेवाय नमो ज्येष्ठाय नमः
श्रेष्ठाय नमो रुद्राय नमः... महाना. १०।५
वामनं त्वां महादेवं सर्वे देवा
उपासते । त्वत्तो जातं
जगत्कृत्स्नं स्थितं त्वय्येवलीयते २रुद्रो. ४६
वामपादपार्ष्णिं योनिस्थाने
नियोज्य..स्वात्मानं भावयेत्।
तेनापरोक्षसिद्धिः शांडि.१।७।४३
वामपादमूलेन योनिं सम्पीड्य
दक्षिणपादं प्रसार्य...वायुं
धारयेत् । तेन सर्वक्लेशहानिः शांडि. १।७।४३
वामबाहुर्दक्षिणकट्योरन्तश्चरति
हंसः परमात्मा ब्रह्मगुह्यप्रकारो
नान्यत्र विदितः पा. ब्र. ४
वामाङ्गेन समभ्यस्य दक्षाङ्गेन
ततोऽभ्यसेत् । प्रसारितस्तु यः
पादस्तमूरूपरि नामयेत् । अय-
मेव महाबन्धः.. १ यो.त. ११४
वामाभ्यां शत्रुजिह्वावज्रे दधानां...
देवीमाहूय ध्यायेत् पीताम्बरो. १
वामांसदक्षकट्यन्तं ब्रह्मसूत्रं तु सव्यतः परब्र. १६
वामांसादिदक्षिणकट्यन्तं विभा-
व्याद्यन्तमध्यसम्मेलनमेकं ज्ञात्वा
मूलमेकसत्यंमृण्मयंविज्ञातं स्यात् परब्र. ४
वामोरुमूले दक्षाङ्घ्रिं जान्वोर्वेष्टित-
पाणिना । वामेन वामाङ्गुष्ठं तु
गृहीतं मत्स्यपीठकम् । योनिं
वामेन सम्पीड्य मेढ्रादुपरि
दक्षिणम् ॥ ऋजुकायः समा-
सीनः सिद्धासनमुदीरितम् त्रि. ब्रा. २।४९
वायवो यत्र लीयन्ते, मनो
यत्र विलीयते यो. शि. ३।१२
वायव्यस्तु द्विमात्रकः अ. ना. ३१
वायावभ्यसिते वह्निः प्रत्यहं वर्धते
तनौ । वह्नौ विवर्धमाने तु सुख-
मन्नादि जीर्यते वराहो. ५।४७
वायुर्वो हृदयं प्राजापत्यात्क्रमात् गर्भो. २

वायुना गतिमावृत्य निभृतं कर्ण-
मुद्रया । पुटद्वयं समाक्रम्य
वायुः स्फुरति सत्वरम् १ यो.त. ११६
वायुना ज्वलितो वह्निः कुण्डली-
मनिशं दहेत् यो. शि. १।८५
वायुना पालितो वह्निरपानेन
शनैर्देहमध्ये ज्वलति शांडि. १।४।८
वायुना वै गौतम सूत्रेणायं च लोकः
परश्च लोकः सर्वाणि च भूतानि
सन्दृब्धानि भवन्ति बृह. ३।७।२
वायुना शक्तिचालेन प्रेरितं खे यथा
रजः । रविणैकत्वमायाति (याति
बिन्दुः सदैकत्वं) भवेद्दिव्यवपुस्तदा
[ध्या. बि. ९०+ यो. चू. ६३
वायुना सह चित्तं च प्रविशेच्च महापथम् १ यो.त. ८२
वायुना सह जीवोर्ध्वज्ञानान्मोक्ष-
मवाप्नुयात् यो. शि. ६।१६
वायुना हि गौतम सूत्रेण सन्दृब्धानि
भवन्ति बृह. ३।७।२
वायुपुत्र महाबाहो किं तत्त्वं ब्रह्म-
वादिनाम् रा. र. १।२
वायुपुत्रं विघ्नेशं वाणीं दुर्गां क्षेत्र-
पालकं सूर्यं चंद्रं नारायणं
नारसिंहं...सीतां लक्ष्मणं...
प्रणवमेतानि रामस्यांगानि रा. र. १।७
वायुभक्षोऽम्बुभक्षो वा विहिता
नोत्तरैः फलैः । स्वशरीरे
समारोपः पृथिव्यां नाश्रुपातकाः २ सन्यासो.५
वायुभक्षोऽम्बुभक्षो वा विहितैः
कन्दमूलकैः। स्वशरीरे समा-
प्याथपृथिव्यां नाश्रु पातयेत् कुंडिको. ४
(अथ) वायुमब्रुवन् वाय-
वेतद्विजानीहीति केनो. ३।७
वायुमय आकाशमयः (आत्मा) बृह. ४।४।५
वायुमाकाशे चाकाशमहङ्कारे पैङ्गलो. ३।३
वायुमेव भगवो राजन्निति होवा-
चैष वै पृथगवर्त्मात्मा वैश्वानरो
यंत्वमात्मानमुपास्से तस्मात्त्वां
पृथग्बलय आयन्ति छांदो.५।१४।१

वायुमेवाप्येति यो वायुमेवास्तमेति	सुबालो. ९।५
वायुरग्निरापः पृथिवी वाङ्मनश्चक्षुः श्रोत्रं च ते प्रकाशयाभिवदन्ति..	प्रश्नो. २।२
वायुरनिलममृतमथेदं भस्मान्तं शरीरम् [ईशा. १७+	बृह. ५।१५।१
वायुरस्मै पुण्यं गन्धमावहति	१ ऐत. १।७।३
वायुराकाशे विलीयते	सुबालो. २।२
वायुरात्माऽमावास्याः स्विष्टकृत्	सद्वै. १८
वायुरिति भस्म, जलमिति भस्म..	१ रुद्रोप. २
वायुरेव पवमानो दिशोहरितं प्रविष्टः	१ ऐत. १।१।३
वायुरेव सविताऽऽकाशः सावित्री स यत्र वायुस्तदाकाशो यत्र वा आकाशस्तद्वायुस्ते द्वे योनिस्तदेकं मिथुनम्	साविच्यु. ३
वायुर्गन्धानिवाशयात्	भ. गी. १५।८
वायुर्दिशां यथा गर्भ एवं गर्भं दधामि ते	बृ. उ. ६।४।२२
वायुर्नावमिवाम्भसि	भ. गी. २।६७
वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवति	छांदो. ५।१०।५
वायुर्यत्राभियुज्यते, सोमो यत्रातिरिच्यते, तत्र सञ्जायते मनः	श्वेताश्व. २।६
वायुर्यथैको भुवनं प्रविष्टो जन्ये-जन्ये पञ्चरूपो बभूव	गो. पू. २।३
वायुर्यथैको भुवनं प्रविष्टो रूपंरूपं प्रतिरूपो बभूव। एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च	कठो. ५।१०
वायुर्यमोऽग्निर्वरुणः	भ.गी. ११।३९
वायुर्वा अहमस्मीत्यब्रवीन्मातरिश्वा वा अहमस्मीति	केनो. ३।८
वायुर्वाऽमाकाशोऽन्नादः	सुबालो. १४।१
वायुर्वाव संवर्गो यदा वा महाप्रलये... (मा.पा.)	छांदो. ४।३।१
वायुर्वाव संवर्गो यदा वा अग्निरुद्वायति वायुमेवाप्येति	छांदो. ४।३।१
वायुर्वै गौतम तत्सूत्रं, वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि सन्दृब्धानि भवन्ति	बृह. ३।७।२
वायुर्व्यूहने आकाशमवकाशप्रदाने (शरीरस्य)	गर्भो. १
वायुर्हा इकारः, चन्द्रमा अथकारः	छां.उ. १।१३।१
वायुर्हायिकारः (मा. पा.)	छां. उ. १।१३।१
वायुर्ह्येवैतान्सर्वान्संवृङ्क्त इत्यधिदैवतम्	छांउ. ४।३।२
वायुवत्स्फुरितं स्वस्मिंस्तत्राहङ्कृतिरुत्थिता। पञ्चात्मकममृत्पिण्डं धातुबद्धं गुणात्मकम्	यो. शि. १।८
वायुवद्व्योमगो भवेत्	१ यो. त. ९६
वायुवेग मनोवेग श्रीराम तारक परब्रह्म विश्वरूपरूपदर्शन लक्ष्मणप्राणप्रतिष्ठानन्दकर स्थलजलादिमर्ममेदिन् सर्वशत्रून् छिन्धि छिन्धि	लांगूलो. ३
वायुश्च वायुमात्रा च	प्रश्नो. ४।८
वायुश्चाकाशश्चेत्यधिदैवतम्	३ ऐत. १।१।१
वायुस्ता॰ अग्ने प्रमुमोक्तु देवः	चित्यु. ११।१३
वायुं जित्वा विविधकरणैः क्लेशमूलैः कथञ्चित्कृत्वा यत्नं निजतनुगतान् शोष्य नाडिप्रवाहान्। अश्रद्धेयां परपुरगतिं साधयित्वाऽपि नूनं विज्ञानैकव्यसनसुखिनो नास्ति मोक्षस्य सिद्धिः	अमन. २।३०
वायुं निरुद्धय मेधावी जीवन्मुक्तो भवत्ययम्	१ यो.त. १०६
वायुं बिन्दुं तथा चक्रं चित्तं चैव समभ्यसेत्। समाधिमेकेन सममम‍ृतं यान्ति योगिनः	योगकु. ३।१३
वायुं भित्त्वाऽऽकाशं भिनत्ति	सुबालो. ११।२
वायुः पञ्चहोता	चित्यु. ७।२
वायुः परिचितो यत्नादग्निना सह कुण्डलीम्। भावयित्वा सुषुम्नायां प्रविशेदनिरोधतः	१ यो. त. ८१
वायुः पश्चिमतो वेधं कुर्वन्नापूर्य सुस्थिरम्। यत्र तिष्ठति सा प्रोक्ता घटाख्या भूमिका बुधैः	वराहो.५।७३,७४

वायुः प्राणस्तथाऽऽकाशस्त्रिविधो जीवसंज्ञकः — ब्र. वि. १४

वायुः प्राणो भूत्वा नासिके प्राविशत् — २ ऐत. २।४

वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा — मुंड. २।१।४

वायुः षट्कोणकं कृष्णं यकाराक्षरभासुरम् । मारुतं मरुतां स्थाने...धारयेत्तत्र सर्वज्ञमीश्वरं विश्वतोमुखम् — १ यो. त. ५५

वायुः-समानोदानव्यानापानप्राणाः — त्रि. ब्रा. १।३

वायुः सर्वत्रगो महान् — भ. गी. ९।६

वायूनां गतिमावृत्त्य धृत्वा पूरककुम्भकौ ।...पुटद्वयं समाकृष्य वायुः स्फुरति सत्वरम् । सोमसूर्याग्निसम्बन्धात्... — वराहो. ५।६१

वायोरग्निः (सम्भूतः) — तैत्ति. २।१।१

[+यो. चू. ७२+सुबालो.१।१ — पैङ्गलो. १।३

वायोरग्निरभवत् — गायत्रीर. १

वायोरग्निस्तथा चाग्नेराप अद्भ्यो वसुन्धरा — कठरु. १७

वायोरन्तरात्मा वहति समस्तः सपुण्यदेवेति स सूरिमुक्तः — पारमा. १०।२

वायोरात्मानं कवयो निचिक्युः — चित्यु. ११।४

वायोरायतनं चात्र नाभिदेशे समाश्रयेत् — क्षुरिको. ७

वायोरिव सुदुष्करम् — भ. गी. ६।२४

वायोर्गेङ्कारः [अ.शिरः. ३।१५+ — षट्को. २७

वायोर्ज्योतिः, ज्योतिष आपः — २सन्न्यासो. १६

वायोर्बिम्बं तु षट्कोणं सङ्कर्षोऽत्राधिदेवता — यो. शि. ५।१४

वायौ तृप्यत्याकाशस्तृप्यति — छांदो. ५।२३।२

वायौ मनोलयं कुर्यादाकाशगमनं भवेत् — यो. शि. ९।५१

वाराणसीमहाप्राज्ञभ्रुवोर्घ्राणस्यमध्यमे — जा. द.४।४८

वाराणस्यां मृतो वाऽपि इदं वा ब्रह्म यः पठेत् । एकेन जन्मना जन्तुर्मोक्षं च प्राप्नुयादिति — प्रा. हो. ४।४

वाराही पितृरूपा कुरुकुल्ला बलिदेवता माता — भावनो. २

वारिजलोचनसहाये वारिगतिं वाग्यासुकरनिकरैः । पीडितमत्र भ्रान्तं मामनिशं पालय त्वमनवद्ये — वनदु. १६९

वारिवत्स्फुरितं तस्मिंस्तत्राहङ्कृतिरुत्थिता । पञ्चात्मकमभूत्पिण्डं धातुबद्धं गुणात्मकम् — १ यो. त. १०

वारुणं त्वेव वर्जयेत् — छांदो. २।२२।१

वारुणे वायुमारोप्य वकारेण समन्वितम् । स्मरन्नारायणं देवं चतुर्बाहुं किरीटिनम् ।...धारयेत्पञ्चघटिकाः सर्वपापैःप्रमुच्यते — १ यो. त. ८८

(तत्र) वार्ताकवृत्तयः कृषिगोरक्षवाणिज्यमतोऽहितमुपयुञ्जानाः शतसंवत्सराभिर्यजन्त आत्मानं प्रार्थयन्ते — आश्रमो. २

वालाग्रमात्रं हृदयस्य मध्ये विश्वं देवं जातरूपं वरेण्यम् । तमात्मस्थं ये नु पश्यन्ति धीरास्तेषां शान्तिर्भवति नेतरेषाम् — अ.शिरः.३।११

वालाग्रमात्रं हृदये प्रतिष्ठं जीवाभासं मन्यमानैश्च मूढैः । न त्वेष जीवो न शिवश्चादिकर्ता यस्मात्परं नापरमस्ति किञ्चित् — २ देव्यु. ३४

वालाग्रशतभागस्य शतधाकल्पितस्य च । भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते [श्वेता.४।९+ — मन्त्र. २।३५

वालाग्रशतसहस्रकल्पनादिभिः स लभ्यते (परमात्मा) — १ आत्मो. ३

वालाग्रशतसाहस्रं तस्य भागस्य भागिनः । तस्य भागस्य भागार्धे तत्क्षये तु निरञ्जनम् — ध्या. बि. ४

वाल्मीको वल्मीकात्, व्यासः कैवर्तकन्यायां, शशपृष्ठाद्गौतमः, वसिष्ठ उर्वश्यां, अगस्त्यः कलशे जातः — व. सू. ५

वाव किल नो भवान् पुराऽनुशिष्टानवोचत् — बृह. ६।२।३

वासनाक्षयविज्ञानमनोनाशो महामते । समकालं चिराभ्यस्ता

भवन्ति फलदा मताः — अ. पू. ४।८३
[+मुक्तिको. २।१०

वासनाजाले निश्शेषममुना प्रविलापिते कर्मसञ्चये पुण्यपापे समूलोन्मूलिते प्राक्परोक्षमपि करतलामलकवद्वाक्यमप्रतिबद्धापरोक्षसाक्षात्कारं प्रसूयते — पैङ्गलो. ३।३

वासनातन्तुबद्धोऽयं लोको विपरिवर्तते — महो. ५।८६

वासनातानवं ब्रह्मन्मोक्ष इत्यभिधीयते — महो. २।४१

वासनात्रयपूर्वकं निन्दानिन्दागर्वमत्सरदम्भदर्पद्वेषकामक्रोधलोभमोहहर्षामर्षासूयात्मसंरक्षणादिकं दग्ध्वा...देहत्यागं करोति यः सोऽवधूतः — तुरीया. ३

वासनाद्वासुदेवस्य वासितं हि जगत्रयम् । सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते — ना. उ.ता. १।४

वासना द्विविधा प्रोक्ता शुद्धा च मलिना तथा । मलिना जन्महेतुः स्याच्छुद्धा जन्मविनाशिनी — मुक्तिको.२।६१

वासनानुदयो भोग्ये वैराग्यस्य तदावधिः । अहम्भावोदयाभावो बोधस्य परमावधिः — अध्यात्मो. ४१

वासनाप्रक्षयो मोक्षः सा जीवन्मुक्तिरिष्यते — अध्यात्मो. १२

वासनामात्रसन्त्यागाज्जरामरणवर्जितम् । सवासनं मनो ज्ञानं ज्ञेयं निर्वासनं मनः — अ. पू. ५।६२

वासनामुक्तो महालीलायामासक्तः संसारे न निर्विण्णो नातिसक्तो भवति — सामर. १००

वासनायास्तथा वह्नेर्ऋणव्याधिद्विषामपि । स्नेहवैरविषाणां च शेषः स्वल्पोऽपि बाधते — अ. पू. ५।१७

वासनारहितैरन्तरिन्द्रियैराहरन् क्रियाः । न विकारमवाप्नोषि खवत्क्षोभशतैरपि — अ. पू. ५।३९

वासनावशतः प्राणस्पन्दस्तेन च वासना । क्रियते चित्तबीजस्य तेन चित्ताङ्कुरक्रमः — मुक्तिको. २।२६

वासनाविलये चेतः शममायाति दीपवत् — मुक्तिको. २।१७

वासनावेगवैचित्र्यात् स्वरूपं न जहाति तत् । भ्रान्तं पश्यति दुर्दृष्टिः सर्वं मदवशादिव — मुक्तिको. २।६०

वासनासम्परित्यागसमं प्राणनिरोधनम् — अ. पू. ४।८५

वासनासम्परित्यागः प्राणस्पन्दनिरोधनम् । एतास्ता युक्तयः पुष्टाः सन्ति चित्तजये किल — मुक्तिको. २।४५

वासनासम्परित्यागाच्चित्तं गच्छत्यचित्तताम् [अ.पू.४।८६+ — मुक्तिको. २।२८

वासनासम्परित्यागे यदि यत्नं करोषि भोः । यावद्विलीनं न मनो न तावद्वासनाक्षयः — अ. पू. ४।७८

वासनाहीनमप्येतच्चक्षुरादीन्द्रियं स्वतः । प्रवर्तते बहिः स्वार्थे वासनामात्रकारणम् — मुक्तिको. २।२२

वासनां वासितारं च...समूलमखिलं त्यक्त्वा... — महो. ६।७

वासनां सम्परित्यज्य मोक्षार्थित्वमपि त्यज — मुक्तिको. २।६८

वासनां सम्परित्यज्य मयि चिन्मात्रविग्रहे । यस्तिष्ठति गतव्यग्रः सोऽहं सच्चित्सुखात्मकः — मुक्तिको. २।१८

वासनाः कल्पयन्सोऽपि यात्यहङ्कारतां पुनः — महो. ५।१२४

वासनाविलयेनापि स्वात्मज्योतिः प्रकाशते । सूर्योभाभिरिवादीप्तो योगी विश्वं प्रकाशते — अमन. २।४८

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि । तथा शरीराणि विहाय..संयाति नवानि देही [अवसं. २।३७+ — भ. गी. २।२२

वासुदेवमयोऽस्म्यहम् — विष्णुहृ. १।१

वासुदेवः सर्वमिति — भ. गी. ७।१९

वासुदेवादिचतुर्व्यूहसेवितं विष्णुलोकं तत्साम्नः पञ्चमं पादं जानीयात् — ग. पू. १।१२
वासुदेवे मनो युञ्जन्सर्वसिद्धिमवाप्नुयात् — यो. शि. ५।५४
वासुदेवोऽजरोऽमरः — ते. बिं. ६।६९
वास्तुवेदो धनुर्वेदो गान्धर्वश्च तथा मुने । आयुर्वेदश्च पञ्चैते उपवेदाः प्रकीर्तिताः — सीतो. २१
विकरोत्यपरान् भावानन्तश्चित्ते व्यवस्थितान् । नियतांश्च बहिश्चित्त एवं कल्पयते प्रभुः — वैतथ्य. १३
विकलेबरकैवल्यं त्रिपाद्राममहं भजे — शु.र.शीर्षकं
विकलेबरकैवल्यं श्रीरामब्रह्म मे गतिः — रा.पू.शीर्षकं
विकटाङ्गामुन्मत्तां महाखलां... पुनर्धेनुं...अशान्तामदुग्धदोहिनीं वत्सहीनां...नवप्रसूतां रोगार्तां गां विहाय प्रशस्तगोमयमाहरेत् — बृ. जा. ३।१
विकल्पसङ्ख्ययाज्जन्तोः पदं तदवशिष्यते — अ. पू. २।३३
विकल्पासहिष्णु, तत्सदाक्तिकं गजवक्त्रं गजाकारं जगदेवावरुन्धे — गणेशो. ३।३
विकल्पो विनिवर्तेत कल्पितो यदि केनचित् — आगम. १८
विकारजननीमज्ञामष्टरूपामजां ध्रुवाम् । ध्यायतेऽध्यासितातेन तन्यते प्रेर्यते पुनः । सूयते पुरुषार्थं च तेनैवाधिष्ठितं जगत् — मंत्रिको. ३,४
विकारादिविहीनत्वाज्जागरो मे न विद्यते — वराहो. २।६०
विकारांश्च गुणांश्चैव — भ.गी. १३।२०
विकाराः षोडशापरे — शारीरको. १२
विकिरं प्रकिरं दद्याद्विकिरं ह वै प्रकिरंभुक्षीतनृत्रिरूपाणिदर्शयन् — इतिहा. ५३
विक्षिप्तं च गतायातं सुश्लिष्टं च सुलीनकं (मनः) — अमन. २।९२
विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत्सृजेत् — सरस्व. ४२
विक्षेपो नास्ति यस्मान्मे न समाधिस्ततो मम । विक्षेपो वा समाधिर्वा मनसः स्याद्विकारिणः — १ अवधू. २१
विगतेच्छाभयक्रोधः — भ. गी. ५।२८
विग्रहमनुग्रहलिङ्गेषु शक्तिकपालेषु सर्वत्रशङ्करं विद्यात् — लिङ्गोप. २
विग्रहवानेष कालः सिन्धुराजः प्रजानाम् — मैत्रा. ६।१६
विघ्नराजो ब्रह्मण्यमृते तेजोमये परंज्योतिर्मये सदानंदमये रमते — गणेशो. ५।७
विघ्नराजश्चिदात्मकः सोऽहमोम् — गणेशो. १।४
विघ्नान्यायान्ति वै बलात् — ते. बिं. १।४०
विघ्नांस्तरति महोपसर्गं तरति — गणेशो. ९।८
विचक्षणः पंचमुखोऽसि प्रजापतिर्ब्राह्मणस्त एकं मुखं तेन मुखेन राज्ञोऽत्सि — कौ. ब्रा. २।९
विचक्षणादृतवो रेत आभृतं... — कौ. ब्रा. १।२
विचारणा द्वितीया तु तृतीया तनुमानसी (ज्ञानभूमिः) — महो. ५।२४
विचारणा द्वितीया स्यात्तृतीया साङ्गभावना (मोक्षभूमिका) — अ. पू. ५।८२
विचारणाशुभेच्छाभ्यामिन्द्रियार्थेषु रक्तता । यत्र सा तनुतामेति प्रोच्यते तनुमानसी [महो.५।२९ +वराहो. ४।५
विचारेण परिज्ञातस्वभावस्य सततस्तव । मनः स्वरूपमुत्सृज्य शममेष्यति विज्वरम् — अ. पू. १।४१
विचिकित्सीमे ऋज्वा — बा. मं. २३
विचित्रघोषसंयुक्तानाहते श्रूयते ध्वनिः — सौभाग्यल. ९
विचित्रं विधिचेष्टितम् — भवसं. १।१२
विचित्राः शक्तयः स्वच्छाः समा या निर्विकारया । चिताः क्रियन्ते समया कलाकलनमुक्तया — १सं.सो. २।२६
विचिन्वति हैवेमानि शरीराणी३ — १ ऐत. १।८।४
विचैति चान्ते विश्वमादौ स देवः स नो बुद्ध्या शुभया संयुनक्तु — श्वेता. ४।१
वि चौमि सं च हि नु यो विरूपी (पक्षी) — बा. मं. ९
विजरो विमृत्युर्विशोको विजिघित्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः [छांदो. ८।१।५ +८।७।१

विज्ञानमेव सत्यं वदति विज्ञानं त्वेव विजिज्ञासितव्यमिति छांदो. ७।१७।१
विजानन् विद्वान् भवते नातिवादी मुण्ड. ३।१।४
विजानन्वै तन्न विजानाति नहि विज्ञातुर्विपरिलोपो विद्यतेऽविनाशित्वात् बृह. ४।३।३०
विजानाम्यहं यत्प्राणो ब्रह्म, कं च तु खं च न विजानामि छांदो. ४।१०।५
विज्ञातीयविशेषवर्जितं... शाश्वतं परमं पदं...स्वयम्प्रकाशमनिशं ज्वलति त्रि.म.ना. ७।७
विजितात्मा जितेन्द्रियः भ. गी. ५।७
विजिहीर्षवे लोकान् कृधि बंधान्मुंचासिबद्धकम् सहवै. ९
विजेषकृदिन्द्र इवानवब्रवोऽस्माकं मन्यो अधिपो भवेह वनदु. १११
विजेष्यच्वे वावैतानन्विति शौनको. १।२
विज्वरत्वं गतं चेतस्तव संसारवृत्तिषु । न निमज्जति तद्ब्रह्मन् गोष्पदेष्विव वारणः अ. पू. १।४२
विज्ञातब्रह्मतत्त्वस्य यथा पूर्वं न संसृतिः । अस्ति चेन्न स-विज्ञातब्रह्मभावो बहिर्मुखः अध्यात्मो. ४८
विज्ञातमविजानताम् (ब्रह्म) केनो. २।३
विज्ञातं विजिज्ञास्यमविज्ञातमेत एव यत्किञ्च विज्ञातं वाचस्तद्रूपं, वाग्घि विज्ञाता, वागेनं तद्भूत्वाऽवति बृह. १।५।८
विज्ञानात्मा पुरुषः स परेऽक्षरे आत्मनि सम्प्रतिष्ठते प्रश्नो. ४।९
विज्ञातारमरे केन विजानीयात् [बृ. उ. २।४।१४+ ४।५।५
विज्ञाते स्पन्दमाने वै नाभासा अन्यतो भुवः अ. शां. ९१
विज्ञानघन एवास्मि शिवोऽस्मि किमतः परम् स्कन्दो. १
विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति बृ. उ. २।४।१२
विज्ञानघनस्वरूपमनन्तचिदादित्यसमष्टयाकारं शिवाद्वैतोपासका भजन्ते सि. सा. ६।१
विज्ञानमयं ब्रह्मकोशम् । चतुर्जालं ब्रह्मकोशम् । यन्मृत्युर्नावपश्यति भस्मजा. २।१६
विज्ञानमयः कालात्माऽऽनन्दमयो लयात्मैकत्वं नास्ति, द्वैतं कुतः सुबालो. ५।१९
विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः बृह. ४।४।५
विज्ञानमात्ररूपोऽहं सच्चिदानन्दलक्षणः ते. बिं. ३।३१
विज्ञानमात्रं विज्ञानविदां यदमलात्मकम् । पुरुषः साङ्ख्यदृष्टीनामीश्वरो योगवादिनाम् अ. पू. ३।२०
विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणं, तिष्ठमानस्य तद्विद इति बृ. उ. ३।९।३४
विज्ञानमानन्दं ब्रह्मरातेर्दातुः परायणम् । सर्वसङ्कल्पसन्न्यासश्चेतसा यत्परिग्रहः महो. २।९
विज्ञानमुपास्व छांदो. ७।७।१
विज्ञानमेवाप्येति, तदमृतमभयमशोकमनन्तनिर्वीजं.. सुबा. ९।३-१२
विज्ञानमेवाप्येति यो विज्ञानमेवास्तमेति [सुबालो.९।२, ७,१०,१३
विज्ञानवतो वै स लोकाञ्ज्ञानवतोऽभिसिद्ध्यति छांदो. ७।७।२
विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् [कठो. ३।९+ भवसं. २।१२
विज्ञानं चाविज्ञानं च तैत्ति. २।६
विज्ञानं त्वेव विजिज्ञासितव्यम् छांदो. ७।१७।१
विज्ञानंदेवाःसर्वेब्रह्मज्येष्ठमुपासते तैत्ति. २।५
विज्ञानं प्रयन्त्यभिसंविशन्ति तैत्ति. ३।५
विज्ञानं ब्रह्म चेद्वेद तस्माच्चेन्न प्रमाद्यति । शरीरे पाप्मनो हित्वा सर्वान्कामान्समश्नुत इति तैत्ति. २।५

विज्ञानं ब्रह्मेति व्यजानात्। विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते। विज्ञानेन जातानि जीवन्ति। विज्ञानं प्रयन्त्यभिसंविशन्तीति तैत्ति. ३।५
विज्ञानं भगवो विजिज्ञासे छांदो.७।१७।१
विज्ञानं यज्ञं तनुते। कर्माणि तनुतेऽपि च। विज्ञानं देवाः सर्वे ब्रह्म ज्येष्ठमुपासते तैत्ति. २।५
विज्ञानं वाव ध्यानाद्भूयः छांदो. ७।७।१
विज्ञानात्मा चिदाभासो विश्वो व्यावहारिको जाग्रत्स्थूलदेहाभिमानी कर्मभूरिति च विश्वस्य नाम भवति पैङ्गलो. २।६
विज्ञानात्मा यथा देहे जाग्रत्स्वप्नसुषुप्तितः। मायया मोहितः पश्चाद्बहुजन्मान्तरे पुनः योगकुं. ३।२७
विज्ञानात्मा सह देवैश्च सर्वैः प्राणा भूतानि सम्प्रतिष्ठन्ति यत्र। तदक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वमेवाविवेश प्रश्नो. ४।११
विज्ञानादानन्दो ब्रह्मयोनिः महाना.१७।१२
विज्ञानाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीतु छांदो. ७।७।२
विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते तैत्ति. ३।५
विज्ञानाविज्ञानेऽहम् १ देव्यु. १
विज्ञानेन वा ऋग्वेदं विजानाति यजुर्वेदꣳ सामवेदमाथर्वणम् छांदो. ७।७।१
विज्ञानेनात्मानं वेदयति महाना.१७।१३
विज्ञानेनेदꣳ सर्वं विदितम् बृह. २।४।५
विज्ञाने स्पन्दमाने वै नाभासा अन्यतो भुवः अ. शां. ५१
विज्ञानेऽपि तथैव स्युराभासस्याविशेषतः अ. शां. ५०
विज्ञानोऽस्मि विशेषोऽस्मि सोमोऽस्मि सकलोऽस्म्यहम् मैत्रे. ३।३
विज्ञायते हास्ति हिरण्यस्योपात्तं गोअश्वानां दासीनां प्रवराणां.. बृह. ६।२।७
विज्ञायते हास्ति...प्रवराणां परिधानस्य...[मा. पा.] बृह. ६।२।७
विज्ञाय सेवितश्चोरो मैत्रीमेति न चोरताम् महो. ५।७१
विज्ञेयः स शिवः शान्तो नरस्तद्भावभावितः। आस्ते सदा निरुद्विग्नः स देहान्ते विमुच्यते शिवो. १।२३
विज्ञेयोऽक्षरतन्मात्रो जीवितं वापि चञ्चलम्। विहाय शास्त्रजालानि यत्सत्यं तदुपास्यताम् पैङ्गलो. ४।१७
विण्मूत्रपित्तकफमज्जामेदोवसाभिरन्यैश्च मलैर्बहुभिः परिपूर्णं कोश इवावसन्नेति मैत्रा. ३।४
विण्मूत्रवातपित्तकफमज्जामेदोवसाभिरन्यैश्चमलैर्बहुभिः परिपूर्णमेतादृशे शरीरे वर्तमानस्य भगवंस्त्वं नो गतिः मैत्रे. १।३
विण्मूत्रादिविसर्जनमपानवायुकर्म शांडि. १।४।९
वितता ब्रह्मणो मुखे भ. गी. ४।३२
विततां भुवमासाद्य विहरामि यथासुखम् १ सं.सो.२।५५
वितत्य बाणं तरुणार्कवर्णं व्योमान्तरे भासि हिरण्यगर्भः एका. उ. ४
वितथैः सदृशाः सन्तोऽवितथा इव लक्षिताः अ. शां. ३१
वितन्वमाना शमायान्तु ब्रह्मचारिणः स्वाहा तै. उ. १।४।४
वितस्तिप्रमितं दैर्घ्यं चतुरङ्गुलविस्तृतम्। मृदुलं धवलं प्रोक्तं वेष्टनाम्बरलक्षणम् यो. शि. १।८१
विशीर्णवस्त्रं वल्कलं वा प्रतिगृह्णीयान्नान्यत्प्रतिगृह्णीयात् १ सं. सो.१।२
वित्तं बन्धुः प्रजातन्तुः कर्मरूपं बृहत्सखा। प्रज्ञाप्रतिष्ठा तन्तूनामिष्टापूर्तैः परायणम् इतिहा. ६
वित्तिश्चोपस्तपश्च दमश्चाश्रद्धा च सप्तश्च (?) चानाकाशी कर्ण च योगश्चाचार्यगुरुशुश्रूषा चेति संहितो. ३।९
(अथ) वित्तं मे स्यादथ कर्म कुर्वीय बृह. १।४।१७

विश्वेशो यक्षरक्षसाम्	भ. गी. १०।२३
विद्वानाविद्युत्	बृह. ५।७।१
विदाम देवं भुवनेशमीड्यम्	श्वेता. ६।७
विदिताविदितात्परः	नृसिंहो. ९।८
विदिते तु परे तत्त्वे मनो नौ-स्तम्भकाकवत्	अमन. २।७३
विदित्वा स्वात्मनो रूपं सम्प्रज्ञात-समाधितः। शुकमार्गेण विरजाः प्रयान्ति परमं पदम्	वराहो. ४।३८
विदित्वा स्वात्मनो रूपं न बिभेति कुतश्चन(कदाचन)[वराहो.२।२०+	महो. ४।७०
विदिशश्च नारायणः [नारा. २+	त्रि.म.ना. २।८
विदुर्देवा न दानवाः	भ.गी. १०।१४
विदेहमुक्त एवासौ विद्यते निष्कलात्मकः	अ. पू. ४।१९
विदेहमुक्तताऽत्रोक्ता सप्तमी योग-भूमिका। अगम्या वचसां शान्ता सा सीमा सर्वभूमिषु	अक्ष्युप. ४४
विदेहमुक्तो नोदेति नास्तमेति न शाम्यति	महो. २।६४
विदेहमुक्तौ विमले पदे परमपावने। ...चित्तनाशे विरूपाख्ये न किञ्चिदिह विद्यते	अ. पू. ४।२०
विद्धि त्वमेतन्निहितं गुहायाम्	कठो. १।१४
विद्धि नष्टानचेतसः	भ. गी. ३।३२
विद्धि पार्थ बृहस्पतिम्	भ.गी. १०।२४
विद्धि पार्थ सनातनम्	भ. गी. ७।१०
विद्धि प्रकृतिसम्भवान्	भ.गी. १३।२०
विद्धि मामसृतोद्भवम्	भ.गी. १०।२७
विद्ध्यकर्तारमव्ययम्	भ. गी. ४।१३
विद्ध्यनादी उभावपि	भ.गी. १३।२०
विद्ध्येनमिह वैरिणम्	भ. गी. ३।३७
विद्ययाऽमृतमश्नुते	ईशा. ११
विद्यया वा विद्यां यः प्राह तानि तीर्थानि षण्ममेति	संहितो. ३।५
विद्यया विन्दतेऽमृतम्	केनो. २।४
विद्यया साधयेत	संहितो. ३।४
विद्यातपोभ्यां जीवात्मा बुद्धि-र्ज्ञानेन शुद्ध्यति	भवसं. ३।१८
विद्यादानं च कुर्वीत भोगमोक्ष-जिगीषया	शिवो. १।३५
विद्या दिवा प्रकाशत्वादविद्या रात्रिरुच्यते	१सं.सो. २।८३
विद्याधरस्तृतीयायां गान्धर्वस्तु चतुर्थिका	ना. बि. १३
विद्याधीशः स्वर एको महेशस्त्वमेव स्वं वेद योऽसीश एव	२ रुद्रो. ६८
(शिष्य इति च)विद्याध्वस्तप्रपञ्चा-वगाहितज्ञानावशिष्टं ब्रह्मैव शिष्यः	निरा. २५
विद्यानन्दतुरीयाख्यपादत्रयममृतं भवति	त्रि.म.ना.४।४
(अथ च) विद्यानन्दतुरीयाणा-ममेद एव श्रूयते	त्रि.म.ना. २।१
विद्यानन्दतुरीयांशाः (ब्रह्मणः) सर्वेषु पादेषु व्याप्य तिष्ठन्ति	त्रि.म.ना. १।४
विद्यापादो द्वितीयः (ब्रह्मणः)	त्रि.म.ना. १।४
विद्याप्रपञ्चस्य नित्यत्वं सिद्धमेव, नित्यानन्दचिद्विलासात्मकत्वात्	त्रि.म.ना. ३।२
विद्या भवच्छेदकरी मदीयसायुज्य-सम्पादनहेतुभूता	१ बिल्वो. १५
विद्याभीप्सितं नचिकेतसं मन्ये न त्वा कामा बहवो लोलुपन्ते(न्तः) [कठो. २।४+	मैत्रा. ७।९
विद्याऽभूद्रोमयं शुभम्	बृ. जा. ३।२
विद्याभ्यासे प्रमादो यः स दिवा स्वाप उच्यते	१सं.सो. २।८४
विद्यामन्त्रैकमन्त्रो विद्यारूपो विद्यामयो विश्वेश्वरोऽहमजरोऽहम्	भस्मजा. २।७
विद्यामिमां प्राप्य गौरी महेशा-दभीष्टसिद्धिं समवाप सद्यः	हेरम्बो. १४
विद्याया मनसि संयोगः, मनसा-ऽऽकाशश्चाकाशाद्वायुः, वायो-र्ज्योतिः, ज्योतिष आपः, अद्भ्यः पृथिवी, पृथिव्या इत्येषां भूतानां ब्रह्म सम्पद्यते	२सन्न्यासो. १६
विद्यालिङ्गं ज्ञानस्वरूपम्	लिङ्गोप. २

विद्याविद्याभ्यां भिन्नो विद्यामयो हि यः स कथं विषयी भवति	गोपालो. १।१२
विद्याविद्ये ईशते यस्तु सोऽन्यः	श्वेता. ५।१
विद्याविनयसम्पन्ने	भ. गी. ५।१८
विद्याशक्तिः समस्तानां शक्तिरित्यभिधीयते । गुणत्रयाश्रया विद्या सा विद्या च तदाश्रया	बृ. जा. ३।१
विद्या सङ्कीर्तनीया हि येषां कर्म न विद्यते । ते चातुर्थ्यं विमुच्यन्ते यावत्कर्म न विद्यते	शिवो. १।३४
विद्या सन्धिः । प्रवचनꣳ सन्धानम्	तैत्ति. १।३।५
विद्या सम्प्राप्यते ब्रह्मन् सर्वदोषापहारिणी	महो. ५।११०
विद्यासहायवन्तं च आदित्यस्थं समाहितम् । कपिलं प्राहुराचार्याः..	...
विद्याऽहमविद्याऽहम्	१ देव्यु. १
विद्या ह वै ब्राह्मणमाजगाम, तवाहमस्मि, त्वं मा पालयानर्हते मानिने नैव माऽदाः । गोपाय मा श्रेयसे तेऽहमस्मीति	संहितो. ३।४
विद्या ह वै ब्राह्मणमाजगाम गोपाय मां शेवधिष्टेऽहमस्मि । असूयकायानृजवे शठाय मा मा ब्रूया वीर्यवती तथा स्याम् [शाट्या.२३	मुक्तिको. १।५१
विद्याऽहम् । वेदाश्चाहम्	अद्वै. भा. १
विद्या हि काण्डान्तरादित्यो ज्योतिर्मण्डलं ग्राह्यं नापरं	महावा. २
विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह । अविद्यया मृत्युं तीर्त्वा (मृत्युमेति) विद्ययाऽमृतमश्नुते [ईशा. ११+ मैत्रा. ७।९+	मन्त्रसं. ३।१
विद्युति तृप्यन्त्यां यत्किञ्च यद्युश्च पर्जन्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति	छांदो.५।२२।२
विद्युतोऽभिव्यद्युतदा ३ इति (मा.पा.)	केनो. ४।४
विद्युतो व्यद्युतदा ३ इति	केनो. ४।४
विद्युदिवाभार्चिषः परमे व्योमन्	मैत्रा. ६।३५
विद्युद्दृष्टिरहोरात्रं निमेषोन्मेषसंज्ञकम्	गुह्यका. १८
विद्युद्वसितं (गायत्र्याः)	सन्ध्यो. २३
विद्युद्ब्रह्मेत्याहुर्विदानाद्विद्युद्विद्यत्येनं पाप्मनो य एवं वेद विद्युद्ब्रह्मेति विद्युद्ध्येव ब्रह्म	बृह. ५।७।१
विद्योतते स्तनयति स प्रतिहारः	छांदो.२।३।१
विद्रुमद्रुमसङ्काशं योनिस्थाने स्थितं रजः	ध्या. बिं. ८७
विद्वत्सन्न्यासी चेद्गुरोः सकाशात् प्रणवमहावाक्योपदेशं प्राप्य... पर्वतवनदेवतालयेषु सञ्चरेत्	ना. प. ४।४८
विद्वत्सन्न्यासी ज्ञानसन्न्यासी विविदिषासन्न्यासी कर्मसन्न्यासी	ना. प. ५।३
विद्वानप्यासुरश्चेत्स्यान्निष्फलं तत्त्वदर्शनम्	वराहो. ३।२३
विद्वानेतेनैवायतनेनैकतरमन्वेति	प्रश्नो. ५।२
विद्वान् त्रिवृत्सूत्रं त्यजेत्	आरुणि. ३
(तथा) विद्वान्नामरूपाद्विमुक्तः	मुण्ड. ३।२।८
विद्वान्नित्यं सुखे तिष्ठेद्धिया चिद्रसपूर्णया	ते. बिं. १।५१
(तदा) विद्वान् ब्रह्मज्ञानाग्निना कर्मबन्धं निर्दहेत्	पैङ्गलो. ४।११
विद्वान् ब्रह्मामृतोऽमृतम्	बृ. ह. ४।४।१७
विद्वान्मनो धारयेताप्रमत्तः	श्वेताश्व. २।९
विद्वान्युक्तः समाचरन्	भ. गी. ३।२६
विद्वान्सर्वमैहिकामुष्मिकसुखश्रमं ज्ञात्वा..ब्रह्मचर्यसमाप्य गृहीभवेत्	प. हं. प. १
विद्वांसस्तेनलयेनपश्यन्ति	सुबालो. ८।१
विद्वान्स्वदेशमुत्सृज्य सन्न्यासानन्तरं स्वतः । कारागारविनिर्मुक्तचोरवद्दूरतो वसेत्	मैत्रे. २।११
विद्वाꣳसो मनसा प्रजायमाना रेतसैवमजीविष्मेति [बृह.६।१।८	+६।१।९-१२
विधिदृष्टो य इज्यते	भ.गी. १७।११
विधिवदादावनुपनीतोपनयनानन्तरं तत्सत्कुलप्रसूतः...साधनचतुष्टयसम्पन्नः सन्न्यस्तुमर्हति	ना. प. २।१
विधिवत्प्राणसंयामैर्नाडीचक्रे विशोधिते । सुषुम्नावदनं भित्त्वा सुखाद्विशति मारुतः	शांडि. १।७।९
विधिहीनमसृष्टान्नम्	भ.गी. १७।१३

विधूमे च प्रशान्ताग्नौ यस्तु माधुकरीं चरेत् । गृहे च विप्रमुख्यानां यतिः सर्वोत्तमः स्मृतः	ना. प. ६।१२
विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने । कालेऽपराह्णे भूयिष्ठे भिक्षाचरणमाचरेत्	१सं.सो. २।७३
विधृतिरेषां लोकानामसम्भवाय	छांदो. ८।४।१
विधेम ते नाम। विधेस्त्वमस्माकं नाम	चित्त्यु. १।२
विध्युक्तकर्मसङ्क्षेपात् सन्यासस्त्वातुरः स्मृतः	ना. प. ३।९
विध्युक्तकर्मसंयुक्तः कामसङ्कल्पवर्जितः । यमाद्यष्टाङ्गसंयुक्तः...	जा. द. ५।२
विनर्दिसाम्नो वृणे पशव्यमित्यग्नेरुद्गीथोऽनिरुक्तः प्रजापतेर्निरुक्तः	छांदो. २।२२।१
विनष्टदिग्भ्रमस्यापि यथापूर्वं विभाति दिक् । तथा विज्ञानविध्वस्तं जगन्नास्तीति भावय (जगन्मे भाति तन्नहि) [महो. ४।२०+	वराहो. ३।१७
विनश्यत्स्वविनश्यन्तं	भ.गी. १३।२८
विना कार्यं सदा गुप्तं योगसिद्धस्य लक्षणम्	यो.शि. १।१५६
विना तर्कप्रमाणाभ्यां ब्रह्म यो वेद वेद सः	पा. ब्र. २१
विना देहेन योगेन न मोक्षं लभते विधे । अपक्वाः परिपक्वाश्च देहिनो द्विविधाः स्मृताः	यो. शि. १।२५
विना प्रमाणसुष्ठुत्वं यस्मिन्सति पदार्थधीः । अयमात्मा नित्यसिद्धः प्रमाणे सति भासते	२ आत्मो. ६
विनायकस्य यद्ध्यानं पूजनं भवमोचनं	गणेशो. १।५
विनायकोऽहमित्येतत्तत्त्वतः प्रवदन्ति ये। न ते संसारिणो नूनं...	गणेशो. १।५
विनाशमव्ययस्यास्य	भ. गी. २।१७
विनाशस्तस्य विद्यते	भ. गी. ६।४०
विना शक्तिं न मोक्षो न ज्ञानं न सत्यं न धर्मो न तपो न हरिर्न हरो न विरिञ्चिः	श्रीचक्रो. २
विनाशं कालतो याति ततोऽन्यत्सकलं मृषा (ब्रह्मात्मनः)	शरभो. २४
विनाशाय च दुष्कृताम्	भ. गी. ४।८
विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते	ईशा. १४
विना श्रीतुलसीं विप्रा येऽपि श्राद्धं प्रकुर्वते । वृथा भवति तच्छ्राद्धं पितॄणां नोपगच्छति	तुलस्यु. १४
विनियम्य समन्ततः	भ. गी. ६।२४
विनोदतः कामिनीमध्ये कामिनीं दृष्ट्वा च सदानन्दरूपो भवेत्	कामराज. २
विन्दते प्राजापत्यं रायस्पोषं गौपत्यम् [भस्मजा. १।७+	नारा. ३
विन्दन्त्यात्मनि यत्सुखम्	भ. गी. ५।२१
विन्ध्यस्योत्तरे तीरे मारीचो नाम राक्षसः । तत्र मूत्रपुरीषाभ्यां हुताशनं शमय..	वनदु. १६०
विन्ध्याटव्यां पायसान्नमस्ति चेज्जगदुद्भवः	ते. बिं. ६।७८
विपरीतं ब्रह्मचर्यमनुष्ठेयं मुमुक्षुभिः	कठरु. १०
विपरीतानि केशव	भ. गी. १।३०
विपर्यस्ते वा कन्यके जिह्मेन वा दूश्येयातां तदप्येवमेव विद्यात्	३ऐत. २।४।५
विपर्यस्तो निदिध्यासे किं ध्यानमविपर्यये । देहात्मत्वविपर्यासं न कदाचिद्भजाम्यहम्	अवधू. १७
विपर्यासाद्यथा जाग्रदचिन्त्यात् भूतवत्स्पृशेत् । तथा स्वप्ने विपर्यासाद्धर्मांस्तत्रैव पश्यति	अ. शां. ४१
विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते	आगम. १५
विपापो विरजो विचिकित्सो ब्राह्मणो भवति	बृह. ४।४।२३
विप्रयोगं प्रियैश्चैव संयोगं च तथाप्रियैः । जरया चाभिभवनं व्याधिभिश्चोपपीडनम् ॥... प्राप्यन्ते नारके राजन्	भवसं. १।४-६
विप्राणां त्रिनयो ह्येष शमः प्राकृत उच्यते । दमः प्रकृतिदान्तत्वादेवं विद्वाञ्छमं व्रजेत्	अ. शां. ८६
विभक्तमिव च स्थितम्	भ.गी. १३।१७

विभागकलनां त्यक्त्वा सन्मात्रै- कपरो भव	अ. पू. ४।६६
विभुरहमनवद्योऽहं निरवधिनिः- सीमतत्त्वमात्रोऽहम्	आ. प्र. ८
विभुर्नित्यो निष्कलङ्को निर्विकल्पो निरञ्जनो निराख्यातः शुद्धो देव एको नारायणो न द्वितीयः	त्रि. म. ना. १।५
विभुर्विभूनां विभवोद्भवाय	पारमा. १।२
विभुं चिदानन्दमरूपमद्भुतम्	कैव. ७
विभुं प्रमितं विचक्षणासन्दी	कौ. त. १।३
विभुं सर्वगतं नित्यं विश्वयोनिम- कारणम् । व्याप्यव्याप्यं यतः सर्वं तं वै पश्यन्ति सूरयः	भवसं. ३।४
विभुः साक्षी न संशयः	सर्वसारो. १०
विभूतिर्भसितं भस्म क्षारं रक्षेति भवन्ति पञ्चनामानि	बृ. जा. १।६
विभूतिं च जनार्दन	भ.गी. १०।१८
विभूतीनां परंतप	भ.गी. १०।४०
विभूतेर्विस्तरो मया	भ.गी. १०।४०
विभूतिं प्रसवं त्वन्ये मन्यन्ते सृष्टि- चिन्तकाः । स्वप्नमायासरूपेति सृष्टिरन्यैर्विकल्पिता	आगम. ७
विभेदजनके ज्ञाने नष्टे ज्ञानबला- न्मुने । आत्मनो ब्रह्मणो भेदम- सन्तं किं करिष्यति	जा. द. ४।६३
विभ्राजदेवयतयो विशन्ति	महाना. ८।१४
सर्वं मृत्युनाऽभिपन्नम् — बृह. ३।१।३

सर्वं वा अस्तीति तददितेरदितित्वम् — बृह. १।२।५

सर्वं वा एतदिन्द्रो यज्जगत्यथैवेति — शौनको. २।४

सर्वं वा एष सर्वमश्नोतीति — शौनको. १।५

सर्वं विश्वमिदं नारायणः, य एवं वेद — ना.उ.ता. २।५

सर्वं वै तेऽन्नमाप्नुवन्ति, येऽन्नं ब्रह्मोपासते — तैत्ति. २।२।२

सर्वं शाक्तमजीजनत् — बह्वृचो. १

सर्वं शान्तं निरालम्बं व्योमस्थं शाश्वतं शिवम् — महो. ५।४५

सर्वं सच्चिन्मयं ततम् [महो.६।११+ — ते. बिं. ६।१,९

सर्वं सच्चिन्मयं विद्धि सर्वं सच्चिन्मयं ततम् — ते. बिं. ६।१

सर्वं सत्यं परं ब्रह्म न चान्यदिति या मतिः । तच्च सत्यं वरं प्रोक्तं वेदान्तज्ञानपारगैः — जा. द. १।१०

सर्वं सन्त्यज्य दूरेण यच्छिष्टं तन्मयो भव — अ. पू. १।४६

सर्वं सन्मात्ररूपत्वात्सच्चिदानन्दमात्रकम् — ते. बिं. ६।३०

सर्वं समतया बुद्ध्या यः कृत्वा वासनाक्षयम् । जहाति निर्ममो देहं नेयोऽसौ वासनाक्षयः — महो. ६।४४

सर्वं सर्वमयं सर्वे जीवाः सर्वमयाः — नृसिंहो. ९।४

सर्वं समाप्नोषि ततोऽसि सर्वः — भ. गी. ११।४०

सर्वंसहाः समलोष्टाश्मकाञ्चना यथोपपन्नचातुर्वर्ण्यभैक्षाचर्यं चरन्त आत्मानं मोक्षयन्त इति — आश्रमो. ४

सर्वं सुखं विद्धि सुदुःखनाशात् सर्वं च सद्रूपमसत्यनाशात् । चिद्रूपमेव प्रतिभानयुक्तं तस्मादखण्डं मम रूपमेतत् — वराहो. ३।४

सर्वं सौभाग्यदं नृणां सर्वकर्मफलप्रदम् — पं. ब्र. ९

सर्वꣳह पश्यः पश्यति सर्वमाप्नोति — छांदो. ७।२६।२

सर्वꣳह वा एतदिदं भस्म — भस्मजा. १।४

सर्वं हि पश्यन्पश्यति सर्वमाप्नोति सर्वशः — मैत्रा. ७।११

सर्वं हीदं नामानीꣳ सर्वं वाचाऽभिवदति — १ ऐत. १।६।१

सर्वं हीदं प्राणेनावृतं सोऽयमाकाशः प्राणेन बृहत्या विष्टब्धः — १ ऐत. १।६।१

सर्वꣳ हैवास्मिँल्लोक आयुरेति नैनं पुराकालात्प्राणो जहाति — बृह. २।१।१०

सर्वꣳ हैवास्मिँल्लोक आयुरेति नैनं पुराकालान्मृत्युरागच्छति — बृह. २।१।१२

सर्वं ह्ययमात्मा हि सर्वान्तरः — नृसिंहो. ७।२

सर्वं ह्येतद्ब्रह्म [मांडू. २+ [नृ. पू.४।२+नृसिंहो. १।२+ — रामो. २।१+ गणेशो. १।१

सर्वं ह्येतद्ब्रह्म आत्मा — राधोप. २।२

सर्वः (शर्वः) सर्वस्य जगतो विधाता धर्ताहर्ताविश्वरूपत्वमेति — त्रि. म. १५

सर्वाक्षरमयःकालःसदसद्व्यक्तिवर्जितः — तुरीयो. ३

सर्वाक्षरमयः कालः सर्वागममयः शिवः । सर्वश्रुत्युत्तमो मृग्यः सकलोपनिषन्मयः — ना. प. ८।५

सर्वाजीवे सर्वसंस्थे बृहन्ते (वहते अस्मिन्) तस्मिन्हंसो भ्राम्यते ब्रह्मचक्रे [श्वेता.१।६+ना.प.९।५+ — भवसं. २।४

सर्वाज्ञानमसन्मयम् — ते. बिं. ३।५८

सर्वाञ्छब्दान्विजानाति, स सम्प्रसाद इत्याचक्षते — सुबालो. ४।३

सर्वाणि च भूतानि प्रजायते(मा.पा.) — बृह. ४।१।२

सर्वाणि च भूतानि वाचैव सम्राट् प्रज्ञायन्ते; वाग्वै सम्राट् परमं ब्रह्म — बृह. ४।१।२

सर्वाणि च भूतानि...यदैनज्जरामवाप्नोति (मा. पा.) — छां. उ. ८।१।४

सर्वाणि च भूतानि च सर्वे च कामास्तस्मात्तस्योदयं प्रति प्रत्यायनं प्रति घोषा उल्लवः — छांदो. ३।१९।३

सर्वाणि च भूतानि सर्वे च कामा यदैनज्जरामाप्नोति — छांदो. ८।१।४

सर्वाणि चेन्द्रियाणि सहभूतैर्न कारणं कारणानां ध्याता कारणं — अ. शिखो. ३

सर्वाणि छन्दांसि, आपः स्थानं — २ प्रणवो. २१

सर्वाणि छन्दांसि नारायणादेव समुत्पद्यन्ते नारा. १
सर्वाणि जगन्ति नारायणमयानि प्रतिभान्ति त्रि. म. ना. ५।५
सर्वाणि तत्र भूतानि वसन्ति परमात्मनि भवसं. २।५३
सर्वाणि धर्मशास्त्राणि विस्तारयिष्णुः सङ्कर्षणो. २
सर्वाणि बृंहयतीति ब्रह्म ब्र. शिखो. २
(एवं) सर्वाणि भूतानि मणौ सूत्र इवात्मनि। स्थिरबुद्धिरसम्मूढो ब्रह्मविद्ब्रह्मणि स्थितः ध्या. बिं. ६
सर्वाणि भूतानि रमन्ते सर्वाणि ह वा अस्मिन्भूतानि विशन्ति बृह. ५।१२।१
सर्वाणि भूतानीत्येव पञ्चमं मुखं तेन मुखेन सर्वाणि भूतान्यत्सि कौ. त. २।९
सर्वाणि भूतान्यभ्यात्तं यदनेकमेकं नानावर्णं नानारूपं नानाशब्दं नानागन्धं नानारसं नानास्पर्शमिति शौनको. १।५
सर्वाणिभूतान्यस्यैवैतानि सर्वाणि निश्वसितानि बृह. ४।५।११
(एवं) सर्वाणि भूतान्यापिपीलिकाभ्यो बृहत्या विष्टब्धानीत्येव विद्यात् १ ऐत. ३।६।३
सर्वाणि भौतिकानि कारणे भूतपञ्चके संयोज्य भूमिं जले.. क्रमेण विलीयते पैङ्गलो. ३।३
सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वाऽभिवदन् यदास्ते महावा. ३
[+चित्तु. १२।७+ पारमा. ७।२
सर्वाणि ह वा इमानि भूतानि प्रणव एव प्रतितिष्ठन्ति शौनको. ४।५
सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति छांदो. १।११।५
सर्वाणि हास्मै भूतानि श्रैष्ठ्याय सन्नमन्ते तच्छ्रीत्युपासीत कौ. त. २।६
सर्वाणि ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीवन्ति छांदो. १।११।९
सर्वाणि ह वा इमानि भूतान्यहरहः प्रपतन्त्यगममभिजिघृक्षमाणानि मैत्रा. ६।१२
सर्वाणि ह वा इमानि भूतान्याकाशादेव जायन्ते नृ. पू. ३।५
[त्रि. ता. ५।२२+ ग. पू. २।९
सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते छांदो. १।९।१
सर्वाणि ह वा इमानि भूतान्यादित्यमुद्यन्तं गायन्ति छांदो. १।११।७
सर्वाणि ह वा इमानि भूतान्येतदक्षरमन्वायत्तानि शौनको. १।५
सर्वाणि हास्मै भूतानि श्रैष्ठ्याय सन्नमन्ते तच्छ्रीत्युपासीत तत्सामेत्युपासीत कौ. त. २।६
सर्वाणि हास्मै भूतानि श्रैष्ठ्यायाभ्यर्च्यन्ते तद्यजुरित्युपासीत कौ. त. २।६
सर्वाणीत्युपधारय भ. गी. ७।६
सर्वाणीन्द्रियकर्माणि भ. गी. ४।२७
सर्वाण्डेष्वनन्तलोकाश्चानन्तवैकुण्ठाः सन्तीति सर्वेषां खल्वभिमतम् त्रि. म. ना. ८।२
सर्वाण्येनं भूतान्यभिरक्षन्ति बृह. ४।१।२,३
सर्वाण्येनं वामान्यभिसंयन्ति छांदो. ४।१५।२
सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति २ ऐत. ६।२
सर्वातीतपदालम्बी परिपूर्णैकचिन्मयः। नोद्वेगी न च तुष्टात्मा संसारे नावसीदति महो. ६।६३
सर्वातीतोऽस्म्यहं सदा ते. बिं. ३।१२
सर्वात्मकत्वमात्माधारो भवति आ. पू. १
सर्वात्मकत्वं हृदयविलयो गन्धः आ. पू. १
(तस्मात्) सर्वात्मकेनाकारेण सर्वात्मकमात्मानमन्विच्छेत् नृसिंहो. ७।२
सर्वात्मकोऽहं सर्वोऽहं कुण्डिको. २६
सर्वात्मवेदनं शुद्धं यदोदेति तदात्मकम्। भातिप्रसृतदिक्कालबाह्यं चिद्रूपदेहकम् महो. ४।४२
सर्वात्मा समरूपात्मा शुद्धात्मा त्वहमुत्थितः। एकवर्जित एकात्मा सर्वात्मा स्वात्ममात्रकः ते. बिं. ४।३४

सर्वा दिशश्चोर्ध्वमधश्च तिर्यक् प्रकाशयन्ती भ्राजते गुह्यकाली	गुह्यका. ६४
सर्वा दिशो बलिमस्मै हरन्ति	छांदो. २।२१।४
सर्वाद्या सर्वविद्या च वृंदावनविहारिणी	राधिको. ७
सर्वाधारमनाधारमनिरीक्ष्यं	भस्मजा. २।९
सर्वाधिव्याधिभेषजम्	पं. ब्र. १२
सर्वाधिष्ठानरूपोऽस्मि सर्वदा चिद्घनोऽस्म्यहम्	ते. बिं. ३।१३
सर्वाधिष्ठानमद्वन्द्वं परं ब्रह्म सनातनम् । सच्चिदानन्दरूपं तदवाङ्मनसगोचरम् [कठरु.२६+	अ. पू. ४।२९
सर्वाधिष्ठानमद्वयपरब्रह्मविहारमण्डलं...चिद्रूपादित्यमण्डलं द्वात्रिंशद्व्यूहभेदैरधिष्ठितम्	त्रि.म.ना. ७।८
सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः । सर्वव्यापी स भगवांस्तस्मात्सर्वगतः शिवः	श्वेताश्व. ३।११
सर्वानपि वैष्णवान्धर्मान्विजृम्भयन् सर्वानपि पाखण्डाभिचलान	सङ्कर्षणो. २
सर्वानिन्द्रियकृतान्पापान्नाशयतीति तेन नाशी (वरणा) भवति [जाबालो. २+	रामो. ३।१
सर्वानुग्रहार्थाय तेषां (रुद्राक्षाणां) नामोच्चारमात्रेण दशगोप्रदानफलं दर्शनस्पर्शनाभ्यां द्विगुणं फलम्	रु. जा. १
सर्वानुग्राहकत्वेन तदस्म्यहं वासुदेवः	ब्र. बिं. २३
सर्वानन्दमयः परः	ते. बिं. ५।२
सर्वान्कामान् समश्नुते	तैत्ति. २।५
[विद्वानिति च—] सर्वान्तरस्थस्वसंविद्रूपविद्विद्वान्	निरा. २५
सर्वान् पार्थ मनोगतान्	भ. गी. २।५५
सर्वान्तर्यामिरूपोऽहं सर्वसाक्षित्वलक्षणः	ते. बिं. ६।६६
सर्वान्तरः स्वयं ज्योतिः सर्वाधिपतिरस्म्यहम्	ब्र. बिं. १०६
सर्वान्पाप्मन औषत्तस्मात्पुरुष ओषति	बृह. १।४।१
सर्वान्प्राणानसद्विद्धि सर्वान्भोगानसत्त्विति	ते. बिं. ३।५४
सर्वान् बन्धूनवस्थितान्	भ. गी. १।२५
सर्वापदां पदं पापा भावा विभवभूमयः	महो. ३।४
सर्वारम्भपरित्यागी [भ.गी.१२।१६+	१४।२५
सर्वारम्भा हि दोषेण	भ. गी. १८।४८
सर्वार्थवासनोन्मुक्ता तृष्णा मुक्तेति भण्यते	महो. ६।५०
सर्वार्थान् विपरीतांश्च	भ. गी. १८।३२
सर्वाश्चर्यमयं देवं	भ. गी. ११।१२
सर्वांस्तथा भूतविशेषसंघान्	भ. गी. ११।१५
सर्वाः प्रजा ब्राह्मणत्वं नरेन्द्र न ब्राह्मणत्वात्परमस्ति किञ्चित्	इतिहा. १४
सर्वाः प्रजा यत्रैकं भवन्ति	चित्यु. ११।२
सर्वाभिलापविगतः सर्वचिन्तासमुत्थितः । सुप्रशान्तः सकृज्ज्योतिः समाधिरचलोऽभयः	अद्वैत. ३७
सर्वा भूतानि तिष्ठन्ति सर्वमायुरेति वसीयान्भवति	आर्षे. ६।२
सर्वावस्थाविनिर्मुक्तः सर्वचिन्ताविवर्जितः	ना. बिं. ५१
सर्वावस्थासु साक्षी त्वेक एवावतिष्ठते	ना. प. ६।७
सर्वा वृद्धा वायोः, सर्ववृद्धेन्द्रस्योत्सेधपरोक्षवृद्धाऽग्नेः	संहितो. १।८
सर्वाशासङ्क्षये चेतःक्षयो मोक्ष इतीष्यते	अ. पू. २।२३
सर्वाश्च मधुमतीः सर्वाश्च व्याहृतीः (मा. पा.)	बृह. ६।३।६
सर्वाश्रयं हि चिन्मात्रं देहं चिन्मात्रमेव हि	ते. बिं. २।३५
सर्वाश्रयोऽहमेव	त्रि.म.ना. ८।६
सर्वासर्वविहीनोऽस्मि सात्त्विकोऽस्मि सदाऽस्म्यहम्	मैत्रे. ३।६
(स यथा) सर्वासामपां समुद्र एकायनं, एवं सर्वेषां रसानां जिह्वैकायनम्	बृह. ४।५।१२

सर्वासामेव नाडीनामेष बन्धः प्रकीर्तितः वराहो. ५।४२
(एवं) सर्वासां विद्यानां हृदयमेकायनमेवं सर्वेषां कर्मणां हस्तावेकायनम् बृह. ४।५।१२
सर्वास्वप्सु पञ्चविधं सामोपासीत छांदो. २।४।१
सर्वा ह्यस्मिन्देवताः शरीरेऽधिसमाहिताः प्रा. हो. ४।४
सर्वा ह्येवेमाः सर्वस्यै वाच उपनिषद इमां त्वेवाचक्षते ३ ऐत. २।५।१
सर्वां च सावित्रीमन्वाह, सर्वांश्च मधुमतीरहमेवेदं सर्वं भूयासं भूर्भुवः स्वः स्वाहा बृह. ६।३।६
सर्वांश्च वेदान् सर्वांश्च यज्ञान् सर्वांश्च शब्दान्सर्वांश्च ऋषीन् सर्वाणि च भूतानि स्थावरजङ्गमान्यनुभवेयमिति २ प्रणवो. २
सर्वांश्च वेदान् साङ्गानपि ब्रह्म ब्राह्मणांश्च...सत्यं धर्मेण धर्म तर्पयामि स्वेन तेजसा अ. शिरः. १।१
सर्वे आनन्दरसा यस्मात्प्रकटिता भवन्ति सामर. ३
सर्वे ऊष्माणोऽग्रस्ता अनिरस्ता विवृता वक्तव्याः प्रजापतेरात्मानं परिददानीति छांदो. २।२२।५
सर्वे कामा मनोगता व्यावर्तन्ते प. हं. ९
सर्वे कुर्वन्ति कर्माणि विवशाः पूर्वकर्मभिः शिवो. ७।१२५
सर्वेच्छाकलनाशान्तावात्मलाभोदयाभिधः। स पुनः सिद्धिवाञ्छायां कथमर्हत्यचित्ततः वराहो. ३।३०
सर्वेच्छाजालसंशान्तावात्मलाभो भवन्मुने। स कथं सिद्धिजालानि नूनं वाञ्छत्यचित्तकः अ. पू. ४।८
सर्वेच्छाः सकलाः शङ्काः सर्वेहाः सर्वनिश्चयाः। धिया येन परित्यक्ताः स जीवन्मुक्त उच्यते महो. २।५८
सर्वे जीवाश्च स्वस्वरूपं भजन्ते त्रि.म.ना. ३।७
सर्वे जीवाः सुखैर्दुःखैर्मायाजालेन वेष्टिताः। तेषां मुक्तिः कथं देव कृपया वद शङ्कर यो. शि. १।१
सर्वे जीवाः सुखैर्दुःखैर्मायाजालेन वेष्टिताः। तेषां मुक्तिकरं मार्गं मायाजालनिकृन्तनम् १ यो. त. ४
सर्वे तु शक्तिजालेन रोगा नश्यन्ति निश्चयम् योगकुं. १।१८
सर्वे देवा ऋषयो मुनयः सिद्धगन्धर्वयक्षरक्षःपिशाचाः सर्वे नारायणः ना.पू.ता. ५।६
सर्वे देवाः शिवात्मकाः रुद्रहृ. ४
सर्वे देवाः संविशन्तीति विष्णुः अ. शिखो. ७
सर्वे धर्मा मृषा स्वप्ने कायस्यान्तर्निदर्शनात्। संवृतेऽस्मिन्प्रदेशे वै भूतानां दर्शनं कुतः अ. शां. ३३
सर्वे धर्मास्तथा ज्ञानं नैतद्बुद्धेन भाषितम् अ. शां. ९९
सर्वे धर्माः समाभिन्ना अजं साम्यं विशारदम् अ. शां. ९३
सर्वे नमस्यन्ति च सिद्धसङ्घाः भ.गी. ११।३६
सर्वे नादसमुद्भवाः यो. शि. ३।८
सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि महाना. १।८
सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्। सर्वस्य प्रभुमीशानं सर्वस्य शरणं बृहत् श्वेताश्व. ३।१७
सर्वेन्द्रियगुणाभासं भ. गी. १३।१५
सर्वेन्द्रियगुणाभासः सर्वेन्द्रियविवर्जितः ब्र. बिं. १०७
सर्वेन्द्रियगुणाभासा सर्वेन्द्रियविवर्जिता। सर्वेषां प्रभुरीशानी सर्वेषां शरणं सुहृत् गु. का. ४९
सर्वेन्द्रियविवर्जितम् भ. गी. १३।१५
सर्वेन्द्रियविहीनोऽस्मि सर्वकर्मकृदप्यहम् मैत्रे. ३।१५
सर्वे पाप्मानोऽतो निवर्तन्ते छांदो. ८।४।१
सर्वेऽप्येते यज्ञविदः भ. गी. ४।३०

सर्वे बन्धाः प्रविनश्यन्ति — त्रि. म. ना. ८।७
सर्वे ब्रह्म वदिष्यन्ति सम्प्राप्ते तु कलौ युगे। वैदिके नानुतिष्ठन्ति शिश्नोदरपरायणाः — भवसं. १।५७
सर्वेभ्यः पापकृत्तमः — भ. गी. ४।३६
सर्वेभ्योऽन्तस्स्थानेभ्यो ध्येयेभ्यः प्रदीपवत्प्रकाशयतीति प्रकाशः — अ. शिखो. २
सर्वेभ्यो लोकेभ्यः सर्वे प्राणिनोऽभवन् — गायत्रीर. १
सर्वेभ्यो वेदेभ्यः सर्वे लोका अभवन् — गायत्रीर. १
सर्वे मरुद्गणा अजीजनन् (देव्याः) — बह्वृचो. १
सर्वे युद्धविशारदाः — भ. गी. १।९
सर्वे वयमतः परम् — भ. गी. २।१२
सर्वे वाक्यात्मका मन्त्रा वेदशास्त्राणि कृत्स्नशः — यो. शि. ३।७
सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति [कठो. २।१५+ — गुह्यका. ३९
सर्वे वेदा यत्रैकं भवन्ति — चित्सु. ११।१
सर्वे वेदाः प्रणवादिकास्तं प्रणवं तत्त्वाम्नोऽहं वेद स आयुर्यशःकीर्तिज्ञानैश्वर्यवान्भवति — नृ. पू. १।३
सर्वे वेदाः सर्वे यज्ञा इत्यथ खल्विन्द्रमत्वायत्तं — शौनको. १।५
(तन्नु) सर्वेशमप्रमेयमजं शिवं परमाकाशं निरालम्बमद्वयं... परं ब्रह्म प्राप्नोति — मं. ब्रा. ३।१
सर्वेशः सर्वसाक्षी च — २ रुद्रो. ४४
सर्वेश्वरं सर्वदेवैरुपास्यम् — ना. प. ९।१७
सर्वेषणाविनिर्मुक्तश्छित्त्वा तं तु न बध्यते — क्षुरिको. २५
(तस्मात्) सर्वेषामधिकारिणामनधिकारिणां च भक्तियोग एव प्रशस्यते — त्रि. म. ना. ८।४
(एवं) सर्वेषामध्वनां पादावेकायनमेवं॰ सर्वेषां वेदानां वागेकायनम् [बृह. २।४।११+ — ४।५।१२
सर्वेषामपि पापानां प्रायश्चित्तं त्वमेव हि — तुलस्यु. १३
सर्वेषामात्मानुसन्धानं विधिरित्येव — ना. प. ७।११
(एवं) सर्वेषामानन्दानामुपस्थ एकायनं॰ सर्वेषां विसर्गाणां पायुरेकायनम् [बृह. २।४।११+ — ४।५।१२
सर्वेषामिन्द्रियाणां गतिरुपरमते य आत्मन्येवावस्थीयते — प. हं. ९
सर्वेषामेव गतीनामव्यक्तं हृदयम् — सुबालो. १३।४
सर्वेषामेव गन्धानां पृथिवी हृदयं — सुबालो. १३।४
सर्वेषामेव पापानां सङ्घाते समुपस्थिते। तारं द्वादशसाहस्रमभ्यसेच्छेदनं हि तत् — १सं.सो. २।१०३
सर्वेषामेव भूतानां महासौभाग्यदायिनी। महालक्ष्मीर्महादेवी.. — ना. पू. ता. २।२
सर्वेषामेव भूतानां विष्णुरात्मा.. — रुद्रह. १३
सर्वेषामेव रूपाणां तेजो हृदयम् — सुबालो. १३।४
सर्वेषामेव शब्दानामाकाशं हृदयम् — सुबालो. १३।४
सर्वेषामेव रसानामापो हृदयम् — सुबालो. १३।४
सर्वेषामेव शर्म भवान् — २ प्रणवो. १९
सर्वेषामेव सत्त्वानां मृत्युर्हृदयम् — सुबालो. १३।४
सर्वेषामेव स्पर्शानां वायुर्हृदयम् — सुबालो. १३।४
सर्वेषामेव त्रीणि शरीराणि वर्तन्ते — यो. चू. ७२
(एवं) सर्वेषां कर्मणां हस्तावेकायनम् [बृह. २।४।११+ — ४।५।१२
सर्वेषां खलु भूतानामात्मा सत्ये प्रतिष्ठितः (मा. पा.) — छां. ड. ६।१७
(एवं) सर्वेषां गन्धानां नासिके एकायनम् — बृह. ४।५।१२
सर्वेषां च महीक्षिताम् — भ. गी. १।२५
(तस्मात्) सर्वेषां जीवानामिष्टविषये...सुखबुद्धि... — त्रि. म. ना. ५।३
सर्वेषां ज्योतिषां ज्योतिस्तमसः परमुच्यते — त्रि. म. ना. ४।३
सर्वेषां दिव्यानां (विधानां) प्रेरयिता ईशानः — पञ्चब्र. १
सर्वेषां देवानां सार्ष्टितां सालोक्यतां सायुज्यतां गच्छति — कठश्रु. १३
सर्वेषां देवाश्रयस्थं भस्म शिवाग्निजं शिवयोगिनाम् — बृ. जा. ५।७

सर्वेषां दोषरत्नानां सुसमुद्गिकया-
ऽनया । दुःखमृङ्खलया नित्य-
मलमस्तु मम स्त्रिया [याज्ञव.१६+ महो. ३।४७
सर्वेषां पुरुषाणामन्तःपुरुषः स
आत्मा स विज्ञेयः   त्रि. ता. ५।१
सर्वेषां पूर्वोक्तब्रह्मयज्ञक्रमं मुक्ति-
क्रममिति ब्रह्मपुत्रः प्रोवाच   पा. ब्र. ५
सर्वेषां प्रणवो बीजं हंसः शक्तिः
प्रकीर्तिता   गुह्यका. ८।१
सर्वेषां प्राणिनां प्रारब्धसञ्चिता-
गामिकर्मसाधर्म्यदर्शनात्कर्मा-
भिप्रेरिताः सन्तो जनाः
क्रियाः कुर्वन्ति   व. सू. ७
(ॐ) सर्वेषां प्राणिबुद्बुदानां
निरञ्जनाव्यक्तामृतनिधौ
विलयविलासः स्थितिर्विजृम्भते   स्वसंवे. १
सर्वेषां बीजानां हयग्रीवैकाक्षर-
बीजमनुत्तमं मन्त्रराजात्मकंभवति   हयग्री. ६
सर्वेषां ब्रह्मादीनां देवर्षीणां
मनुष्याणां मूर्तिरेका   परब्र. ६
सर्वेषां भूतानामन्तरपुरुषः स म
आत्मेति विद्यात्   २ ऐत. २।४।८
सर्वेषां भूतानां मूर्धा भवति   कौ. ब्रा. ४।२
सर्वेषां भूतानां मूर्धा राजा भवति   बृह. २।१।२
सर्वेषां भूतानां मूर्धेति वा अहमेत-
मुपास इति   कौ. ब्रा. ४।२
(एवं) सर्वेषां रसानां जिह्वै-
कायनम् [बृह. २।४।११+   ४।५।१२
(एवं) सर्वेषां रूपाणां चक्षु-
रेकायनम् [बृह. २।४।११+   ४।५।१२
सर्वेषां वस्तूनां मुरूपवस्तु भवति   ना.ब.ता. ३।१
सर्वेषां वा एतद्भूतानामाकाशः
परायणम् [नृ.पू.३।६+त्रि.ता.   ५।२२+ना.पू.२।९
(एवं) सर्वेषां विसर्गाणां पायु-
रेकायनम् [बृह. २।४।११+   ४।५।१२
(एवं) सर्वेषां वेदानां वागेकायनं
[बृ. उ. २।४।११+   ४।५।१२
(एवं) सर्वेषां शब्दानां श्रोत्र-
मेकायनम् [बृह. २।४।११+   ४।५।१२

सर्वेषां शरीराणां समानगुणाभवन्ति   सामर. १०१
(एवं) सर्वेषां सङ्कल्पानां मन
एकायनम् [बृह. २।४।११+   ४।५।१२
सर्वेषां समवायेन सिद्धिः स्या-
द्योगरक्षणा   योगो. ३२
(एवं) सर्वेषां स्पर्शानां
त्वगेकायनम् [बृह.२।४।११+   ४।५।१२
सर्वे स्पर्शा मृत्योरात्मानः   छांदो. २।२२।३
सर्वे स्पर्शा लेशेनानभिनिहिता
वक्तव्या मृत्योरात्मानं
परिहराणीति   छांदो. २।२२।५
सर्वेऽस्मै देवा बलिमावहन्ति   तैत्ति. १।५।३
सर्वे स्वरा इन्द्रस्यात्मानः   छांदो. २।२२।३
सर्वे स्वरा घोषवन्तो बलवन्तो
वक्तव्या इन्द्रे बलं ददानीति   छांदो. २।२२।५
सर्वे होतारो यत्रैकं भवन्ति   चित्यु. ११।१
सर्वेषु कालेषु लाभालाभौ समौ
कृत्वा...ध्रुवशीलोऽष्टौ मास्ये-
काकी चरेत् (?)   प. हं. प. ७
सर्वेषु तीर्थेषु स्नातो भवति   ऊर्ध्वपुं. ६
सर्वेषु भूतेषु गणेशमेकं विज्ञाय तं
मृत्युमुखात् प्रमुच्यते   हेरम्बो. ८
सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते   २ ऐत. २।३।४
सर्वेषु वेदेष्वारण्यकमावर्तयेत्   आरुणि. २
सर्वे सहैवावनिपालसङ्घैः   भ. गी. ११।२६
सर्वैरेव (अक्षरैः) स इन्द्रोऽभवत्   अव्यक्तो. ६
सर्वैरेव (अक्षरैः) स विष्णुरभवत्   अव्यक्तो. ६
सर्वोत्कृष्टपरमद्युतिप्रद्योतमानं
तत्त्वाकाशं भवति   अद्वयता. ४
सर्वोत्कृष्टपरमाद्वितीयप्रद्योतमानं
तत्त्वाकाशं भवति   मं. ब्रा. १।३
सर्वोपनिषदभ्यासं दूरतस्त्यक्त्य
सादरम् । तेजोबिन्दूपनिषद-
मभ्यसेत्सर्वदा मुदा । सकृदभ्यास-
मात्रेणब्रह्मैवभवतिस्वयम् [ते.बिं.   ६।११०,११
सर्वोपकारी मोक्षी भवति   दत्तात्रे. १।६
सर्वोपनिषदां मध्ये सारमष्टोत्तरं
शतम् । सकृच्छ्रवणमात्रेण
सर्वाघौघनिकृन्तनम्   मुक्तिको. १।४४

सर्वोपसंहारेण संहारप्रणवः — तुरीयो. १

सर्वोपाधिविनिर्मुक्तं स्वात्मानं भावयेत्सुधीः — कठरु. ४४

सर्वोपाधिविनिर्मुक्तं परं तत्त्वं तदुच्यते — अमन. १।११

सर्वो योगाग्निना देहो ह्यजडः शोकवर्जितः — यो. शि. १।२६

सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु — महाना. १०।११

सर्वोऽसि सर्वहीनोऽसि शान्ताशान्तविवर्जितः — ते. बिं. ५।६८

सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमोऽस्तु — शिव. सं. ३१ [+महाना. १०।११

सर्वौषधस्य मन्थं दधिमधुनो-रुपमथ्य ज्येष्ठाय श्रेष्ठाय स्वाहे-त्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेत् — छांदो. ५।२।४

सलिल एको द्रष्टाऽद्वैतो भवति — बृह. ४।३।३२

सलिल एवेदं सलिलं वनं भूयस्तेनैव मार्गेण जामाय यान्ति — सुबालो. ४।४

सलिलकण इवाम्बुधौ महात्मा विगलितवासनमेकतां जगाम — महो. २।७७

सलिलमिति लौहित्यकारणं सत्त्वम् — भावनो. ७

सलिलात्फेनमभवत् — गायत्रीर. १

सलिलेऽधारये चितं नाम्भसा परिभूयते — यो. शि. ५।५०

सलिले सैन्धवं यद्वत्साम्यं भवति योगतः । तथाऽऽत्ममनसोरैक्यं समाधि-(रिति कथ्यते) रभिधीयते [सौभाग्य. १८+ — वराहो. २।७५

स लोकमागच्छत्यशोकमहिमं तस्मिन्वसति शाश्वतीः समाः — बृह. ५।१०।१

सवनात्सविता — मैत्रा. ६।७

सवस्तु सोपलम्भं च द्वयं लौकिक-मिष्यते । अवस्तु सोपलम्भं च.. — मा. का. ८७

स वा अयमात्माऽनन्तोऽजरो-ऽपारो न वारे बाह्यो नान्तरः — आर्षे. ९।२

स वा अयमात्मा ब्रह्म — बृह. ४।४।५

स वा अयमात्मा सर्वेषां भूता-नामधिपतिः — बृह. २।५।१५

स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयः — बृह. २।५।१८

स वा अयं पुरुषो जायमानः शरीरमभिसम्पद्यमानः पाप्मभिः संसृज्यते — बृह. ४।३।८

स वा ऋषे तृतीयं जज्ञे — १ ऐत. २।३।३

स वा ऋषे द्वितीयं जज्ञे — १ ऐत. २।३।२

स वा एवं प्रवरणीय आत्मका-मेनेत्याहुर्ब्रह्मवादिनः — मैत्रा. ६।७

स वा एष आत्मा परः — नृसिंहो. ५।१

स वा एष आत्मा हृदि — छांदो. ८।३।३

स वा एष आत्मेत्यदो वशं नीत एव सितासितैः कर्मफलैरभि-भूयमान इव प्रतिशरीरेषु चरति — मैत्रा. २।१०

स वा एष एकस्त्रिधाभूतोऽष्टधैका-दशधा द्वादशधाऽपरिमितधा वोद्भूत उद्भूतत्वाद्भूतेषु चरति प्रतिष्ठा सर्वभूतानामधिपतिर्ब-भूवेत्यसावात्मान्तर्बहिश्चान्तर्बहिश्च — मैत्रा. ४।५

स वा एष एतस्मिन्बुद्धान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्या द्रवति स्वप्नान्तायैव — बृह. ४।३।१७

स वा एष एतस्मिन्सम्प्रसादे रत्वा.. — बृह. ४।३।१५

स वा एष एतस्मिन्स्वप्नान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं पापं.. — बृह. ४।३।३४

स वा एष एतस्मिन्स्वप्ने रत्वा... — बृह. ४।३।१६

स वा एष एतेन दैवेन चक्षुषा मनसैतान्कामान्पश्यन्रमते — छांदो. ८।१२।५

स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति — छांदो. ७।१५।४

स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराट् भवति — छांदो. ७।२५।२

स वा एष ओमित्येतदात्मा, स त्रेधाऽऽत्मानं व्यकुरुत — मैत्रा. ६।३

स वा एष विष्णुः शाकरः शिशु-मारश्चर इव एवं वेदाप पुनर्मृत्युं जयति — सहवै. २१

स वा एष निरिन्द्रियो विमुक्तोऽस्माल्लोकात्प्रैति — बृह. ६।४।१२

स वा एष पञ्चधाऽऽत्मानं प्रविभज्य निहितो गुहायां मनोमयः प्राणशरीरो बहुरूपः सत्यसङ्कल्प आत्मेति — मैत्रा. २।९

स वा एष पुरुषविध एव — तैत्ति. २।२

स वा एष पुरुषः पञ्चधा पञ्चात्मा — महाना. १७।१४

स वा एष पुरुषोऽन्नरसमयः — तैत्ति. २।१।१

स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्यामूढो मूढ इव व्यवहरन्नास्ते — नृसिंहो. ९।५

स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति — बृह. ४।४।२५

स वा एष महानज आत्माऽन्नादो वसुदानो विन्दते वसु — बृह. ४।४।२४

स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते — बृह. ४।४।२२

स वा एष यज्ञः प्रादक्षिणोऽनन्तदक्षिणः समृद्धतरः — सहवै. २१

स वा एष यज्ञः सद्यः प्रतायते सद्यः सन्तिष्ठते — सहवै. १७

स वा एष वाचः परमो विकारः, यदेतन्महदुक्थम् — १ ऐत. ३।६।३

स वा एष शुद्धः स्थिरोऽचलश्चालेपोऽव्यग्रो निःस्पृहः प्रेक्षकवदवस्थितः — मैत्रा. २।११

स वा एष सूक्ष्मोऽग्राह्योऽदृश्यः पुरुषसंज्ञो बुद्धिपूर्वमिहैवावर्तते — मैत्रा. २।५

स वा एषा देवता दूर्नाम दूरं ह्यस्या मृत्युर्दूरं ह वा अस्मान्मृत्युर्भवति — बृह. १।३।९

स वा एषोऽभिभूतः प्राकृतैर्गुणैः — मैत्रा. ३।२

स वा एषोऽस्मद्धृदन्तरे विज्ञप्त्यर्थोऽभ्यगत — मैत्रा. २।९

स वाजपेयेनसोऽतिरात्रेणसोऽप्तोर्यामेण स सर्वैः क्रतुभिर्यजते — ग. शो. ५।३

स वायुना ज्योतिषा भाति च तपति च, भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन — छांदो. ३।१८।४

स वायुपूतो भवति, स आदित्यपूतो भवति। अरोगी भवति। श्रीमांश्च भवति — मुद्गलो. ५।१

स वायुप्रतिष्ठा, आकाशात्मा स्वरेति स तद्भवति — कौ. ब्रा. २।१४

स वायुमिवात्मानं कृत्वाऽभ्यन्तरं प्राविशत् — मैत्रा. २।६

स वायुः स आकाशस्तदेतदोजश्च महश्चेत्युपासीत — छांदो. ३।१३।५

स वासुदेवो न यतोऽन्यदस्ति — गो. पू. ४।३

स वां मधु प्रवोचदृतायन्त्वाष्ट्रं यद्दस्रावपि कक्ष्यं वामिति — बृह. २।५।१७

सविकल्पो निर्विकल्पः समाधिर्द्विविधो हृदि (कुर्यात्) — सरस्व. ४९

सविकारमुदाहृतम् — भ. गी. १३।७

सविकारस्तथा जीवो निर्विकारस्तथा शिवः। कोशास्तस्य विकारास्ते ह्यवस्थासु प्रवर्तकाः — त्रि. ब्रा. २।१३

स विजायमानः स जनिष्यमाणः प्रत्यङ्मुखस्तिष्ठति विश्वतोमुखः — महाना. २।१

[+तै.आ.१०।१।३+ — सूर्यता. १।३

स विज्ञानो भवति स विज्ञातमेवान्ववक्रामति तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च — बृह. ४।४।२

सविता पश्चात्तात्सविता पुरस्तात्सवितोत्तरात्तात्सविताऽधरात्तात्। सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः [सूर्यो.८+ — ऋ.मं.१०।३६।१४

सविता प्रसविता दीप्तो दीपयन् दीप्यमानः — नृ. पू. २।७

सविता प्राणिनः सूते प्रसूते शक्तिम् — त्रि. ता. १।६

सविता वै देवस्ततो योऽस्य भर्गाख्यस्तं चिन्तयामि — मैत्रा. ६।७

सविता श्रियः प्रसविता श्रियमेवाप्नोति । अथो प्रज्ञातयैव प्रतिपदा५ छन्दा५ सि प्रतिपद्यते — सहवै. १५
सवितुरिति सविता, सावित्रमादित्यो वै — गायत्रीर. २
सवितुर्वा योग्यो जीवात्मपरमात्मसमुद्भवस्तं प्रकाशशक्तिरूपं जीवाक्षरं स्पष्टमापद्यते.. — त्रि. ता. १।१४
स वित्तेनैवा च पूर्यतेऽप च क्षीयते — बृह. १।५।१५
सवित्रा प्रसवेन जुषेत ब्रह्म पूर्व्यम् — श्वेताश्व. २।७
स विशङ्कु एवाभवत् — शौनको. २।३
स विश्वकृद्विश्वविदात्मयोनिर्ज्ञः कालकालो गुणी सर्वविद्यः । प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः — श्वेता. ६।१६
[भवसं. २।४६
स विश्वकृत् स हि सर्वस्य कर्ता तस्य लोकाः स उ लोक एव — बृह. ४।४।१३
स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा प्राणाधिपः सञ्चरति स्वकर्मभिः — श्वेताश्व. ५।७
सविषयं मनो बन्धाय, निर्विषयं मुक्तये भवति — मं. ब्रा. ५।१
स विष्णुःसशिवःसब्रह्मासेन्द्रःसेन्दुः स सूर्यः स वायुः सोऽग्निः स ब्रह्म — ग. शो. २।१
स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् — श्वेता. ३।१९
[+ना. प. ९।१४+ — भवसं. २।४९
स वेदैतत्परमं ब्रह्म धाम यत्र विश्वं निहितं भाति शुभ्रम् । उपासते पुरुषं ये ह्यकामास्ते शुक्रमेतदतिवर्तन्ति धीराः — मुण्ड. ३।२।१
(अथ) संवेदयत्यायायै हृदयमभिमृशेत् — कौ. उ. २।१०
स वृक्षकालाकृतिभिः परोऽन्यो यस्मात्प्रपञ्चः परिवर्ततेऽयम् । धर्मावहं पापनुदं भगेशं ज्ञात्वाऽऽत्मस्थममृतं विश्वधाम — श्वेता. ६।६
स वै खलु प्रस्तोता साम प्रस्तौति — बृह. १।३।२८
स वै गणेशः सर्वात्मा विज्ञेयः — गणेशो. ४।१०
स वै गौतम तीर्थेनैष्यसीति ह्युपैम्यहम् (मा. पा.) — बृह. ६।२।७
स वै त्रिविधः—सात्त्विको राजसस्तामसश्चेति । सात्त्विकी ज्ञानशक्तिः, राजसी क्रियाशक्तिः, तामसी द्रव्यशक्तिः — गणेशो. ४।१
स वै देवः प्राणो यः सञ्चरंश्चासञ्चरंश्च न व्यथते न रिष्यति — बृह. १।५।२०
स वै नैव रेमे तस्मादेकाकी न रमते — बृह. १।४।३
स वै ब्रह्म परमात्मेत्युच्यते — हंसो. ४
स वै बलं बलिनामग्रगण्यः पुण्यः शरण्यः सकलस्य जन्तोः । तमेकदन्तं गजवक्त्रमीशं विज्ञाय दुःखान्तमुपैति सद्यः — हेरम्बो. ११
स वै ब्रह्मण आनन्दः — गान्धर्वो. ६
स वै वाचमेव प्रथमामत्यवहत् सा यदा मृत्युमत्यमुच्यत — बृह. १।३।१२
स वै वेदिता स्याद्याज्ञवल्क्य वेद वा [बृह. ३।९।१०,११, — १२–१७
स वैष्णवं धाम भित्त्वा परं ब्रह्म प्राप्नोति — त्रि. ता. १।१५
सव्यदक्षिणनाडीस्थो मध्ये चरति मारुतः । तिष्ठतः खेचरी मुद्रा तस्मिन्स्थाने न संशयः — शाण्डि. १।७।४०
सव्यहस्त आज्यस्थाली (शारीरयज्ञस्य) — प्रा. हो. ४।२
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह । त्रिः पठेदायतप्राणः प्राणायामः स उच्यते — अ. ना. ११
सव्ये तु शङ्खं बिभृयादिति ब्रह्मविदो विदुः — सुदर्श. ११
सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे नियोजयेत् । दक्षिणेऽपि तथा सव्यं गोमुखं गोमुखं (गोमुखं) यथा [त्रि. ब्रा. २।३६+ — शाण्डि. १।३।२
सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे नियोजयेत् । दक्षिणेऽपि तथा सव्यं गोमुखं तत्प्रचक्षते — जा. द. ३।४

सव्ये दले तिष्ठति पद्मयोनिः
स्वरान्वितो दक्षिणपत्रगो हरिः ।
श्रिया समेतः शिवयाऽनुषक्तो
मध्ये दलेऽहं निवसामि नित्यम् ५ बिल्वो. ३

सव्योरुदक्षिणे गुल्फे दक्षिणं
दक्षिणेतरे । निदिध्यादृजुकायस्तु
चक्रासनमिदं मतम् वराहो. ५।१७

स शङ्खस्तुमुलोऽभवत् भ. गी. १।१३

सशरीरं समारोप्य तन्मयत्वं
तथोमिति । त्रिशरीरं त-
मात्मानं परं ब्रह्म विनिश्चिनु ना. प. ८।८

स शान्तिमधिगच्छति भ. गी. २।७१

स शान्तिमाप्नोति न कामकामी भ. गी. २।७०

सशिखं वपनं कृत्वा बहिस्सूत्रं
त्यजेद्बुधः । यदक्षरं परं ब्रह्म
तत्सूत्रमिति धारयेत् ब्रह्मो. ६
[+ना. प. ३।७८+ परम. ७

सशिखान् केशान् निकृत्य
विसृज्य यज्ञोपवीती निष्क्रम्य
पुत्रं दृष्ट्वा त्वं ब्रह्मा त्वं यज्ञस्त्वं
सर्वमित्यनुमन्त्रयेत् कठश्रु. ४

सशिखान् केशान्निष्कृत्य विसृज्य
यज्ञोपवीतं भूः स्वाहेत्यप्सु
जुहुयात् कठरु. ३

स शिखान्केशान्विसृज्य यज्ञोपवीतं
छित्त्वा पुत्रं दृष्ट्वा त्वं यज्ञस्त्वं
सर्वमित्यनुमन्त्रयेत् १ सं. मो. १।२

स शिवः सच्चिदानन्दः सोऽन्वेष्टव्यो
मुमुक्षुभिः पं. ब्र. ३५

स शिवः स शिवः स शिवो गणेशः गणेशो. २।४

स शीतोष्ण–सुखदुःख–मानाव-
मानवर्जितः प. हं. प. ११

स शुकः स्वकया बुद्ध्या न वाक्यं
बहु मन्यते महो. २।१७

स शुद्धः स शुद्धः स शुद्धो गणेशः गणेशो. २।४

स शुष्यति स उद्वर्तते तस्मादनृतं
न वदेत् १ ऐत. ३।६।५

स शौद्रं वर्णमसृजत बृह. १।४।१३

स षकारं प्रवाणीं३ अषकारा३
इति, स षकारमेव ब्रूयात् ३ ऐत. २।६।२

स षट्पदो भवति, साम एव षट्पदः ग. पू. १।११

स षडूर्मिवर्जितः । षड्भावविकारशून्यः प. हं. प. ११

स षोडशिना यजते, स वाजपेयेन
यजते, सोऽतिरात्रेण यजते,
सोऽप्तोर्यामेण यजते, सोऽश्वमेधेन
यजते, स सर्वैः क्रतुभिर्यजते नृ. पू. ५।१४

स सकलभोगान् भुङ्क्ते देहं त्यक्त्वा
शिवसायुज्यमेति का. रुद्रो. ५

स सच्चिदानन्दाद्वयचिद्घनः
सम्पूर्णानन्दैकबोधो ब्रह्मैवाह-
मस्मीत्यनवरतं ब्रह्मप्रणवानु-
सन्धानेन यः कृतकृत्यो भवति
स ह परमहंसपरिव्राट् प. हं. प. ११

स सततं सकलरुद्रमन्त्रजापी
भवति, स सकलभोगान्भुङ्क्ते,
देहं त्यक्त्वा शिवसायुज्यमेति,
न स पुनरावर्तते का. रुद्रो. ५

स सत्याभिसन्धः सत्येनात्मान-
मन्तर्धाय परशुं तप्तं प्रतिगृह्णाति,
स न दह्यतेऽथ मुच्यते छांदो. ६।१६।२

स सन्न्यासी च योगी च भ. गी. ६।१

स सन्न्यासी शिव एव सर्वदेवमयो
भवति तारोप. ४

स समानः सन्नुभौ लोकावनु-
सञ्चरति बृह. ४।३।७

स समुद्र एव भवति (मा. पा.) छां. अ. ६।१०।१

स सम्वृतकायः सन् सृष्टिकर्म
न जज्ञिवान् मुद्गलो. २।४

स सम्यग्ज्ञानं च लब्ध्वा विष्णु-
सायुज्यमवाप्नोति वासुदे. १७

स सर्वकर्मकृत् स ब्राह्मणः प. हं. प. ११

स सर्वकारणमूलं विराट्स्वरूपोभवति त्रि. म. ना. २।६

स सर्वज्ञः सर्वमेवाविवेश प्रश्नो. ४।११

स सर्वज्ञः सर्ववित् यस्य ज्ञानमयं
तपः । तस्यैषाऽऽहुतिर्दिव्या-
ऽमृतत्वाय कल्पतामिति २ सन्न्यासो. १

स सर्वभयनिर्मुक्तः साक्षाच्छिवमयो भवेत् वज्रपं. ६
स सर्वलोकस्य शुभाशुभस्य तं वै ज्ञात्वा मृत्युमत्येति जन्तुः हेरम्बो. ८
स सर्वविद्भजति मां भ. गी. १५।१९
स सर्ववेत्ता भुवनस्य गोप्ता ताभिः प्रजानां निहिता जनानाम् । प्रोता त्वमोता विचितिः क्रमाणां प्रजापतिश्छन्दमयो विगर्भः एका. ९
स सर्ववेदव्रतचर्यासु चरितो भवति पैङ्गलो. ४।२४
स सर्वज्ञः सर्वो भवति (मा. पा.) प्रश्नो. ४।१०
स सर्वसम्पत्तिभूतं प्रथमं...महाविद्येश्वरीविद्यां..त्रिपुरेश्वरी॰.. त्रि. ता. २।२
स सर्व चानिकेतः स्थिरमतिरेवं स भिक्षुः सौवर्णादीनां नैव परिग्रहेत् प. हं. ९
स सर्वा॰ लोकाञ्जित्वा ब्रह्म परं प्राप्नोति अव्यक्तो. ५
स सर्वान्वेदानधीतो भवति का. रुद्रो. ५
स सर्वा वाचो विभूर्भवति त्रि. ता. १।१५
स सर्वा॰श्च लोकानाप्नोति सर्वा॰श्च कामान्यस्तमात्मानमनुविद्य विजानाति छांदो.८।७।१,३
[८।१२।६+पैङ्गलो. ४।२४+ महो. ६।८
स संसारं तरति, सोऽमृतत्वं च गच्छति, महती श्रियमश्नुते नृ. पू. ३।२
स संस्तुतो देवतदेवसूनुः सुतं भृगोर्वाक्यमुवाच तुष्टः । अवेहि मां भार्गव वक्रतुण्डमनाथनाथं त्रिगुणात्मकं शिवम् ग. पू. ता. १।९
स साक्षी भवति, स एव भवति, स सर्वो भवति गणेशो. ५।८
ससागरां सपर्वतां सप्तद्वीपां वसुन्धरां तत्साम्नः प्रथमं पादं जानीयात् नृ. पू. १।२
ससागरां सप्तद्वीपां सपर्वतां वसुन्धरां तत्साम्नः प्रथमं पादं जानीयात् रायस्पोषस्य दातेति ग. पू. १।१२
स साम भवति, अग्ने गायत्री, यजुरुष्णिक् ,अनुष्टुप् साम ग. पू. १।११
स सामभिः सामवेदो रुद्रासादित्या जगत्याहवनीयः सा साम्नस्तृतीयो पादो भवति नृ. पू. २।१
स सामभिः सामवेदो रुद्रादित्या जगत्याहवनीयः सा तृतीयः पादो भवति नृसिंहो. १।२
स सिद्धिसाधनैर्योगैस्तानि साधयति क्रमात् अ. पू. ४।५
स सारः सर्वसाराणां तस्मात्सारो न विद्यते अ. पू. ४।७०
स सार्वभौमब्रह्मद्वाराक्क्रान्तोऽन्तर्भवनं प्रवेष्टुं मार्गमाश्रित्य तिष्ठति पैङ्गलो. २।७
स सूर्यः स चन्द्रः सुरास्ते ते असुराः (परमात्मैव) निरा. १०
स सूर्यः स वायुः सोऽग्निः स ब्रह्म गणेशो. २।१
स सूर्यो भगवान्सहस्रांशुः, तं सूर्यं भगवन्तं सर्वस्वरूपिणं निगमा बहु वर्णयन्ति सूर्यता. १।२
स सोमलोके विभूतिमनुभूय पुनरावर्तते प्रश्नो. ५।४
स सोमः कस्मिन्प्रतिष्ठित इति । दीक्षायामिति बृह. ३।९।२१
स स्त्रिय॰ ससृजे, ता॰ सृष्ट्वाऽध उपास्ते बृह. ६।४।२
स स्त्रियं ससृजे तां सृष्ट्वाऽध उपास्ते...(मा. पा.) बृह. ६।४।२
सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः कठो. १।६
स स्वराड्भवति, तस्य सर्वेषु लोकेषु कामचारो भवति छांदो. ७।२५।२
स स्नातो भवति ब्रह्मचारी वेदमधीत्य वेदोक्ताचरितब्रह्मचर्यो दारानाहृत्य पुत्रानुत्पाद्य तानुपाधिभिर्वितत्येष्ट्वा च शक्तितो यज्ञैः कठरु. ४
स स्वर्लोकं स महर्लोकं स जनोलोकं, स तपोलोकं, स सत्य-

लोकᳫं स सत्यलोकᳫं स सर्वलोकᳫं सर्वलोकं जयति — ग. शो. ५।२

स स्वव्यतिरेकेण नान्यद्द्रष्टा — प. हं. प. ११

स स्वाधीनमायः सर्वज्ञः सृष्टिस्थितिलयानामादिकर्ता जगदङ्कुररूपो भवति — पैङ्गलो. १।२

स ह अविदूर एव शवक्षयितमात्रेयमच्छावदमुपदर्शयन्नुवाच — छाग. २।१

स य एषोऽणिमैतदात्म्यमिदं सर्वम् — छांदो. ६।१२।३

स ह काममप्रभमेव वव्रे, तᳫं हास्मै ददौ — बृह. ४।३।१

स ह कुष्ठी बभूव तᳫं ह चिरं वसेत्याज्ञापयाञ्चकार — छांदो. ५।३।७

स ह क्षत्ताऽविदमिति प्रत्येयाय — छांदो. ४।१।८

स ह क्षत्ताऽन्विष्य नाविदमिति प्रत्येयाय — छांदो. ४।१।७

स ह गवाᳫं सहस्रमवरुरोध दश दश पादा एकैकस्याः शृङ्गयोराबद्धा बभूवुः — बृह. ३।१।१

स ह क्षत्तान्विष्याविदमिति प्रत्येयाय (मा. पा.) — छां. उ. ४।१।८

स ह गायत्रीमेव प्रतिसन्विवेश — शौनको. १।२

सहजं कर्म कौन्तेय — भ. गी. १८।४८

(एवं) सहजानन्दे यदा मनो लीयते तदा शान्तो भवी भवति — मं. ब्रा. २।३

सहजेनामनस्केन मनश्शल्यं वियोजयेत् — अमन. २।८१

स ह तेनैव वज्रेणासुरान् पराभावयन् — शौनको. ४।४

स ह त्रिष्टुभमेव प्रतिसन्दधत् — शौनको. ३।२

स ह द्वादशवर्ष उपेत्य चतुर्विᳫंशतिवर्षः सर्वान्वेदानधीत्य महामना अनूचानमानी स्तब्ध एयाय — छांदो. ६।१।२

स ह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै — शांतिपाठः

स ह नौ यशः। सह नौ ब्रह्मवर्चसम् — तैत्ति. शां. पा.

स ह पञ्चदशाहानि नाशाथ हैनमुपससाद — छांदो. ६।७।२

स ह पुत्रं श्वेतकेतुं प्रजि-(गाय-)घाय याजयेति — कौ. ब्र. १।१

स ह प्रजापतिरीक्षांचक्रे, हन्तास्मै प्रतिष्ठां कल्पयानीति — बृह. ६।४।२

स ह प्रणव उवाच–यद्हं सर्वभवानि — शौनको. २।२

स ह प्रणवपर्यन्तदीर्घनिःस्वनतन्तुना। ब्रह्माविन्द्रियतन्मात्रजालं जग इवानिलः — ब्र. पू. ३।१४

स ह प्रणवमेवोवाच–पुरोगायमेवारभस्वेति — शौनको. ३।२

स ह प्रवाहणो जैवलिरुवाच भगवन्तावग्रेवदतां ब्राह्मणयोर्वदतोर्वाचᳫं श्रोष्यामीति — छांदो. १।८।२

स ह प्रातः सञ्जिहान उवाच– न मे स्तेनो जनपदे न कदर्यो न मद्यपः। नानाहिताग्निर्नाविद्वान्न स्वैरी, स्वैरिणी कुतः — छांदो. ५।११।५

स ह प्रातः सञ्जिहान उवाच- यद्बताप्यस्यलभेमहि धनमात्राᳫं राजासौ यक्ष्यते सवैरार्त्विज्यैर्वृणीतेति — छांदो. १।१०।६

स ह प्रातः सभाग उदेयाय तᳫं होवाच मानुषस्य भगवन्गौतम वित्तस्य वरं वृणीथा इति — छांदो. ५।३।६

सहमाना नाम दक्षिणा, राज्ञी नाम प्रतीची, सुभूता नामोदीची, तासां वायुर्वत्सः, स य एतमेवं वायुं दिशां वत्सं वेद न पुत्ररोदᳫं रोदिति — छांदो. ३।१५।२

सहयज्ञाः प्रजाः सृष्ट्वा — भ. गी. ३।१०

स ह रक्षांसि यदेवाः सप्तदश — सहवै. २५

स हरिर्वसुवित्तमः — विष्णु. ११।७

स ह वा एतस्य स्वधा न यजुषा न साम्नामर्थोऽस्ति — सूर्यता. ३।१

स ह वै देवानां चासुराणां च यज्ञौ प्रतताबास्ताम् — सहवै. १

स ह व्याधिनाऽनशितुं दध्रे, तमाचार्यजायोवाच-ब्रह्मचारिन्नशान, किं नु नाश्नासीति — छांदो. ४।१०।३

स ह शान्तहृदय एव विरोचनोऽसुराञ्जगाम तेभ्यो हैतामुपनिषदं प्रोवाचात्मैवेह महय्य आत्मा परिचर्यः... — छांदो. ८।८।४

स ह श्वोभूते गा अभिप्रस्थापयाञ्चकार, ता यत्राभिसायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश [छांदो.४।६।१ +७।१+८।१

स ह षोडशं वर्षशतमजीवत् , प्र ह षोडशं वर्षशतं जीवति यएवंवेद — छांदो. ३।१६।७

स ह षोडशं वर्षशतं जीवति(मा.पा.) — छां.उ.३।१६।७

स ह सञ्जिहान एव क्षत्तारमुवाचाङ्गारे ह सयुग्वानमिव रैक्वमात्थेति यो नु कथं सयुग्वा रैक्व इति — छांदो. ४।१।५

स ह समित्पाणिश्चित्रं गार्ग्यायणिं प्रतिचक्राम उपायानीति — कौ. उ. १।१

स ह सम्पादयाञ्चकार प्रक्ष्यन्ति मामिमे महाशाला महाश्रोत्रियाः — छांदो. ५।११।३

स ह सम्पातास्त्वमाशिषमाशिभूताभूतमाशिषमाशिराशीराशिरनुभूमिः स्वाहा — पारमा. ४।५

स ह सर्वत आवसथान्मापयाञ्चक्रे — छांदो. ४।१।१

स ह सर्वमेवात्मानमुपसंहृत्य शृङ्ग एवागूहयत् — शौनको. ३।४

स ह सहस्रं समा ब्रह्मचर्यमभ्युवास — अव्यक्तो. २

सहसैवाभ्यहन्यन्त — भ. गी. १।१३

स ह स्मयमान उवाच सत्यश्रवा एव मा प्रमदत — छाग. २।४

स ह स्मान्यानन्तेवासिनःसमावर्तयंस्तं ह स्मैव न समावर्तयति — छांदो. ४।१०।१

स ह स्माह पाणिना मा मातृद्रः — बृह. ५।१२।१

स ह स्मैभ्यः कामानागायति — छांदो. १।१।१३

सहस्रकमले शक्तिः शिवेन सह मोदते। सैवावस्था परा ज्ञेया.. — योगकु. १।८६

सहस्रकलावयवकल्याणं दृष्टमात्रेण मोक्षदं वेषमादधे — मुद्गलो. २।२

सहस्रकृत्वः प्रयुक्ताग्निष्टोमाप्तोर्यामादीनां फलमवाप्नोति — सन्ध्यो. २

सहस्रदलसंख्यातं ब्रह्मरन्ध्रे महापथिम्। आधारं प्रथमं चक्रं स्वाधिष्ठानं द्वितीयकम् — यो. चू. ६

सहस्रधा नैकधा चाहमत्र। मया ततमितीदमश्नुते तदन्यथा सर्वाद्वि मे अविद्विदुः — ना. म. १९

सहस्रपरमा देवी शतमूला शताङ्कुरा। सर्वं हरतु मे पापं दूर्वा दुःस्वप्ननाशिनी — महाना. ४।१ [वनदु. १५५

सहस्रपादेकमूर्धा व्याप्तं स एवेदमावरीवर्तिभूतम् — अ.शिरः. ३।१४

सहस्रबाहो भव विश्वमूर्ते — भ. गी. ११।४६

सहस्रमेकं अयुतं षट्शतं चैव सर्वदा। उच्चरन्पठितो हंसः सोऽहमित्यभिधीयते — ब्र. वि. ७९

सहस्रयुगपर्यन्तं — भ. गी. ८।१७

सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः — प्रश्नो. १।८ [+मैत्रा. ६।८+ अक्ष्यु. २

सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम्। विश्वं नारायणं देवमक्षरं परमं पदम् — महाना. ९।१

सहस्रशीर्षं देवं सहस्राक्षं विश्वशम्भु (सम्भ) वम् [महो.१।५+ चतुर्वे. २

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् [ऋक्.मं.१०।९०।१+ श्वेता. ३।१४ [+चित्यु.१२।१सुबालो. १।२+ पु. सू. १+

सहस्रसङ्ख्यया जाताः शाखाः साम्नः परन्तप — मुक्तिको. १।१३

सहस्रं वृषाला एतस्यां वाचि जनको जनक इति वा उ जना धावन्तीति — कौ. उ. ४।१

सहस्रं वा यस्य वै वितानमादधानः सहस्रं वा आशिषः सहस्रं यस्य वै सासिकाः सहस्रं सहस्रायस्वाहा पारमा. ४।७

सहस्रं समा आयन्तनिहितोङ्कारेण पदान्यगायत् अव्यक्तो. ३

सहस्राङ्कुरशाखात्म-फल-पल्लव-शालिनः। अस्य संसारवृक्षस्य मनोमूलमिदं स्थितम् मुक्तिको. २।३७

सहस्रारे जलज्योतिरन्तर्लक्ष्यम् मं. ब्रा. १।५

सहस्रार्णमतीवात्र मन्त्र एष प्रदर्शितः। एवमेतां समारूढो हंसयोगविचक्षणः॥ न भिद्यते कर्मचारैः पापकोटिशतैरपि ना. बिं. ५

सहस्व मन्यो अभिमातिमस्मे रुजन्मृणन्प्रमृणन्प्रेहि शत्रून् वनदु. १०९

[ऋ. मं. १०।८४।३+ अथर्व. ४।३१।३

स ह स्वेनैव रूपेणादित्यानगच्छत् शौनको. ४।४

स ह ह्येतावत्स्मिञ्छरीरे वसतः कौ. त. ३।४

स हान्तत एवात्मानमुपसंहृत्य तावदेवाप्राद्यत् शौनको. २।३

स हाम्नमित्यभिव्याहृत्य बृहतीसहस्रं शशंस १ ऐत. २।३।१

स हापश्यत्-सर्व एव न्यूङ्खयन्तो मामभिचक्षीरन्निति शौनको. ३।३

स हापश्यदादित्यो वा उद्गीथोऽसौ खल्वादित्यो ब्रह्म शौनको. ४।३

स हापश्यन्नैतद्-असैवसर्वारूपाण्येव-मभिचक्षीरन् शौनको. २।२

स हात्राप्येव देवानेतत्त्रयं ददर्श छांदो. ८।१०।१

स हायमीक्षाञ्चक्रे यन्मदन्यन्नास्ति कस्मान्नु बिभेमीति बृह. १।४।२

स हायत्तः पितुरर्धमेयाय छांदो. ५।३।४

स हाविपरिहृतो मेने न मेऽस्य पुत्रेण समगाद्दिति ३ ऐत. १।१।१

सहास्मदीयैरपि योधमुख्यैः भ. गी. ११।२६

स हाहं यशसां यशः छांदो. ८।१४।१

स हाशाथ हैनमुपससाद त२ह यत्किञ्च पप्रच्छ सर्व२ह प्रतिपेदे छांदो. ६।७।४

स हि खादित्वाऽतिशेषा आयाया आजहार छांदो. १।१०।५

स हि ज्येष्ठः श्रेष्ठो राजाऽधिपतिः छांदो. ५।२।६

स हि प्रज्ञानेन सम्पन्नतमो विज्ञातं वदति १ ऐत. ३।२।३

स हि सर्वकाममयः पुरुषोऽध्यवसा-यसङ्कल्पाभिमानलिङ्गो बद्धो-ऽतस्तद्विपरीतो मुक्तः मैत्रा. ६।३०

स हि स्वप्नो भूत्वेमं लोकमति-क्रामति मृत्यो रूपाणि बृह. ४।३।७

स हिंकारो मघा जायते छांदो. २।१५।१

स हीदमन्नं धियाधिया जनयते बृह. १।५।२

स हीदमन्नं पुनः पुनर्जनयते बृह. १।५।२

स हेभ्यं कुल्माषान् खादन्तं बिभिक्षे छांदो. १।१०।२

सहेलं सलीलं वा स्मरणाद्वरदानेषु चतुरा गुह्यषोढा. २

सहेश्वरो यशस्वी कल्याणकीर्ति-र्भवितोरीश्वरो ह तु पुरुषायुषः प्रैतोरिति ह स्माह १ ऐत. ३।५।२

स हैतयैव निविदा प्रतिपेदे बृह. ३।९।१

स हैतावानास यथा स्त्रीपुमा२सौ सम्परिष्वक्तौ स इममेवात्मानं द्वेधा पातयत्ततः पतिश्च पत्नी चाभवताम् बृह. १।४।३

स हैतैः सर्वैरस्माच्छरीरादुत्क्रामति कौ. त. २।१४

स हैनं पप्रच्छ त्वं नु खलु नो याज्ञवल्क्य ब्रह्मिष्ठोऽसी३ति बृह. ३।१।२

स हैव सन्तं न विजानन्ति देवाः इन्द्रस्यात्मान२ शतधा चरन्तम् चित्यु. ११।५

स हैवालं भार्येभ्यो भवति बृह. १।३।१८

स होता स मुक्तिः साऽतिमुक्तिः बृह. ३।१।३

स होवाच—आर्तमिवेदं ते विज्ञान-मपिस्विदेनद्दोवस्योरेव पर्यायेणोपवन्वीमहि आर्षे. ४।२

स होवाचकिंमेप्रतीवाहोभविष्यतीति २ प्रणवो. ८

स होवाच किं मेऽन्नं भविष्यतीति छांदो. ५।२।१

स होवाचकिंमे वासो भविष्यतीति छांदो. ५।२।२

स होवाच–कुरुक्षेत्र एवोपसमेत्य ये बालिशास्तानुपाध्वै ते व इदं प्रवक्ष्यन्तीति छाग. ३।१

स होवाच–कैषा त्वं ब्रह्मवाग्यदसि शंसात्मानमिति अव्यक्तो. २

स होवाच–गार्गि माऽतिप्राक्षी-र्मा ते मूर्धा व्यपप्तत् बृह. ३।६।१

स होवाच–गार्ग्य उप त्वा यानीति बृह. २।१।१४

स होवाच–गार्ग्योय एवासावादित्ये पुरुष एतमेवाहं ब्रह्मोपास इति बृ. उ. २।१।२

स होवाच–जनको वैदेहोऽभयं त्वागच्छताद्याज्ञवल्क्य यो नो भगवन्नभयं वेदयसे बृह. ४।२।४

स होवाच–जपध्वमानुष्टुभं मंत्रराजं षट्पदं सप्तदक्षरम् ग. पू. १।१०

स होवाच–तपस्यन्तं सिद्धारण्ये भृगुपुत्रं पृच्छध्वमिति ग. पू. १।६

स होवाच–तां हि वै पूर्वं नारायणो यस्मिँल्लोका ओताश्च प्रोताश्च तस्य हृत्पद्माज्जातोऽब्जयोनि-स्तपस्तप्त्वा तस्मै ह वरं ददौ गोपालो. १।१४

स होवाच–त्वामेव जानीयामिति १ ऐत. २।३।४

स होवाच नारदः...निर्वैरः शान्तो दान्तः सन्न्यासी परमहंसा-श्रमेणास्खलित-स्वस्वरूपध्यानेन देहत्यागं करोति स मुक्तो भवति ना. प. ३।१

स होवाच पितरं, तत कस्मै मां दास्यसीति। द्वितीयं तृतीयं तं होवाच, मृत्यवे त्वा ददामीति कठो. १।४

स होवाच– प्रजापतिः स यो ह वै सावित्रस्याष्टाक्षरं पदं श्रिया-भिषिक्तं तत्साम्नोऽङ्गं वेद श्रिया हैवाऽभिषिच्यते नृ. पू. १।३

स होवाच प्रतर्दनस्त्वमेव वृणीष्व यं त्वं मनुष्यायहिततमं मन्यस इति कौ. त. ३।१

स होवाच– बहव इमेऽस्मिन्पुरुषे कामा नानात्ययाः छांदो. ४।१०।३

स होवाच–बालाकिर्य एवैष आदित्ये पुरुषस्तमेवाहमुपास इति कौ. त. ४।२

स होवाच–ब्रह्मपुत्रस्तपस्तेपे सिद्ध-क्षेत्रे महायशाः ग. पू. १।६

स होवाच– भगवंतो यदिदं सप्त-माध्वै यदृचोऽधीध्वै यद्यजूंषि यत्सामानि कस्यायं महिमेति छाग. १।२

स होवाच भगवान् ब्रह्मा आनन्दं ब्रह्मणो विद्वान्सच्चिदानन्द-स्वरूपो भवति ना. उ. ता. १।१

स होवाच भगवान् ब्रह्मा नारायण-यन्त्रमन्त्रावरणपूजामाचचक्षे ना. पू. ६।१

स होवाच भगवान् उपासनविधिं व्याचष्टे ना. पू. ४।११

स होवाच यदिदमिच्छाचिदिच्छा-चिदीक्षध्वै किं तद्येन ब्राह्मण इति छाग. १।३

स होवाच–यदेतद्रश्मिमण्डले-ऽर्चिर्दीप्यते बम्भ्रम्यमाणमिव, चाकश्यमानमिव, जाज्वल्य-मानमिव, देदीप्यमानमिव, लेलिहानं तदेव मे ब्रह्म आर्षे. ५।२

स होवाच– याज्ञवल्क्यः प्रिया बतारे नः सती बृ. उ. २।४।४

स होवाच याज्ञवल्क्यः – सो-ऽविमुक्त उपास्यः.. जाबालो. २

स होवाचाजातशत्रुं काश्यं ब्रह्म ते ब्रवाणीति बृह. २।१।१

स होवाचाजातशत्रुः सहस्रमेतस्यां वाचि दद्मो जनको जनक इति वै जना धावन्तीति बृह. २।१।१

स होवाचेन्द्रो यत्रामुद्गीथेनोपाव-नेष्यन्ते तत्रैवते कल्पयिष्यन्तीति शौनको. ४।२

स होवाचोषस्तश्चाक्रायणो यथा विब्रूयादसौ गौरसावश्व इत्येव-मेवैतद्व्यपदिष्टं भवति बृह. ३।४।२

स होह वैतद्भगवन्मनुष्येषु (मा.पा.) प्रश्नो. ५।१

स ह्येनन्नेदिष्ठं पस्पर्श, स ह्येनं प्रथमो विदाञ्चकार ब्रह्मेति केनो. ४।३

संपूर्णं कुम्भवदिदं कुम्भवे-न्मातरिश्वना त्रि. ब्रा. २।९८

सं मा सिञ्चन्तु मरुतः समिन्द्रः सं बृहस्पतिः — सहवै. २२
संयमासंयमाभ्यां च संसारः शान्तिमन्वगात् — महो. ४।८७
संयमाग्निषु जुह्वति — भ. गी. ४।२६
संयुक्तमेकतां याति तथाऽऽत्म-न्यात्मविन्मुनिः — २ आत्मो. २५
संयुक्तमेतत्क्षरमक्षरं च व्यक्ताव्यक्तं भरते विश्वमीशः। अनीशश्चात्मा बध्यते भोक्तृभावाज्ज्ञात्वा देवं मुच्यते सर्वपाशैः — श्वेता. १।८
[+ भवसं. २।५+ — ना. प. ९।७
संयोग एषां न त्वात्मभावादात्मा ह्यनीशः सुखदुःखहेतोः — ना. प. ९।१
संयोगो योग इत्युक्तो जीवात्म-परमात्मनोः — भवसं. ३।१३
संवत्सर आत्माऽश्वस्य मेध्यस्य — बृह. १।१।१
संवत्सरत्रयादूर्ध्वं प्राणायामपरो नरः — त्रि. ब्रा. १०२
संवत्सरत्रयेणाऽपि लयस्थस्यापि योगिनः। तेजस्तत्त्वस्य सिद्धिः स्यात्तोयतत्त्वमयो भवेत् — अमन. १।७६
संवत्सरश्च यजमानश्च लोकाः सोमो यत्र पवते यत्र सूर्यः — मुण्ड. २।१।६
संवत्सरस्य तेजोभूतस्य भूतस्यात्म-भूतस्य त्वमात्माऽसि — कौ. त. १।६
संवत्सरं दीक्षितो भवति संवत्सरा-देवात्मानं पुनीते — सहवै. १२
संवत्सरं पयसा जुह्वदपपुनर्मृत्युं जयतीति — बृह. १।५।२
संवत्सरं मज्ज्ञो नाश्नीयात्तद्व्रतम् — छांदो. २।१९।२
संवत्सरः प्रजननम् — सहवै. २३
संवत्सरात्खल्वेताः प्रजाः प्रजायन्ते संवत्सरेणेह वै जाता विवर्धन्ते संवत्सरे प्रत्यस्तं यन्ति — मैत्रा. ६।१९
संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषो-ऽमानवः [छांदो. ४।१५।५+ — ५।१०।२
संवत्सराद्देवात्मानं पुनीते — सहवै. १२
संवत्सरो वै प्रजापतिः, तस्यायने दक्षिणं चोत्तरं च — प्रश्नो. १।९
संवत्सरोऽसावादित्यः — म. ना. १७।१२
संवर्गोऽसि पाप्मानं मे संवृङ्ग्धि — कौ. त. २।७
संवर्चसा पयसा संतनूभिरगन्महि मनसा सꣳ शिवेन — सहवै. ५
संवर्तकोऽग्निर्मरुतो विराडेकर्षि-र्भास्वती स्मृता सा साम्न-श्चतुर्थः पादो भवति — नृ. पू. २।१
संवादमिममद्भुतम् — भ.गी. १८।७६
संवादमिममश्रौषं — भ.गी. १८।७४
संविच्च सदसच्चापि चाहं विश्वमिदं ध्रुवम् — २ देव्यु. ४
संवित्संरोधनं श्रेयः प्राणादि-स्पन्दनं वरम् — अ. पू. ४।४३
संविदपेतं निरय एव मूत्रद्वारेण निष्क्रान्तम् (शरीरं) — मैत्रे. १।३
संविदा देयम् — तैत्ति. १।११।३
संविदितमनोन्मन्यनुभवः — मं. ब्रा. ३।१
संविद्भ्रुवाश्च तन्मध्ये शक्तिरुद्धा स्थिता परा। तत्र पूर्णा गिरौ पीठे शक्तिं ध्यात्वा विमुच्यते — योगरा. १८
संविद्वस्तुदशालम्बः सा यस्येह न विद्यते। सोऽसंविद्जडः प्रोक्तः कुर्वन्कार्यशतान्यपि — अ. पू. ४।५८
संविन्मात्रपरोऽस्म्यहम् — १ सं.सो. २।४७
संविन्मात्रमहं महत् — महो. ६।८१
संविन्मात्रस्थितश्चाहमजोऽस्मि किमतः परम्। व्यतिरिक्तं जडं सर्वं स्वप्नवच्च विनश्यति — स्कन्दो. ३
संविन्मात्रं परं ब्रह्म तत्स्वमात्रं विजृम्भते — स्कन्दो. शीर्षके
संविभज्य सुतानर्थं ग्राम्यकामान् विसृज्य च — कुण्डिको. ३
संविभज्य सुतानर्थैर्ग्राम्यकामा-न्विसृज्य च। चरेत वाममार्गेण शुचौ देशे परिभ्रमन् — २ सन्यासो. ४
संविशत्यात्मनाऽऽत्मानं य एवं वेद — नृसिंहो. २।७

संवृत्या जायते सर्वं शाश्वतं नास्ति तेन वै	अ. शां. ५७
संवेद्य वर्जितमनुत्तममाद्यमेकं संवित्पदं विकलनं कलयन् महात्मन् । हृद्येव तिष्ठ कलनारहितः क्रियां तु कुर्वन्नकर्तृपदमेत्य शमोदितश्रीः	अ. पू. ४।९१
संवेद्यसम्परित्यागात्प्राणस्पन्दनवासने । समूलं नश्यतः क्षिप्रं मूलच्छेदादिव द्रुमः	अ. पू. ४।५४
संवेद्येन हृदाकाशे मनागपि न लिप्यते । यस्यासावजडा संवित् जीवन्मुक्तः स कथ्यते	अ. पू. ४।५९
संशयात्मा विनश्यति	भ. गी. ४।४०
संशये समनुप्राप्ते ब्रह्मनिश्चयमाश्रयेत्	ते. बि. ६।१०१
संशान्तदुःखमजडात्मकमेकमुत्तममानन्दमन्थरमपेतरजस्तमो यत् । आकाशकोशतनवोऽतनवो महान्तस्तस्मिन्पदे गलितचित्तलवा भवन्ति	अ. पू. ४।२४
संशान्तसर्वसङ्कल्पः प्रशान्तसकलेषणः । निर्विकल्पपदं गत्वा स्वस्थो भव मुनीश्वर	महो. ६।८२
संशान्तसर्वसङ्कल्पा या शिलावदवस्थितिः । जाग्रन्निद्राविनिर्मुक्तासा स्वरूपस्थितिः परा [महो.५।६+	मैत्रे. २।३०
स ह शाम्यति तन्निधनम्	छांदो. २।१२।१
संशितं मे ब्रह्म संशितं वीर्यं बलं	सहवै. ८
संशितं क्षत्रं मे जिष्णु यस्याहमस्मि पुरोहितः	सहवै. ८
संसार एव दुःखानां सीमान्त इति कथ्यते । तन्मध्ये पतिते देहे सुखमासाद्यते कथम्	महो. ६।२६
संसारदुःखानि न मां स्पृशन्ति	वराहो. ३।३
संसारदोषदृष्ट्यैव विरक्तिर्जायते सदा । विरक्तस्य तु संसारात् सन्न्यासः स्यान्न संशयः	ना. प. ६।२६
संसारनिवृत्तिमार्गप्रवृत्तिः कदापि न जायते	त्रि. म. ना.५।३
संसारपारं मुनयोऽपि यान्ति	हेरम्बो. ७
संसारमण्डलं दुःखं पच्यन्ते यत्र जन्तवः	इतिहा. १२
संसारमेव निस्सारं दृष्ट्वा सारदिदृक्षया । सन्न्यसेद्दृन्द्वनाशाय परं वैराग्यमाश्रितः[भवसं.१।१+	नार. पं. ३।१५
संसाररात्रिदुस्स्वप्ने शून्ये देहमये भ्रम । सर्वमेव पवित्रं तद्दृष्टं संसृतिविभ्रमम्	महो. ६।२२
संसाराडम्बरमिदं कथमभ्युदितं मुने । कथं च प्रशमं याति किं यत्कस्य कदा वद	महो. २।१५
संसाराडम्बरमिदं कथमभ्युत्थितं गुरो । कथं प्रशममायाति यथावत्कथयाशु मे	महो. २।३०
संसाराम्बुनिधावस्मिन् वासनाम्बुपरिप्लुते । ये प्रज्ञानावमारूढास्ते तीर्णाः पण्डिताः परे	महो. ५।१७६
संसारार्णवसञ्जातं सेवितं मम मानसे । चन्द्रसूर्यत्विषो दिव्या ध्वजा मेरुर्हिरण्मयः	गोपालो. २।२६
संसारितोऽयमानन्दमयो रस आत्मानमानन्दमयतया प्रपद्यते	सामर. १०२
संसारे च गुहावाच्ये मायाज्ञानादिसंज्ञके । निहितं ब्रह्म यो वेद परमे व्योम्नि संज्ञिते ॥ सोऽश्नुते सकलान्कामान्क्रमेणैव द्विजोत्तमः	कठश्रु. १३
संसारेषु नराधमान्	भ. गी. १६।१९
संसिद्धिमपि गच्छेद्विद्यया सह ज्ञानवान्	संहितो. ३।८
संसिद्धिं परमां गताः	भ. गी. ८।१५
संसिद्धिं लभते नरः	भ. गी. १८।४५
संसिद्धोऽयं जीवसञ्ज्ञो मायोपाधिभेदेन नानाशरीरभावमाप्नोति	सामर. १००
संसिद्धौ कुरुनन्दन	भ. गी. ६।४३
संसृज्य विश्वा भुवनानि गोपाः	श्वेताश्व. ३।२
संसृज्य विश्वा भुवनानि गोप्ता	बटुको. २२

(अथ) संसृतिबन्धमोक्षयोर्विद्याविद्ये चक्षुषी उपसंहृत्य   महावा. १

संस्कारसहितं धार्यम् (भस्म)   बृ. जा. ३।१

संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः [ऋ. मं. १०।८४।७+   वनदु. ११३ अथर्व. ४।३१।७

संस्तभ्य सिंहं स्वसुतान्गुणार्थान् संयोज्य शृङ्गैर्ऋषभस्य हत्वा । वश्यां स्फुरन्तीमसतीं निपीड्य सम्भक्ष्य सिंहेन स एष वीरः   नृसिंहो. ४।३

संस्तभ्यात्मानमात्मना   भ. गी. ३।४३

संस्थितानि पूर्वाणि दारुपात्राण्यग्नौ जुहुयात् (यतेः)   कठरु. २

संहारप्रणवः सृष्टिप्रणवश्चान्तर्बहिश्चोभयात्मकत्वात्त्रिविधो ब्रह्मप्रणवः   ना. प. ८।१

संहाररूपा रुद्राणी भवति   ना. पू. ता. २।१

संहारो निर्गुणप्रणवः   तुरीयो. १

सं हास्मै पद्यते यं कामं कामयते, य एवं वेद   बृह. ६।१।४,४

सा कलहंसी सृष्ट्यादौ ब्रह्मणः पुत्री सरस्वती   सामर. ९२

सा कारणं कारणकारणाधिपा नास्याश्च कश्चिज्जनिता न चाधिपः   गुह्यका. ६८

साकारमनित्यं नित्यं निराकारं   त्रि. म. ना.२।१

साकारस्तु द्विविधः सोपाधिको निरुपाधिकश्च   त्रि. म. ना.२।१

साकारः सावयवो निरवयवं निराकारम्   त्रि. म. ना.२।१

सा कालपुत्रपदवी सा महावीचिवागुरा । सासिपत्रवनश्रेणी या देहेऽहमिति स्थितिः   ना. प. ३।५०

साकं स एको भूतश्चरति प्रजानां तस्मादुच्यत एकः   बटुको. २०

सा काष्ठा सा परा गतिः   कठो. ३।११

सा कुण्डलिनी कण्ठोर्ध्वभागे सुप्ता चेद्योगिनां मुक्तये भवति   शाण्डि.१।७।३७

साक्षाच्छक्तिर्भगवतः स्मरणमात्ररूपाविर्भावप्रादुर्भावात्मिका   सीतो. २५

साक्षात् कथयतः स्वयम्   भ. गी. १८।७५

साक्षादपरोक्षाद्ब्रह्म   बृह. ३।४।२,२

साक्षाद्विधिमुखो ह्येष समाधिः पारमार्थिकः   मुक्तिको. २।५६

साक्षान्नारायणो देवः परं ब्रह्माभिधीयते   ना. पू. ता.५।७

(अहो) साक्षान्नारायणोऽयं परं ब्रह्म   सामर. ५४

साक्षाद्ब्रह्म गोपालपुरी भवति   गोपालो. १।१५

साक्षाद्ब्रह्मस्वरूपो जगन्नाथः   राधोप. ४।१

साक्षाद्ब्रह्मैव, नान्योऽस्तीत्येवं ब्रह्मविदां स्थितिः   वराहो. २।२१

साक्षाद्भूयात्तु मङ्गलम्   शिवो. ७।८०

साक्षिण्येषा केवला निर्गुणा च   गुह्यका. ६९

साक्षिभूते समे स्वच्छे निर्विकल्पे चिदात्मनि । निरिच्छं प्रतिबिम्बन्ति जगन्ति मुकुरे यथा   महो. ५।५५

साक्षी चेता केवलो निर्गुणश्च [+राधोप. ४।३+ब्रह्मो. १६+   श्वेता. ६।११ गोपालो. ३।१९

साक्षी सम्पूर्णकेवलः   महो. २।७३

साक्षी स्वप्रकाशः   नृसिंहो. ९।६

साक्ष्यनपेक्षोऽहं निजमहिम्नि संस्थोऽहमचलोऽहम्   आ. प्र. ४

साक्ष्यविशेषोऽनन्योऽसुखदुःखोऽद्वयः परमात्मा   नृसिंहो. ९।७

साक्ष्यहं किञ्चिदप्यत्र न कुर्वे नापि कारये   १ अवधू. २५

साक्ष्यहं सर्वदा नित्यश्चिन्मात्रोऽहं न संशयः   सर्वसारो. ८

सा गतिर्लोक एव सः   मैत्रा. ६।२४

सा गौरभवदृषभ इतरस्तां समेवाभवत्   बृह. १।४।४

साग्निका अग्निव्रतधारकाः कर्मजडास्तैः सह कदाचित्तद्धर्मालापनं न कुर्यात्   सामर. २२

साऽम एव सुभिक्षा बभूव तान्प्रतिगृह्य निदधौ	छांदो. १।१०।५
साङ्ख्य एवावबुद्धा ये ते साङ्ख्या योगिनः परे	म. पु. ५।४९
साङ्ख्ययोगौ पृथग्बालाः	भ. गी. ५।४
साङ्ख्यं योगं समभ्यस्येत् पुरुषं पञ्चविंशकम्	निरुक्तो. १।७
साङ्ख्ये कृतान्ते प्रोक्तानि	भ. गी. १८।१३
सा चेदस्मै न दद्यात् काममेनामवक्रीणीयात् , सा चेदस्मै नैव दद्यात्काममेनां यष्ट्या वा पाणिना वोपहत्यातिक्रामेत्	बृह. ६।४।७
सा चेदस्मै दद्यादिन्द्रियेण ते यशसा यश आददामीति	बृह. ६।४।८
सा चैवाग्निः, सा च सूर्यः, सा वायुः, सा च चन्द्रमाः	गुह्यका. ५२
सा जीवन्मुक्ततोदेति स्वरूपानन्ददायिनी	महो. ४।३८
साज्यं हविरनामयं मोदमिति शिखां यज्ञोपवीतं पितरं पुत्रं कलत्रं कर्म चाध्ययनं मन्त्रान्तरं विसृज्यैव परिव्रजत्यात्मवित्	ना. प. ३।७७
सा तु (सुषुम्ना) मूलाधारादारभ्य ब्रह्मरन्ध्रगामिनी भवति	अद्वयता. २
सा त्वं वीरवती भव याऽस्मान् वीरवतोऽकरत्	बृह. ६।४।२८
सात्यकिश्चापराजितः	भ. गी. १।१७
सा त्याज्या सर्वयत्नेन सर्वनाशेऽप्युपस्थिते । स्प्रष्टव्या सा न भव्येन सश्वमांसेव पुल्कसी	ना. प. ३।५०
सा त्रिविधा व्याप्य तिष्ठति (माया)	सामर. ९८
सात्त्विकत्वात् समष्टित्वात् साक्षित्वाज्जगतामपि । जगत्कर्तुमकर्तुं वा चान्यथा कर्तुमीशते...	सरस्व. ४०
सात्त्विकमायात्मको विष्णुः	पा. ब्र. २
सात्त्विक-राजस-तामस-लक्षणानि त्रयो गुणाः	शारीरको. ५
सात्त्विकं निर्मलं फलम्	भ. गी. १४।१६
सात्त्विकं परिचक्षते	भ. गी. १७।१७
सात्त्विकांशेन जायन्ते कर्मण्या द्रव्यसम्पदः । रजस्तमः–स्वरूपेण भावा यज्ञबहिष्कृताः	भवसं. ४।७
सात्त्विकी ज्ञानशक्तिः । राजसी क्रियाशक्तिः । तामसी द्रव्यशक्तिः	ग. शो. ४।३
सात्त्विकी राजसी चैव	भ. गी. १७।२
सात्त्विकोऽस्मि सदाऽस्म्यहम्	मैत्रे. ३।६
सात्त्विकया दिशो वायुःसूर्योवरुणोऽश्विनाविति ज्ञानेन्द्रियदेवताः	गणेशो. ४।४
सार्धकार्णद्वयं रामो रमन्ते यत्र योगिनः	रामर. ५।४
सा देवी त्रिधा भवति, शक्त्यासना इच्छाशक्तिः क्रियाशक्तिः साक्षाच्छक्तिरिति	सीतो. ६
साधकः साधयेत्सर्वमिह लोके परत्र च	सूर्यता. ६।३
साधनचतुष्टयसम्पन्नः सन्न्यस्तुमर्हति	ना. प. २।१
साधनचतुष्टयसम्पन्नः सर्वसंसारोपरि मनोवाकायकर्मभिर्यथाशानिवृत्तः	ना. प. १।१
साधनचतुष्टयसम्पन्नो यः सन्न्यस्यति स एव ज्ञानसन्न्यासी	१ सं. सो. २।१३
साधनसम्पन्न एव सन्न्यस्तुमर्हति	१ सं. सो. २।१
साधनं प्रभवेत्पुंसां वैराग्यादि-चतुष्टयम्	वराहो. २।२
साधयन् वज्रकुम्भानि नव द्वाराणि बन्धयेत्	ब्र. वि. ७५
साधवो दीनवत्सला यत्रासते	सामर. ३७
साधिभूताधिदैवं मां	भ. गी. ७।३०
साधियज्ञं च ये विदुः	भ. गी. ७।३०
साधुकारी साधुर्भवति	बृह. ४।४।५
साधुत्वे नियोगं सुलभं पवित्रं सुलभं सुकरं तद्विष्णुक्षेत्रं	नारदो. १
साधुनैनमुपागादित्येव वदाहुः	छांदो. २।१।२
साधुभिः पूज्यमानोऽस्मिन् पीड्यमानेऽपि दुर्जनैः । समभावो भवेद्यस्य स जीवन्मुक्त इष्यते	अध्यात्मो. ४७
साधुरेव स मन्तव्यः	भ. गी. ९।३०

साधुवेशं समाश्रित्य जीवन्ति बहवो नराः । नरके रौरवे घोरे कर्मत्यागात्पतन्ति ते भवसं. १।५४

साध्या उत्तरत उदन्ति तपन्ति वर्षन्ति स्तुवन्ति मैत्रा. ७।४

साधुष्वपि च पापेषु भ. गी. ६।९

साध्यानामेव तावदाधिपत्यं स्वाराज्यं पर्येता छांदो. ३।१०।४

ततस्तेन रोममात्रं समुच्छिनेत् योगकुं. २।२९
स्नेहप्रणयगर्भाणि पेशलान्युचितानि
च । देशकालोपपन्नानि
वचनान्यभिभाषते अक्ष्युप. १०
स्नेहः स्नेहेन भवति सामर. ९५
स्नेहो यथा पललपिण्डं शान्तमूल-
मोतं प्रोतमनु व्याप्तं व्यति-
षिक्तो व्याप्यते व्यापयते... नृ. पू. २।६
स्पन्दाच्च फलसम्प्राप्तिस्तस्माद्दैवं
निरर्थकम् भवसं. १।४४
स्पर्शनेन्द्रियसंस्पर्शः स्पर्शो मानस
एव च । द्विविधः सुखदुःखानां
वेदनानां प्रवर्तकः आयुर्वे. ४५
स्पर्शयति सर्वमात्मा जानीत मैत्रा. ६।७
स्पर्शयितव्यमेवाप्येति यः
स्पर्शयितव्यमेवास्तमेति सुबालो. ९।५

स्पर्शवान्वायुः स्पर्शवायुभ्यां भिन्नः गोपालो. १।४
स्पर्शे सर्वमसत्सदा ते. बिं. ३।५७
स्पर्शं रूपं रसं गन्धं कोशाः पञ्च
मनोभवाः । जाग्रत्स्वप्नसुषु-
प्त्यादि मनोमयमितीरितम् ते. बिं. ५।१०३
स्पर्शान् कृत्वा बहिर्बाह्यान् भ. गी. ५।२७
स्पृहां गोमांसमिव...कारागृह-
विनिर्मुक्तचोरवत्पुत्राप्तबन्धुभव-
स्थलं विहाय दूरतो वसेत् ना. प. ७।१
स्प्रष्टव्या सा न भव्येन स-
श्वमांसेव पुल्कसी (अहंता) ना. प. ३।५१
स्फटिकरजतवर्णं मौक्तिकीमक्ष-
मालाममृतकलशविद्यां ज्ञान-
मुद्रां कराग्रे । दधतमुरगकक्ष्यं
चन्द्रचूडं त्रिनेत्रं विधृतविविध-
भूषं दक्षिणामूर्तिमीडे द. मू. ४
स्फटिकः प्रतिबिम्बेन यथा नायाति
रञ्जनम् । तज्ज्ञः कर्मफलेना-
न्तस्तथा नायाति रञ्जनम् अ. पू. ५।९८
स्फुरत्प्रज्वलसज्ज्वालापूज्यमादित्य-
मण्डलम् । ध्यात्वा हृदि स्थितं
योगी प्राणायामे सुखी भवेत् यो. चू. ९७
स्फुरत्यात्मनिरात्मैव चित्तै-
रब्धीव वीचिभिः अ. पू. २।४१
स्फुरन्ति हि न भोगाशा
मृगतृष्णासरस्स्वपि महो. ३।५६
स्मरन् मुक्त्वा कलेवरम् भ. गी. ८।५
स्मरन्नारायणं देवं चतुर्बाहुं किरी-
टिनम् । शुद्धस्फटिकसङ्काशं
पीतवाससमच्युतम् ।। धारयेत्
पञ्च घटिकाः सर्वपापैः प्रमुच्यते १ यो. त. ८९
स्मराद्वाव भूयोऽस्तीति तन्मे
भगवान्ब्रवीतु छांदो. ७।१३।२
स्मरेण वै पुत्रान्विजानाति, स्मरेण
पशून् , स्मरमुपास्स्वेति छांदो. ७।१३।१
स्मरो वावाकाशाद्भूयस्तस्माद्य-
द्यपि बहव आसीरन्नस्मरन्तो
नैव ते कञ्चन शृणुयुः.. छांदो. ७।१३।१

स्मरो वै आकाशाद्भूयान्–(मा.पा.) छां.उ. ७।१३।१
स्मशाने अनाहताङ्गी निर्वाणो. ६
स्मृतिभ्रंशाद्बुद्धिनाशः भ.गी. २।६३
स्मृतिर्जायते पुरुषोत्तमात् सि. वि. २
स्मृतिर्दया क्षान्तिरहिंसा पत्नी
संयाजाः प्रा. हो. ४।३
स्मृतिर्मेधा धृतिः क्षमा भ. गी. १०।३४
स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः छांदो. ७।२६।२
स्मृतिः सत्सेवनाद्यैश्च धृत्यन्तै-
रुपलभ्यते । स्मृत्या स्वभावं
भावानां स्मरन् दुःखात्
प्रमुच्यते आयुर्वे. १९
स्मृतेनापिहिता गुहा, शमेनापि-
हिता गुहा इतिहा. १६
स्मृत्या स्मार॒ स्मारेण विज्ञानं
विज्ञानेनात्मानं वेदयति महाना. १७।१३
स्यातां हिमाद्रिकैलासौ तस्या
देव्यास्तु कुण्डले । स्वर्लोकश्च
भुवर्लोको देव्या ओष्ठाधरौ मतौ गुह्यका. १३
स्यां न्वहं तेनामृताऽऽहो ३ बृह. ४।५।३
स्योनापृथिवि(नो) भवा नृक्षरा
निवेशनी । यच्छा नः शर्म
सप्रथाः [महाना.५।६+ प्रकर्या. १३
[+ऋ.मं.१।२२।१५+वा.सं. ३५।२१+३६ १३
स्योनेन मे सन्तिष्ठस्व महाना. १६।२१
स्रवस्यामघटाम्बुवत् (ज्ञानं) शाट्याय. ३६
स्रष्टुकामो जगद्योनिस्तमोगुण-
मधिष्ठाय सूक्ष्मतन्मात्राणि
भूतानि स्थूलीकर्तुं सोऽकामयत पैङ्गलो. १।४
स्रामे स्रामः परिवृक्णे परिवृक्णः छांदो. ८।९।१
स्रुतो मया वरदेति विसृज्योदीरणा
त्त सूर्यस्यावृत्तमसम्पश्य पुरस्ता-
दस्मात्कोशादिति यथार्थमुपतिष्ठते संध्यो. ३
स्रुवेण वा चमसेन वा कंसेन वैता
आहुतीर्जुहोति कौ. उ. २।३
स्रोतसा नीयते दारु यथा निम्नोन्नत-
स्थलम् । दैवेन नीयते देहो
तथा कालोपभुक्तिषु २ आत्मो. १८
स्रोतसामपि जाह्नवी भ. गी. १०।३०

स्वकर्मणा तमभ्यर्च्य भ. गी. १८।४६
स्वकर्मनिरतः सिद्धिं भ. गी. १८।४५
स्वकं रूपं दर्शयामास भूयः भ. गी. ११।५०
स्वकायं घटमित्युक्तं यथा जीवो
(दीपो) हि तत्पदम् । गुरुवाक्य-
समाभिन्ने ब्रह्मज्ञानं प्रकाशते
(स्फुटीभवेत्)[यो.शि.६।७८+ योगकु. ३।१६
स्वकुलानुरूपामभिमतकन्यां
विवाह्य...साधनचतुष्टय-
सम्पन्नः सन्न्यस्तुमर्हति ना. प. २।१
स्वगतं च न मे किञ्चिन्न मे
भेदत्रयं क्वचित् ते. बिं. ३।४७
स्वगमननिरोधग्रहणं न कुर्यात् ना. प. ७।१
स्वगृह्योक्तविधानेन प्रतिष्ठा-
प्याग्निमीजयेत् बृ. जा. १।११
स्वचित्तबिलसंस्थेन नानाविभ्रम-
कारिणा । बलात्कामपिशाचेन
विवशः परिभूयते महो. ३।३४
स्वचैतन्ये स्वयं स्थास्ये स्वात्मराज्ये
सुखे रमे । स्वात्मसिंहासने
स्थित्वा स्वात्मनोऽन्यन्न चिन्तये ते. बिं. ३।२५
स्वच्छतोर्जितता सत्ता हृद्यता
सत्यता ज्ञता १ सं. सो. २।५६
स्वच्छं स्वतःसिद्धमित्याचमनीयम् भावनो. ८
स्वच्छं विभाति शरदीव खमाग-
तायां चिन्मात्रमेकमजमा-
द्यमनन्तमन्तः महो. ५।५३
स्वच्छं निराकारमसङ्गमद्भुतम् १ बिल्वो. ११
स्वजनं हि कथं हत्वा भ. गी. १।३७
स्वज्ञोऽपि यत्प्रसादेन ज्ञानं तत्फल-
माप्नुयात् । सोऽयं हयास्यो
भगवान्हृदि मे भातु सर्वदा हयग्री. शीर्षकं
स्वतः पूर्णः परात्माऽत्र ब्रह्मशब्देन
वर्णितः शु. र. ३।४
स्वतः शिवः पशुपतिः साक्षी
सर्वस्य सर्वदा पा. ब्र. १२
स्वव्यतिरिक्तं सर्वं त्यक्त्वा मधुकर-
वृत्त्याऽऽहारमाहरन्कृशीभूत्वा
मेदोवृद्धिमकुर्वन्विहरेत् १ सं.सो. २।५९

स्वतेजसा विश्वमिदं तपन्तम् भ. गी. ११।१९
स्वतो वा परतो वाऽपि न किञ्चि-
द्वस्तु जायते। सदसत्सदस-
द्वापि न किञ्चिद्वस्तु जायते अ. शां. २२
स्वदारनिरत ऋतुकालाभिगामी
सदा परदारवर्जी प्राजापत्यः आश्रमो. १
स्वदेशमुत्सृज्य ज्ञातचरदेशं
विहाय विस्मृतपदार्थं पुनः
प्राप्तहर्ष इव...विहाय
दूरतो वसेत् ना. प. ७।१
स्वदेहमरणिं कृत्वा प्रणवं चोत्तरा-
रणिम्। ध्याननिर्मथनाभ्यासा-
देवं पश्येन्निगूढवत् श्वेताश्व. १।१४
स्वदेहमलनिर्मोक्षो मृज्जलाभ्यां
महामुने। यत्तच्छौचं भवेद्बाह्यं
मानसं मननं विदुः जा. द. १।२०
स्वदेहस्य तु मूर्धानं ये प्राप्य परमां
गतिम्। भूयस्ते न निवर्तन्ते
परावरविदो जनाः कुण्डिको. २२
स्वदेहाशुचिगन्धेन न विरज्येत यः
पुमान्। विरागकारणं तस्य
किमन्यदुपदिश्यते मुक्तिको. २।६६
स्वदेहे यो न जानाति तस्य सिद्धिः
कथं भवेत्। षट्चक्रं षोडशाधारं
त्रिलक्ष्यं व्योमपञ्चकम् यो. चू. ४
स्वधर्म एव सर्वे धत्ते मैत्रा. ४।३
स्वधर्ममपि चावेक्ष्य भ. गी. २।३१
स्वधर्मे निधनं श्रेयः भ. गी. ३।३५
स्वधाऽहमहमौषधम् भ. गी. ९।१६
स्वधां पितृभ्यः, आशां मनुष्येभ्यः,
तृणोदकं पशुभ्यः छांदो. २।२२।२
स्वधेति पितरः (उपासते) मुद्गलो. ३।२
स्वपूर्णात्मातिरेकेण जगज्जीवेश्व-
रादयः। न सन्ति नास्ति माया
च तेभ्यश्चाहं विलक्षणः वराहो. २।११
स्वपूर्वापन्नाश्रमाचारविद्याधर्म-
प्राग्भवमननुस्मरंस्त्यक्त-
वर्णाश्रमाचारः...प्रणवात्मकेन
देहत्यागं करोति यः सोऽवधूतः तुरीया. ३
स्वपौरुषैकसाध्येन स्वेप्सितत्याग-
रूपिणा। मनःप्रशममात्रेण
विना नास्ति शुभा गतिः महो. ४।९०
स्वप्न इव मिथ्यादर्शनम् (पुण्यापुण्यं) मैत्रा. ४।२
स्वप्न इव यः पश्यतीन्द्रियबिले मैत्रा. ६।२५
स्वप्नजगद्भ्रगजादितुल्यम् निर्वाणो. ३
स्वप्नजागरणोपेता जन्तवो जागृतिं
गताः। योगिनस्तत्स्वसम्पन्ना
न जाग्रति न शेरते अमन. २।५९
स्वप्नजागरिते स्थाने ह्येकमाहुर्मनी-
षिणः। भेदानां हि समत्वेन
प्रसिद्धेनैव कर्मणा वैतथ्य. ५
स्वप्नजाग्रदिति प्रोक्तं जाग्रत्यपि
परिस्फुरत्...सौषुप्तिःसोच्यतेगतिः महो. ५।१८
स्वप्नदृक्चित्तदृश्यास्ते न विद्यन्ते
ततः पृथक्। तथा तद्दृश्यमेवेदं
स्वप्नदृक्चित्तमिष्यते अ. शां. ६४
स्वप्नदृक्प्रचरन्स्वप्ने दिक्षु वै दशसु
स्थितान्। अण्डजान्स्वेदजान्वा-
ऽपि जीवान्पश्यति यान्सदा अ. शां. ६३
स्वप्नदृष्टं च यद्वस्तु जागरे चज्जग-
द्भवेत्। नदीवेगो निश्चलश्चेत्
केनापीदं भवेज्जगत् ते. बिं. ६।८८
स्वप्नदेहो यथाऽध्यस्तस्तथैवायं
हि देहकः ना. बिं. २४
स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्न-
निद्रया। न निद्रां नैव च
स्वप्नं तुर्ये पश्यन्ति निश्चिताः आगम. १४
स्वप्नमाये यथा दृष्टे गन्धर्वनगरं
यथा। तथा विश्वमिदं
दृष्टं वेदान्तेषु विचक्षणैः वैतथ्य. ३१
स्वप्नवृत्तावपि त्वन्तश्चेतसा
कल्पितं त्वसत् वैतथ्य. ९
स्वप्नस्थ-राज्यभिक्षाभ्यां प्रबुद्धः
स्पृशते खलु वराहो. २।५८
स्वप्नस्थानश्चतुरात्मा तैजसो
हिरण्यगर्भश्चतूरूप उकार एव नृसिंहो. २।५

स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रोत्कर्षादुभयत्वाद्वोत्कर्षति ह वै ज्ञानसन्तर्ति समानश्च भवति — माण्डू. १०

स्वप्नस्थानः सूक्ष्मप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः सूक्ष्मभुक् चतुरात्मा तैजसो हिरण्यगर्भो द्वितीयः पादः — नृसिंहो. १।३

स्वप्नस्थानेऽनन्तः संज्ञासप्ताङ्ग एकोनविंशतिमुखः प्रविभक्तोऽभूत् — श्रीवि. ता. २।१

स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्त-भुक् तैजसो द्वितीयः पादः — माण्डू. ४
[+ रामो. ता.२।२+ — ग.शो. १।२

स्वप्नस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्त-भुक् तैजसो द्वितीयः पादः — नृ. पू. ४।२

स्वप्नान्त उच्चावचमीयमानो रूपाणि देवः कुरुते बहूनि — बृह. ४।३।१३

स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति । महान्तं विभु-मात्मानं मत्वा धीरो न शोचति — कठो. ४।४

स्वप्नावस्थायां तैजसस्य चातुर्विध्यं तैजसविश्वस्तैजसतैजसस्तैजस-प्राज्ञस्तैजसतुरीय इति — प. हं. प. ९

स्वप्ने चावस्तुकः कायः पृथगन्यस्य दर्शनात् । यथा कायस्तथा सर्वं चित्तदृश्यमवस्तुकम् — अ. शां. ३६

स्वप्ने चिदंशशून्यत्वं जागरे विषयग्रहः । स्वप्नजागरणा-तीता अतस्तत्त्वं विदुर्बुधाः — अमन. २।६०

स्वप्ने जागरितं नास्ति जागरे स्वप्नता नहि । द्वयमेव लये नास्ति लयोऽपि ह्यनयोर्न च — यो. शि. ४।११

स्वप्नेन शारीरमभिप्रहत्याऽसुप्तः सुप्तानभिचाकशीति — बृह. ४।३।११

स्वप्नेऽपि यो हि युक्तः स्याज्जाग्रतीव विशेषतः । ईदृक्चेष्टः स्मृतः श्रेष्ठो वरिष्ठो ब्रह्मवादिनाम् — ना. प. ५।१६

स्वप्ने स जीवः सुखदुःखभोक्ता स्वमायया कल्पितजीवलोके । सुषुप्तिकाले सकले विलीने तमोभिभूतः सुखरूपमेति — कैव. १३

स्वप्रकाशचिदानन्दं स हंस इति गीयते — ब्र. वि. २१

स्वप्रकाशब्रह्मतत्त्वे शिवशक्ति-सम्पुटितप्रपञ्चच्छेदनम् — निर्वाणो. ५

स्वप्रकाशमधिष्ठानं स्वयम्भूय सदात्मना । ब्रह्माण्डमपि पिण्डाण्डं त्यजतां मलभाण्डवत् — अध्यात्मो. ८

स्वप्रकाशं तमात्मानमप्रकाशः कथं स्पृशेत् — वराहो. २।९

स्वप्रकाशं विश्वेश्वराभिधं पातालमधितिष्ठति — भस्मजा. २।१०

स्वप्रकाशः परं ज्योतिः स्वानु-भूत्यैकचिन्मयः । तदेव राम-चन्द्रस्य मनोराद्यक्षरः स्मृतः — रामो. ५।१

स्वप्रकाशापरोक्षत्वमयमित्युक्तितो मतम् । अहङ्कारादिदेहान्तं प्रत्यगात्मेति गीयते — शु. र. ३।७

स्वप्रकाशे निरानन्दे तमो मूढस्य जायते — आ. प्र. २६

स्वप्रकाशैकसंसिद्धे नास्ति माया परात्मनि । व्यावहारिकदृष्ट्येयं विद्याविद्या न चान्यथा — पा. ब्र. २३

स्वप्रकाशोऽन्यविषयज्ञानत्वाज्ज्ञान-त्वेन ह्यन्यत्रान्यत्र विजानाति — नृसिंहो. ९।१

स्वप्रकाशोऽस्मि चिद्घनः — ब्र. वि. १०९

स्वप्रभं सच्चिदानन्दं भक्त्या जानाति चाव्ययम् — वासुदे. ८

स्वभावजेन कौन्तेय — भ. गी. १८।६०

स्वभावनियतं कर्म — भ. गी. १८।४७

स्वभावप्रभवैर्गुणैः — भ. गी. १८।४१

स्वभावमेके कवयो वदन्ति कालं तथाऽन्ये परिमुह्यमानाः । देवस्यैष महिमा तु लोके येनेदं भ्राम्यते ब्रह्मचक्रम् — श्वेताश्व. ६।१

स्वभावस्तु प्रवर्तते — भ. गी. ५।१४

स्वभावं भावसङ्ग्राह्यमसङ्घातं पदाच्युतम् ते. बिं. १।७

स्वभावेनामृतो यस्य भावो (धर्मो) गच्छति मर्त्यताम् । कृतके-नामृतस्तस्य कथं स्थास्यति निश्चलः [अद्वैत. २२+ अ. शां. ८

स्वभावोऽध्यात्ममुच्यते भ. गी. ८।३

स्वमसङ्गमुदासीनं परिज्ञाय नभो यथा । न श्लिष्यते यतिः किञ्चित्कदाचिद्भाविकर्मभिः अध्यात्मो. ५१

स्वमात्मनि स्वयं तृप्तः स्वमात्मानं स्वयं चर । आत्मानमेव मोदस्व वैदेहीमुक्तिको भव ते. बिं. ४।८१

स्वमानन्दमनुस्मरन् स्वशरीरा-भिमानदेशविस्मरणं मत्वा... दृग्तो वसेत् (यतिः) ना. प. ७।१

स्वमायावैभवान्सर्वान्संहृत्य स्वात्मनि स्थितः । पञ्चब्रह्मात्मकातीतो भासते स्वस्वतेजसा पञ्चब्र. १७

स्वमुखेन सदा-(समा-) वेष्ट्य ब्रह्मरन्ध्रमुखं मुने । सुषुम्नाया इडा सव्ये दक्षिणे पिङ्गला स्थिता जा. द. ३।१३

स्वमेव सर्वतः पश्यन्मन्यमानः स्वमद्वयम् । स्वानन्दमनु-भुञ्जानो निर्विकल्पो भवाम्यहम् कुण्डिको. २७

स्वयञ्ज्योतिर्ब्रह्माकाशः सर्वदा विराजते परं ब्रह्मत्वात् ना. प. ८।२४

स्वयञ्ज्योतिः प्रकाशः सर्ववेद्यः सर्वज्ञः सर्वसिद्धिः सर्वेश्वरः सोऽहमिति ना. प. ९।२२

स्वयमनिन्द्रियोऽपि सर्वतः पश्यति सर्वतः शृणोति सर्वतो गच्छति सर्वतश्चादत्ते सर्वगः सर्वगतस्तिष्ठति नृ. पू. २।८

स्वयमनुभूयत एव देवदेवः अ- पू. १।५५

स्वयममनस्कमश्रोत्रमपाणिपादं ज्योतिर्विवर्जितम् ब्रह्मो. ३

स्वयमवतीर्णो ह्ययमात्मा ब्रह्म सोऽहमात्मा चतुष्पात् ग. शो. ५।६

स्वयमादिः सर्वान्तरात्मा देवस्य स्वयं क्रीडात्मकमवासृजत् । यः स्वयं लोकमवधारमवधारयन्स्वाहा पारमा. ६।१

स्वयमिन्द्रः स्वयं शिवः अध्यात्मो. २०

स्वयमीश्वरः स्वयम्प्रकाशश्चतुरात्मो-तानुज्ञात्रनुज्ञाविकल्पैरोतो ह्ययमात्मा नृसिंहो. २।७

स्वयमुच्चलिते देहे देही नित्य-समाधिना । निश्चलं तं वि-जानीयात्समाधिरभिधीयते सौभाग्य. २२

स्वयमेव कृतं द्वारं रुद्राक्षं स्यादिहोत्तमम् रु. जा. १२

स्वयमेव तु सम्पश्येद्देहे बिन्दुं च निष्कलम् ब्र. वि. ५४

स्वयमेव त्वया ज्ञातं गुरुतश्च पुनः श्रुतम् । स्वसङ्कल्पवशाद्बद्धो निःसङ्कल्पाद्विमुच्यते महो. २।७०

स्वयमेव परं ब्रह्म पूर्णमद्वयमक्रियम् अध्यात्मो. २१

स्वयमेव प्रजायन्ते लाभालाभ-विवर्जिते । योगमार्गे तथैवेदं सिद्धिजालं प्रवर्तते यो.शि. १।१५७

स्वयमेव मया पूर्वमभिज्ञातं विशेषतः । एतदेव हि पृष्टेन पित्रा मे समुदाहृतम् महो. २।३२

स्वयमेव सच्चिदानन्दस्वरूपो भवेन्न किम् रामर. १।९

स्वयमेव सौमित्रिरैक्ष्वाके वंशे जायमानो रक्षांसि सर्वाणि वि-निघ्नंश्चातुर्वर्ण्यधर्मान्प्रवर्तयति सङ्कर्षणो. २

स्वयमेव स्वयं भामि स्वयमेव सदात्मकः । स्वयमेवात्मनि स्वस्थः स्वयमेव परा गतिः ते. बिं. ३।२२

स्वयमेव स्वयं भुञ्जे स्वयमेव स्वयं रमे । स्वयमेव स्वय-ञ्ज्योतिः स्वयमेव स्वयं महः ते. बिं. ३।२३

स्वयमेव स्वयं हंसः...स्वात्मानन्दं.. स जीवन्मुक्त उच्यते ते. बिं. ४।३१

स्वयमेवाऽऽत्मनाऽऽत्मानमानन्दं पदमाप्स्यसि महो. ६।७८

स्वयमेवाऽऽत्मनाऽऽत्मानं भ. गी. १०।१५

स्वयमेवात्मनि स्वस्थः स्वयमेव
 परा गतिः — ते. बि. ३।२२
स्वयमेवैकवीरोऽग्रे स्वयमेव प्रभुः
 स्मृतः । स्वस्वरूपे स्वयं स्वप्स्ये-
 स्स जीवन्मुक्त उच्यते — ते. बि. ४।३२
स्वयम्प्रकाशमनिशं ज्वलति — त्रि. म. ना. ७।७
स्वयम्प्रकाशः स्वयं ब्रह्म भवति — ब्र. शिखो. ३
स्वयं कल्पिततन्मात्रा जालाभ्य-
 न्तरवर्ति च । परां विवशतामेति
 शृङ्खलाबद्धसिंहवत् — महो. ५।१२९
स्वयं गुणभिन्नाऽङ्कुरेष्वपि गुणभिन्ना
 (माया) सर्वत्र.. — नृसिंहो. ९।३
स्वयं चैव ब्रवीषि मे — भ. गी. १०।१३
स्वयंज्योतिर्ब्रह्माकाशः सर्वदा विराजते — ना. प. ८।२३
स्वयं तस्मात्पशुपतिर्बभूव — शरभो. १३
स्वयं दाता स्वयं भोक्ता स्वयं
 देवो महेश्वरः । निर्विकल्पं
 स्वयं ब्रह्म तस्याहं पञ्चमाश्रयः — २ तस्वो. ८
स्वयं धीराः पण्डितं मन्यमानाः ।
 दन्द्रम्यमाणाः (जङ्घन्यमानाः)
 परियन्ति मूढा अन्धेनेव नीय-
 माना यथान्धाः [कठो. २।५+ — मुण्ड. २।८
स्वयं निर्विकल्पमशेषकल्पाधार-
 मशेषभूतान्तर्यामित्वेन...दम्भा-
 हङ्कारादिभिरसंस्पृष्टचेता वर्तत
 एवमुक्तलक्षणो यः स एव
 ब्राह्मण इति — व. सू. ९
स्वयं प्रकाशिते तत्त्वे तत्क्षणा-
 त्तन्मयो भवेत् — अमन. २।५४
स्वयं ब्रह्म न सन्देहः स्वस्मादन्यन्न
 किञ्चन । सर्वमात्मैव शुद्धात्मा
 सर्वं चिन्मात्रमद्वयम् — ते. बि. ६।३९
स्वयं प्रकाशिते तत्त्वे स्वानन्द-
 स्तत्क्षणाद्भवेत् — अमन. २।५१
स्वयं ब्रह्मात्मकं विद्धि स्वस्मा-
 दन्यन्न किञ्चन — ते. बि. ६।५२
स्वयं ब्रह्मा स्वयं विष्णुः स्वयमिन्द्रः
 स्वयं शिवः । स्वयं विश्वमिदं
 सर्वं स्वस्मादन्यन्न किञ्चन — अध्यात्मो. २०
स्वयं भातं निराधारं ये जानन्ति
 सुनिश्चितम् । ते हि विज्ञान-
 सम्पन्ना इति मे निश्चिता मतिः — वराहो. २।१०
स्वयंभानः पर एको ज्योतिरेव.. — २ कठ्रो. ६२
स्वयं मृत्वा स्वयं भूत्वा स्वयमेवा-
 वशिष्यते — कठरु. ४६
स्वयं यतः कुतश्च न बिभेति — नृ. पू. २।१०
स्वयं विहत्य स्वयं निर्माय स्वेन
 भासा स्वेन ज्योतिषा प्रस्व-
 पित्यत्रायं पुरुष स्वयञ्ज्योतिर्भवति — बृह. ४।३।९
स्वयैव सूक्ष्मया बुद्ध्या स्वयं
 विज्ञातवाञ्छुकः — महो. २।१२
स्वयोनावुपशान्तस्य मनसः सत्य-
 (गामिनः) कामतः । इन्द्रियार्थ-
 विमूढस्यानृताः कर्मवशानुगाः
 [मैत्रा. ६।३४+ — मैत्रे. १।९
स्वर इति प्रत्यास्वर इत्यमुं तस्माद्वा
 एतमिममुं चोद्गीथमुपासीत — छांदो. १।३।२
स्वरवतां रथन्तरस्य स्तोभानां
 स्वरवन्तः प्रयोक्तव्या इति — संहितो. २।४
स्वरस्य का गतिरिति प्राण
 इति होवाच — छांदो. १।८।४
स्वरान्वितो दक्षिणपत्रगो हरिः ।
 श्रियासमेतः... — १ बिल्वो. ३
स्वरितलिङ्गविभक्तिवचनानि च — २ प्रणवो. १६
स्वरिति स्वर्गो लोकः स सामवेदः — सन्ध्यो. २०
स्वरित्यस्याः (व्याहृत्याः) शिरः,
 नाभिर्भुवो भूःपादा आदित्यश्चक्षुः — मैत्रा. ६।६
स्वरूपध्यानेन निरालम्बमवलम्ब्य
 स्वात्मनिष्ठानुकूलेन सर्वं
 विस्मृत्य... प्रणवात्मकत्वेन
 देहत्यागं करोति यः सोऽवधूतः — तुरीया. ३
स्वरूपव्याप्तदेहस्य ध्यानं कैवल्य-
 सिद्धिदम् — त्रि. ब्रा. २।१४८
स्वरूपसूर्येऽभ्युदिते स्फुटोक्ते-
 र्गुरोर्महावाक्यपदैः प्रबुद्धः — शु. र. ३।९
स्वरूपाज्ञानमानन्दमयकोशः — पैङ्गलो. २।५
स्वरूपानुसन्धानब्रह्मप्रणवध्यान-
 मार्गेणावहितः सन्न्यासेन देह-

त्यागं करोति स परमहंस-
परिव्राजको भवति — प. हं. प. ८
स्वरूपानुसन्धानव्यतिरिक्तान्य-
शास्त्राभ्यास उष्ट्रकुङ्कुमभार-
वद्व्यर्थः [ना. प. ५।१५+ — १ सं.सो. २।५९
स्वरूपानुसन्धानं कुर्वन्सर्वमनन्य-
बुद्ध्या स्वस्मिन्नेव मुक्तो भवति — ना. प. ५।२१
स्वरूपानुसन्धानेन सर्वप्रपञ्चं
विदित्वा...देहत्यागं करोति
यः सोऽवधूतः — तुरीया. ३
स्वरूपावस्थितिर्मुक्तिस्तद्भ्रंशो-
ऽहन्त्ववेदनम् — महो. ५।२
स्वरेण सन्धयेद्योगमस्वरं
भावयेत्परम् — ब्र. बिं. ७
स्वरेण सर्वाणि व्यञ्जनानि
व्याप्तानि एवं सर्वान्का-
मानवाप्नोति — संहितो. २।३
स्वरेणसँल्लयेद्योगीस्वरं सम्भावयेत्परम् — त्रि. ता. ५।७
स्वर्गकामः प्रतृण्णं उभयकाम
उभयमन्तरेण — ३ ऐत. १।३।२
स्वर्गद्वारमपावृतम् — भ. गी. २।३२
स्वर्गसंस्तावं हि सामेति — छांदो. १।८।५
स्वर्गलोकं गच्छति यस्तथाऽधीते — संहितो. १।१
स्वर्गं लोकं यजमानायाश्रमात्मन
आगायानीत्येतानि मनसा
ध्यायन्नप्रमत्तः स्तुवीत — छांदो. २।२२।२
स्वर्गं वयं लोकं सामाभि-
संस्थापयामः — छांदो. १।८।५
स्वर्गापवर्गयोरेकं यः शीघ्रं न
प्रसाधयेत् । याति तेनैव
देहेन स मृतस्त्यज्यते चिरम् — शिवो. ७।१२०
स्वर्गाल्लोकाच्च्यवतेऽस्माद्धमित्रः — इतिहा. १९
स्वर्गाल्लोकान् कामानवाप्नुहि — कौ. उ. २।१५
स्वर्गे लोके न भयं किञ्चनास्ति — कठो. १।१२
स्वर्ये पर्णाशनादिविचरः पयोभक्षः — संहितो. ४।१
स्वर्णजां रौप्यजां वापि लोहजां
वा शलाकिकाम् । नियोज्य
नासिकारन्ध्रं दुग्धसिक्तेन
तन्तुना ॥ ...षण्मासं मथना-
वस्था भावेनैव प्रजायते — योगकु. २।४४
स्वर्णाभमम्बुजकरां रामालोकन-
तत्पराम्... — रामर. २।९७
स्वर्गो लोको ज्योतिषाऽऽवृतः — अरुणो. १
स्वर्भूर्ज्योतिर्मयोऽनन्तरूपी
स्वेनैव भासते — रा. पू. २।१
स्वर्लोकश्च भुवर्लोको देव्या
ओष्ठाधरौ मतौ — गुह्यका. १३
स्वल्पमप्यन्तरं कृत्वा जीवात्मपर-
मात्मनोः । यस्तिष्ठति विमू-
ढात्मा भयं तस्यापि भाषितम् — यो. शि. ४।८
स्वल्पमप्यस्य धर्मस्य — भ. गी. २।४०
स्वल्पस्पन्दो द्रव्यनिष्ठो रसो
नाहमचेतनः — १सं. सो. २।१७
स्वल्पाऽपि दीपकलिका बहुलं
नाशयेत्तमः । स्वल्पोऽपि बोधो
निबिडं बहुलं नाशयेत्तमः — आ. प्र. २९
स्ववर्णाश्रमधर्मेण तपसा गुरुतोष-
णात् । साधनं प्रभवेत्पुंसां
वैराग्यादिचतुष्टयम् — वराहो. २।२
स्ववपुः कुणपमिव दृश्यते — प. हं. ३
स्ववपुः कुणपाकारमिव पश्यन्...
प्रणवात्मकत्वेन देहत्यागं
करोति यः सोऽवधूतः — तुरीया. ३
स्ववपुः शवाकारमिव स्मृत्वा...
जातरूपधरश्चरेदात्मानमन्विच्छेत् — ना. प. ३।८७
स्ववंशवृद्धिकामः पुत्रमेकमासाद्य
...साधनचतुष्टयसम्पन्नः
सन्न्यस्तुमर्हति — ना. प. २।१
स्वव्यतिरिक्तवस्तुसङ्गरहितं स्मरणं
विभूषणम् — भावनो. ८
स्वव्यतिरिक्तं सर्वमन्तर्बहिरमन्य-
मानः कस्यापि वन्दनमकृत्वा
...जातरूपधरश्चरेदात्मान-
मन्विच्छेत् — ना. प. ३।८७
स्वव्यतिरिक्तं सर्वं कृतकं नश्वरमिति
मत्वा विरक्तः पुरुषः सर्वदा
ब्रह्माहमिति व्यवहरेत् — ना. प. ६।२

स्वव्यतिरिक्तं सर्वं त्यक्त्वा मधुकरवृत्त्याहारमाहरन्कृशो भूत्वा मेदोवृद्धिमकुर्वन्नाज्यं रुधिरमिव त्यजेत् — ना. प. ७।१

स्वशब्देन भवेत्प्राणः स्वाधिष्ठानं तदाश्रयः (म्) [यो. चू. ११+ — ध्या. बि. ४७

स्वशरीरव्यतिरिक्तं सर्वं त्यक्त्वा षट्पदवृत्त्या स्थित्वा स्वरूपानुसन्धानं कुर्वन्सर्वमनन्यबुद्ध्या स्वस्मिन्नेव मुक्तो भवति — ना. प. ९।२१

स्वशरीरं शवमिव हेयमुपगम्य कारागृहविनिर्मुक्तचोरवत् पुत्राप्तबन्धुभवस्थलं विहाय दूरतो वसेत् — ना. प. ७।१

स्वशरीरे यज्ञं परिवर्तयामि — प्रा. हो. २।३

स्वशरीरे यथाकामं परिवर्तते — बृह. २।१।१८

स्वशरीरे स्वयञ्ज्योतिस्स्वरूपं (पारमार्थिकम्) सर्वसाक्षिणम्। क्षीणदोषाः प्रपश्यन्ति, नेतरे मायया़ऽऽवृताः — अ. पू. ४।३६
[पा. ब्र. ३८+ — रुद्रह. ४९

स्वशाखानुगतमंत्रैरष्टश्राद्धान्यष्टदिनेषु — ना. प. ४।३९

स्वशिरश्छेदः सुखनिद्रेव मूकीकरणमाननमुद्रेव वाधिर्यं महानुपचय इदं नावहेलनया भवितव्यमेवं दृढवैराग्याद्बोधो भवति — महो. ४।२६

स्वसङ्कल्पवशाद्बद्धो निःसङ्कल्पाद्विमुच्यते — महो. २।७०

स्वसङ्कल्पे क्षयं याते समतैवावशिष्यते — महो. ६।३

स्वसमानाधिकरणशून्यः स्वसमानाधिकशून्यः...शुद्धो देव एको नारायणः, न द्वितीयोऽस्ति कश्चित् — त्रि.म.ना. १।५

स्वसिद्धान्तव्यवस्थासु द्वैतिनो निश्चिता दृढम्। परस्परं विरुध्यन्ते तैरयं न विरुध्यते — अद्वै. १७

स्वसूहा वै त्वमस्याचार्यहा वै त्वमसि ब्राह्मणहा वै त्वमसीति — छांदो. ७।१५।२

स्वस्ति सर्वजीवेभ्य इत्युक्त्वाऽऽत्मानमनन्यं ध्यायंस्तदूर्ध्वबाहुर्विमुक्तमार्गो भवेत् — कठरु. ४

स्वस्थकर्मणैव चेदात्मश्राद्धं विरजाहोमं कृत्वा...तत्त्वमस्यादिवाक्यार्थस्वरूपानुसन्धानं कुर्वन्नुदीचीं दिशं गच्छेत् — प. हं. प. ९

स्वस्थं शान्तं सनिर्वाणमकथ्यं सुखमुत्तमम्। अजमजेन ज्ञेयेन सर्वज्ञं परिचक्षते — अद्वै. ४७

स्वस्तिक-गोमुख-पद्म-वीर-सिंह-भद्रमुक्तमयूराख्यान्यासनान्यष्टौ — शांडि. १।३।१

स्वस्तिकं गोमुखं पद्मं वीरसिंहासने तथा। भद्रं मुक्तासनं चैव मयूरासनमेव च ॥ सुखासनसमाख्यं च नवमं मुनिपुङ्गव — जा. द. ३।१

स्वस्तिकं नाम-जानूर्वोरन्तरे सम्यक्कृत्वा पादतले उभे। ऋजुकायः समासीनः स्वस्तिकं तत्प्रचक्षते — शांडि. १।३।१

स्वस्तिकासनमास्थाय समाहितमनास्तथा... — जा. द. ६।३२

स्वस्तिको दक्षिणं पादं वामपादं तु कुञ्चिताम्। प्राञ्जलीकृतदोर्युग्मं गरुडं हरिवल्लभम् — गारुडो. १

स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी। वृषेन्द्रः पुर एतु नः स्वस्तिदा अभयङ्करः — वनदु. १५४
[महाना. ५।२+१३।१७+ — अथर्व. १।२१।१
[ऋ. मं. १०।१५२।२+
तै. आ. १०।१।९

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु [छां. पा. — म. ना. ५।३
[+ऋ.मं.१।८९।६+वा.वे. — २।१२।२५
[+वा. सं. २५।१९+ — तै. आ. १।१।१

स्वस्ति नो मघवा करोतु हन्तु
पाप्मानं योऽस्मान्द्वेष्टि   महाना. ५।९
[तै. सं. १।४।४१+तै. आ.   १०।१।११
स्वस्ति नो मिमीतामश्विना भगः   महाना.
[+ऋ. मं. ५.५१।११
स्वस्ति वः पाराय तमसः परस्तात्   मुण्ड. २।२६
स्वस्ति सर्वजीवेभ्य इत्युक्त्वा
दीक्षामुपेयात्   कठश्रु. २२
स्वस्ति सर्वजीवेभ्य इत्युक्त्वा-
ऽऽत्मानमनन्यं ध्यायंस्त-
दूर्ध्वबाहुर्विमुक्तमार्गो भवेत्   कठरु. ४
स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः   भ. गी. ११।२१
स्वस्मिन्विलीनं सकलं जगदा-
विर्भावयति (प्रकृतिः)   पैङ्गलो. १।२
स्वस्यात्मनि स्वयं रंस्ये स्वात्मन्येव
विलोकये । स्वात्मन्येव सुखा-
सीनः स्वात्ममात्रावशेषकः   ते. बिं. ३।२४
स्वस्वरूपतया सर्वं वेद स्वानु-
भवेन यः । स धीरः स तु
विज्ञेयः सोऽहं तत्त्वं ऋभो भव   वराहो. २।३०
[अमात्रमिति च–] स्वस्वरूप-
व्यतिरिक्तमायामयबुद्धी-
न्द्रियगोचर-जगत्सत्यत्व-
चिन्तनममात्रम्   निरा. ११
स्वस्वरूपज्ञः परिव्राट् परिव्राडे-
काकी चरति भयत्रस्तसारङ्ग-
वत्तिष्ठति   ना. प. ९।२१
स्वस्वरूपं तु चिन्मात्रं सर्वदा
सर्वदेहिनाम् । नैव देहादि-
सङ्घातो घटवद्दृष्टिगोचरः   वराहो. २।२४
स्वस्वरूपं स्वयं भुङ्क्ते नास्ति
भोज्यं पृथक्स्वतः   वराहो. २।२६
स्वस्वरूपानुसन्धानान्नृत्यन्तं सर्व-
साक्षिणम् । मुहूर्तं चिन्तयेन्मां
यः सर्वबन्धैः प्रमुच्यते   वराहो. २।३२
स्वस्वेतरद्वितीयांशैः पञ्चधा
संयोज्य पञ्चीकृतभूतैरनन्त-
कोटिब्रह्माण्डानि   पैङ्गलो. १।४

स्वहृदि चैतन्ये तिष्ठति
त्रिविधं ब्रह्म   परब्रह्मो. ७
स्वंस्वं विषयमुद्दिश्य प्रवर्तन्ते
निरन्तरम् । प्रवर्तकत्वं
चाप्यस्य मायया, न स्वभावतः   पा. ब्र. १५
स्वंरूपं ध्यायन्पुनः पृथक् प्रणव-
व्याहृतिपूर्वकं...तत्त्वमस्यादि-
वाक्यार्थस्वरूपानुसन्धानं
कुर्वन्नुदीचीं दिशं गच्छेत्   प. हं. प. ५
स्वꣳ ह्यपीतो भवति   छांदो. ६।८।१
स्वः पश्यन्त उत्तरम्   छांदो. ३।१७।७
स्वः स्वाहेत्यग्नौ हुत्वा मन्थे
सꣳस्रवमवनयति   बृह. ६।३।३
स्वः प्रपद्येऽमुनाऽमुनाऽमुना   छांदो. ३।१५।३
स्वाचामे तनुवं पिप्रयस्वास्मभ्यं
च सौभगमायजस्व[म.ना.६।१८   ऋ.मं.८।१०।१०
[+अथर्व.६।११०।१+   तै.आ. १०।२।१
स्वाजीका गुप्तयो गुप्तिः सत्त्वं
सत्त्वानां(सत्यं सत्यानां)सात्त्वं-
पदं तत्सत्त्वं सत्त्वमासीत् सात्त्वं
सात्त्वं वै सत्त्वमादध्यानाय स्वाहा   पारमा. ४।८
स्वाज्ञानासुरराट्प्रासस्वज्ञान-
नरकेसरी । प्रतियोगिविनि-
र्मुक्तं ब्रह्ममात्रं करोतु माम्   अव्यक्तो. शीर्षकं
स्वात्मनि व्योमनि स्वस्थे
जगदुन्मेषचित्रकृत्   महो. २।६
स्वात्मनिष्ठानुकूलेन सर्वं विस्मृत्य
तुरीयातीतावधूतवेषेणाद्वैत-
निष्ठापरः प्रणवात्मकत्वेन देह-
त्यागं करोति यः सोऽवधूतः   तुरीया. ३
स्वात्मनि स्वपरिस्पन्दैः
स्फुरत्यच्छैश्चिदर्णवः   महो. ५।११७
स्वात्मनैव सदा तुष्टः स्वयं सर्वात्म-
ना स्थितः । निर्धनोऽपि सदा
तुष्टोऽप्यसहायो महाबलः   २ आत्मो. १२
स्वात्मनैव सदानन्दरूपेणास्मि
स्वलक्षणः   अध्यात्मो. ६७
स्वात्मन्यवस्थितः सम्य-
ग्ज्ञानिभिश्च सुशिक्षितः   जा. द. ५।३

स्वात्मन्यारोपिताशेषाभासवस्तु-
निरासतः । स्वयमेव परं ब्रह्म
पूर्णमद्वयमक्रियम् अध्यात्मो. २१
स्वात्मन्येवं सदा स्थित्या मनो
नश्यति योगिनः अध्यात्मो. ४
स्वात्मन्येव स्वयं सर्वं सदा पश्यति
निर्भयः । तदा मुक्तो न मुक्तश्च
बद्धस्यैव विमुक्तता पा. ब्र. ३६
स्वात्मन्येवावतिष्ठेऽहं तुर्यरूपपदे-
ऽनिशम् । अन्तरेव शशामास्य
क्रमेण प्राणसन्ततिः अ. पू. ३।१०
स्वात्मबन्धहरः (रहितः)
[रामो. ता. २।४+ गणेशो. १।४
स्वात्ममंत्रं सदा पश्येत्स्वात्म-
मन्त्रं सदाऽभ्यसेत् ते. बिं ३।५९
स्वात्मयोगैकनिष्ठेषु स्वातन्त्र्यादी-
श्वरप्रियाः । प्रभुताः सिद्धयो
यास्ताः कल्पनारहिताः स्मृताः यो.शि. १।१५४
स्वात्मप्रकाशरूपं तत् किं शास्त्रेण
प्रकाश्यते यो. शि. १।५
स्वात्मराज्ये त्वमेवासि स्वयम्भाव-
विवर्जितः ते. बिं. ५।७३
स्वात्मवत्सर्वभूतेषु कायेन मनसा
गिरा । अनुज्ञा या दया सैव
प्रोक्ता वेदान्तवेदिभिः जा. द. १।१५
स्वात्मसिंहासने स्थित्वा स्वात्मनो-
ऽन्यन्न चिन्तये ते. बिं. ३।२५
स्वात्मानन्दानुभवतरङ्गिण्याः
प्रवाहैरतिमङ्गलं...चिद्रूप-
विलासनिमचिन्मयासनं विराजते सि. सा. ४।१
स्वात्मानमेवैषा ददाति नृसिंहो. ७।६
स्वात्मानं च श्रियं ध्यायेदमृत-
प्लावनं ततः [वराहो. ५।३४,३९
स्वात्मारामः सुखासनः ते. बिं. ४।४७
स्वाधिष्ठानं ततश्चक्रं मेढ्रमेव निग-
द्यते । मणिवत्तन्तुना यत्र
वायुना पूरितं वपुः ध्या. बिं. ४८
स्वाधिष्ठानं द्वितीयं स्याच्चक्रं योगरा. ७
स्वाधिष्ठानाह्वयं चक्रं लिङ्गमूले षडस्र-
के । (कम्) । नाभिदेशे स्थितं
चक्रं दशा(स्रं)रं मणिपूरकम्
[यो. शि. १।१७२+ ५। ८
स्वाध्यायज्ञानयज्ञाश्च भ. गी. ४।२८
स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् तैत्ति. १।११।१
स्वाध्यायप्रवचने एवेति
नाको मौद्गल्यः तैत्ति. १।९।१
स्वाध्याययुक्ता ब्राह्मणाश्चरन्ति पा. ब्र. ९
स्वाध्याय-शौच-सन्तोष-तपांसि
नियतात्मवान् । कुर्वीत
ब्रह्मणि तथा परस्मिन्प्रवणं मनः भवसं. ३।२७
स्वाध्यायसंयमाभ्यां स दृश्यते
पुरुषोत्तमः । तत्प्राप्तिकारणं
राजंस्तदेतदिति पठ्यते भवसं. ३।६
स्वाध्यायस्तप आर्जवम् भ. गी. १६।१
स्वाध्यायान्मा प्रमदः तैत्ति. १।११।१
स्वाध्यायाभ्यसनं चैव भ. गी. १७।१५
स्वानन्दमयानन्ताचिन्त्यविभव
आत्माऽन्तरात्मा परमात्मा
ज्ञानात्मा तुरीयात्मा..शुद्धो देव
एको नारायणः त्रि. म. ना.१।५
स्वानन्दानुभवाच्छान्तिरेषैवो-
परतेः फलम् अध्यात्मो. २८
स्वानुभूतेश्च शास्त्रस्य गुरोश्चैवैक-
वाक्यता । यस्याभ्यासेन
तेनात्मा सततं चावलोक्यते महो. ४।५
स्वानुभूत्या स्वयं ज्ञात्वा स्वमात्मा-
नमखण्डितम् । स सिद्धः... अध्यात्मो. ६४
स्वानुभूत्यैकमानं च यत्तत्त्वं
तदसौ स्थितः । यदेकं चाप्य-
नेकं च साञ्जनं च निरञ्जनम् ॥
यत्सर्वं चाप्यसर्वं च यत्तत्त्वं
तदसौ स्थितः अ. पू. ३।२३
स्वान्तर्विजृम्भितभानुमण्डलध्यान-
तदाकाराकारितपरब्रह्मा-
कारितमुक्तिमार्गमारूढः
परिपक्वो भवति मं. ब्रा. २।७

स्वान्तःस्थितः स्वयमेवेति य एवं वेद स मुक्तो भवति — ना. प. ९।२०

स्वाम्यं परस्वरूपं स्याद्दास्यं जीवस्य सर्वदा । प्राक्प्रत्यगात्मनो रूपं स्वाम्यं दास्यमिति स्थितिः — मंत्रमं. २।५७

स्वायत्तमेकान्तहितं स्वेप्सित-त्यागवेदनम् । यस्य दुष्करतां यातं धिक्तं पुरुषकण्टकम् — महो. ४।८९

स्वाय लोकायारिष्टिमिच्छेदेवꣳ हैवंविदे सर्वाणि भूतान्य-रिष्टिमिच्छन्ति — बृह. १।४।१६

स्वाराज्यमतिरात्रेण (यजति) — मैत्रा. ६।३६

स्वार्थसंयमात्पुरुषज्ञानम् — शांडि. १।७।५२

स्वार्थे स्वाभाविकेऽर्थे च बहुधा संस्थितिस्त्वयि — मैत्रा. ५।२

स्वालोकतः शास्त्रदृशा स्वबुद्ध्या स्वानुभावतः । प्रयच्छति परां सिद्धिं त्यक्त्वात्मानं मनःपिता — महो. ५।८१

स्वावगम्यो लयः कोऽपि यो मनोवागगोचरः (जायते वाग-गोचरः) [वराहो. २।८१+ — अमन. २।२२

स्वावबोधकलालापकुशला दुर्लभा भुवि — अमन. २।२३

स्वाविद्यातत्कार्यजातं यद्विद्यापह्नवं गतम् । तद्धंसविद्यानिष्पन्नं रामचन्द्रपरं भजे — ब्र. वि. शीर्षकं

स्वाविद्याद्वयतत्कार्यापह्नवज्ञान-भासुरम् । मन्त्रिकोपनिषद्वेद्यं रामचन्द्रमहं भजे — मन्त्रिको. शीर्षकं

स्वाश्रमेष्वेवानुक्रमणं स्वधर्म एव सर्वं धत्ते — मैत्रा. ४।३

स्वाहान्ते जुहुयात्तत्र वर्णदेवाय पिण्डकान् । आघारावाज्यभागौ च प्रक्षिपेद्व्याहृतीः सुधीः — बृ. जा. ३।१३

स्वाहा स्वधा यश्च वषट्करोति रुद्रः पशूनां गुहया निमग्नः — एका. उ. ५

स्विष्टꣳ सुहुतं यज्ञक्रतूनां प्रायणꣳ सुवर्गस्य लोकस्य ज्योति-स्तस्मादग्निहोत्रं परमं वदन्ति — महाना. १७।९

स्वेच्छाचारस्वस्वभावोमोक्षःपरं ब्रह्म — निर्वाणो. ८

स्वेदजाः क्रिमिकीटादयः — ना. पू. ता. ५।६

स्वेन भासा स्वेन ज्योतिषा प्रस्वपि-त्यत्रायंपुरुषःस्वयंज्योतिर्भवति — बृह. ४।३।९

स्वेन रूपेणाभिनिष्पद्यते एष आत्मेति [छांदो. ८।३।४+ — मैत्रा. २।२

स्वेनावृतं सर्वमिदं प्रपञ्चं पञ्चात्मकं पञ्चसु वर्तमानम् । पञ्चीकृता-नन्तभवप्रपञ्चं पञ्चीकृतस्वा-वयवैरसंवृतम् — ना. प. ९।१८

स्वे महिम्नि तिष्ठमानं दृष्ट्वाऽऽवृत्त-चक्रमिव संसारचक्रमालोकयति — मैत्रा. ६।२८

स्वे महिम्नि सदा समासते तस्मादेनमकारार्थेन परेण ब्रह्मणैकीकुर्यात् — नृसिंहो. ७।६

स्वे स्वे कर्मण्यभिरतः — भ. गी. १८।४५

स्वैरं न विगायेत्तन्महाव्रतम् । न स मूढवल्लिप्यते — अवधू. ६

स्वैरं स्वैरविहरणं तत्संसरणम् — अवधू. ६

स्वौजसा सर्वमादधाति यः पापीयां-समनुपदमाहिंसत्सुपुण्यं पुण्यात्मकं पुण्यं वितानं दाधार देवाय स्वाहा — पारमा. ६।२

ह

हकारं वियत्स्वरूपं च समानं स्फटिकप्रभम् । हन्नाभिनासा-कर्णं च पादाङ्गुष्ठादिसंस्थितम् — ध्या. बिं. ९७

हकारः परमेशः स्यात्तत्पदं चेति निश्चितम् । सकारो ध्यायते जन्तुर्हकारो हि भवेद्ध्रुवम् — यो. चू. ८३

हकारेण तु सूर्यः स्यात्सकारेणे-न्दुरुच्यते । सूर्याचन्द्रमसो-रैक्यं हठ इत्यभिधीयते — यो.शि. १।१३३

हकारेण बहिर्याति सकारेण विशेत् पुनः । हंस हंसेत्यमुं मन्त्रं जीवो जपति सर्वदा । हंस हंसेति

मन्त्रोऽयं सर्वैर्जीवैश्च जप्यते [ध्या. बि. ६१+	यो. शि. १।१३०
हकारौ सकारोमकारौ त्रयमेकस्वरूपं भवति	हयग्री. ६
हठेन ग्रस्यते जाड्यं सर्वदोषसमुद्भवम् । क्षेत्रज्ञः परमात्मा च तयोरैक्यं यदा भवेत् ॥ तदैक्ये साधिते ब्रह्मंश्चित्तं याति विलीनताम्	यो.शि. १।१४
हतो वा प्राप्स्यसि स्वर्गं	भ. गी. २।३७
हत्वाऽपि स इमाँल्लोकान्	भ. गी. १८।१७
हत्वाऽर्थकामांस्तु गुरूनिहैव	भ. गी. २।५
हत्वा स्वजनमाहवे	भ. गी. १।३१
हत्वैतानाततायिनः	भ. गी. १।३६
हनिष्याम वा एतद्वो वदेवाम परामावयिष्यथ	शौनको. १।१
हनिष्ये चापरानपि	भ. गी.१६।१४
हन्तकारं मनुष्याः स्वधाकारं पितरः (उपजीवन्ति)	बृह. ५।८।१
हन्त चित्तमहत्तायां कैषा विश्वासता तव (चित्तमूलं हि संसारः)	वराहो. ३।२१
हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम्	कठो. ५।६
हन्ततर्हिभवत्येतद्व्याख्यास्यामि ते व्याचक्षाणस्य तु मे निदिध्यासस्वेति	बृह. ४।५।५
हन्त ते कथयिष्यामि	भ. गी. १०।१९
हन्त तेऽनया कात्यायन्याऽन्तं करवाणि	बृह. २।४।१
हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् । उभौ तौ न विजानीतो नायं हन्ति न हन्यते	कठो. २।१९
हन्ताहमेतद्भगवतो वेदानीति	छांदो. १।८।७
हन्ताहमेतद्भगवतो वेदानीति(मा.पा.)	छांदो. १।८।७
हन्ति पाप्मानं जहाति च य एवं वेद	बृह. ५।५।३,४
हन्तुं स्वजनमुद्यताः	भ. गी. १।४५
हन्तेन्द्रियगणा यूयं त्यजताकुलतां शनैः । चिदात्मा भगवान्सर्वसाक्षित्वेन स्थितोऽस्म्यहम्	म. पु. ३।८
हन्यान्मुष्टिभिराकाशं क्षुधार्तः खण्डयेत्तुषम् । नाहं ब्रह्मेति जानाति तस्य मुक्तिर्न जायते	पैङ्गलो. ४।२२
हयग्रीवैकाक्षरजपलीलाज्ञया सूर्यादयः स्वतः स्वस्वकर्मणि प्रवर्तन्ते	हयग्री. ६
हयो भूत्वा देवानवहत्	बृह. १।१।२
हरन्ति प्रसभं मनः	भ. गी. २।६०
हरमायात्मकेन ह्रीङ्कारेण हल्लेखाख्या भगवती त्रिपुरेति व्यापठ्यते	त्रि. ता. १।१
हरमुवाच-कुरु हर संहारम् । जगद्धरणाद्धरो भव	गणेशो. ३।११
हरितस्य नीलस्य पीतस्य लोहितस्य श्वेतस्य नाड्यो रुधिरस्य पूर्णाः	सुबालो. ४
हरिहरहिरण्यगर्भस्रष्टारमप्रमेयमनाद्यन्तं रुद्रसूक्तैरभिषिच्य	भस्मजा. २।४
हरिं हरन्तं पादाभ्यामनुयान्ति सुरेश्वराः	शरभो. ६
हरिं हरन्तमनुयन्ति देवा विश्वस्येशानं वृषभं मतीनाम् [महाना. १३।११+	चित्यु. १५।१
हरिः पतङ्गः पटगी सुपर्णः	चित्यु. ११।८
हरे राम हरे राम राम राम हरे हरे । हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे	कलिसं. २
हरो वै त्रिलोकम् रुदति स्म । रोदनाद्रुद्रसंज्ञः	गणेशो. ३।१३
हर्षशोकान्वितः कर्ता	भ. गी. १८।२७
हर्षामर्षभयक्रोधकामकार्पण्यदृष्टिभिः। न परामृश्यते योऽन्तः स जीवन्मुक्त उच्यते	महो. २।४४
हर्षामर्षभयक्रोधकामकार्पण्यदृष्टिभिः । न हृष्यति ग्लायति यः परामर्शविवर्जितः	महो. ६।४९
हर्षामर्षभयोद्वेगैः	भ. गी. १२।१५
हविर्गुणा न वक्तव्याः पितरो यावदर्पिताः । तृप्तैस्तु पितृभिः पश्चाद्वक्तव्यं शोभनं हविः	इतिहा. ८२
हविर्मेऽमलं विलुहति	इतिहा. ८५
हसत्युल्लसति प्रीत्या क्रीडते मोदते तदा । तनोति जीवनं प्रीत्या बिभेति सर्वतो भयात्	यो. शि. ६।६७

हसन्ति लोकायतिका हसन्ति कुटिला जनाः	सूर्यता. १।१२
हसौं हयग्रीवस्वरूपो भवति	हयग्री. ६
हस्तप्राप्तं च भक्षयेत् (यतिः)	ना. प. ५।४८
हस्तमेवाप्येति यो हस्तमेवास्तमेति	सुबालो. ९।६
हस्तं हस्तेन सम्पीड्य दन्तैर्दन्तान्विचूर्ण्य च। अङ्गान्यङ्गैः (ह्याक्रम्य) समाक्रम्य जयेदादौ स्वकं मनः [महो. ५।७५+	मुक्तिको. २।४२
हस्ताभावात्क्रिया न च	ते. बि. ५।१५
हस्ताभ्यां चाग्निमसृजत	बृह. ६।४।६
हस्ताभ्यां नदीतरणं न कुर्यान्न (वृक्षारोहणमपि)वृक्षमारोहेत्	ना.प.५।८+७।१
हस्तावध्यात्मं, आदातव्यमधिभूतं, इन्द्रस्तत्राधिदैवतं, नाडी तेषां निबन्धनम्	सुबालो. ५।११
हस्तावेवास्या एकमङ्गमुदूढं, तयोः कर्म परस्तात्प्रतिविहिता भूतमात्रा	कौ. त. ३।५
हस्तिजिह्वा तथा सव्यपादाङ्गुष्ठान्तमिष्यते	जा. द. ४।२१
हस्तिजिह्वाभिधायास्तु वरुणो देवता भवेत्	जा. द. ४।३६
हस्ति हिरण्यं दासभार्यं क्षेत्राण्यायतनानीति	छांदो. ७।२४।२
हस्तिनि सिंहे दंशे मशके नकुलसर्पराक्षसगन्धर्वे मृत्यो रूपाणि विदित्वा न बिभेति कुतश्चनेति	सुबालो. १३।२
हस्तेन दक्षिणेनैव पीडयेन्नासिकापुटम्	त्रि. ब्रा. २।९५
हस्तौ च दातव्यं च –(मा. पा.)	प्रश्नो. ४।८
हस्तौ चादातव्यं च	प्रश्नो. ४।८
हस्तौ चादातव्यं च नारायणः	सुबालो. ६।१
हस्तौ पादावुपस्थं च जिह्वा पायुस्तथैव च । कर्मेन्द्रियाणि पञ्चैव राजन्नस्मिञ्छरीरके	भवसं. २।१८
हस्तौ वै ग्रहः, स कर्मणाऽतिग्राहेण गृहीतो हस्ताभ्यां हि कर्म करोति	बृह. ३।२।८
हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः	बृह. ४।१।२-७
हं नमः शिरसि प्रोतं वेद शिवो भवेत्	हंसषोडो. २
हंमी तृतीयस्यार्धार्धान्त्यं मृत्युं चतुर्थस्यार्धार्धान्त्यं साम तु जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति	नृ. पू. १।५
हंस एव परं वाक्यं हंस एव तु वादिकम् । हंस एव परो रुद्रो हंस एव परात्परम्	ब्र. वि. ६१
हंसज्योतिरनूपम्यं मध्ये देवं व्यवस्थितम् । दक्षिणामुखमाश्रित्य ज्ञानमुद्रां प्रकल्पयेत्	ब्र. वि. ६४
हंसपरमहंसयोरान्तरप्रणवः, तुरीयातीतावधूतयोर्ब्रह्म प्रणवः	ना. प. ७।१०
हंसपरमहंसयोर्ध्यानाधिकारस्तुरीयातीतावधूतयोर्न	ना. प. ७।९
हंसपरमहंसयोर्मननं, तुरीयातीतावधूतयोर्निदिध्यासः	ना. प. ७।११
हंसपरमहंसयोर्मानसार्चनं, तुरीयातीतावधूतयोः सोऽहम्भावना	ना. प. ७।९
हंसप्रणवयोरभेदः	पा. ब्र. ३
हंसविद्यामिमां लब्ध्वा गुरुशुश्रूषया नरः ॥ आत्मानमात्मना साक्षाद्ब्रह्म बुद्ध्वा सुनिश्चलम् । देहजात्यादिसम्बन्धान्वर्णाश्रमसमन्वितान् ॥ वेदशास्त्राणि चान्यानि पदपांसुमिव त्यजेत्	ब्र. वि. २८
हंसविद्यामृते लोके नास्ति नित्यत्वसाधनम्	ब्र. वि. २६
हंसस्य तपोलोकः परमहंसस्य सत्यलोकः [ना. प. ५।९+	१सं. सो. २।५९
हंसस्य प्रार्थनात्रिकालाः	पा. ब्र. ३
हंसस्याष्टगृहेष्वष्टकवलं परमहंसस्य पञ्चगृहेषु करपात्रं फलाहारो गोमुखं तुरीयातीतस्याजगरवृत्तिः	ना. प. ५।७
हंस हंस वदेद्वाक्यं प्राणिनां देहमाश्रितः । स प्राणापानयोर्ग्रन्थिरजपेत्यभिधीयते	ब्र. वि. ७८
हंसहंसाय विद्महे सोहं हंसाय धीमहि । तन्नो हंसः प्रचोदयात्	वनदु. १४९

हंसहंसेति मन्त्रोऽयं सर्वैर्जीवैश्च जप्यते । गुरुवाक्यात्सुषुम्नायां विपरीतो भवेज्जपः — यो.शि. १।१३१
हंसहंसेति यो ब्रूयाद्धंसो ब्रह्मा हरिः शिवः — ब्र. वि. ३४
हंसहंसेति सदा ध्यायन्सर्वेषु देहेषु व्याप्य वर्तते — हंसो. ४
हंसहंसेत्यमुं मंत्रं जीवो जपति सर्वदा [ध्या. बि. ६२+ यो. चू. ३१+ — यो. शि. ६।५४
हंसः कं खं गं घं ङं महामुण्डमालाधारिणि महाकालप्रिये मां रक्ष रक्ष — हंसषोढो. २
हंसः चं छं जं झं ञं महात्रिपुरभैरवि पुस्तकाक्षमालाधारिणि शत्रुमुखस्तम्भनं कुरु कुरु स्वाहेति महापद्मे — हंसषोढो. २
हंसः टं ठं डं ढं णं डां डीं डें डाकिनि मां रक्ष रक्ष स्वाहेत्यनाहते न्यसेत् — हंसषोढो. २
हंसः तं थं दं धं नं महामारि मारहारिणि हुं हुं दारिद्र्यं हर हर स्वाहा — हंसषोढो. २
हंसः परमहंसो भूत्वा स्वरूपानुसन्धानेन सर्वप्रपञ्चं विदित्वा ...प्रणवात्मकत्वेन देहत्यागं करोति यः सोऽवधूतः — तुरीया. ३
हंसः पं फं बं भं मं मार्जारि वीरावलि ममालस्यं नाशय नाशय — हंसषोढो. २
हंसः यं रं लं वं शं षं सं हं कम्बोदरि मातर्महामङ्गलप्रिये मम जाड्यं छेदय छेदय — हंसषोढो. २
हंसःशक्तेरधिष्ठानं चराचरमिदं जगत् — वराहो. ५।५५
हंसः शिखा, प्रणव उपवीतम् — परब्र. ६
हंस: सः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् — कठो. ५।२
[महाना. ८।६+१२।३+ — नृ. पू. ३।६+
[ना. प. ५।४+ ग. पू. ता. २।९+ — ऋ.मं.४।४०।५
हंसा एकदण्डधराः शिखावर्जिता यज्ञोपवीतधारिणः शिक्यकमण्डलुहस्ता ग्रामैकरात्रवासिनो नगरे तीर्थेषु पञ्चरात्रं वसन्त एकरात्रद्विरात्रकृच्छ्रचान्द्रायणादि चरन्त आत्मानं प्रार्थयन्ते — आश्रमो. ४
हंसात्मकं ते विरजा भवन्ति — ध्या. बिं २४
(अथ) हंसा नाम ग्राम एकरात्रं नगरे पञ्चरात्रं क्षेत्रे सप्तरात्रं तदुपरि न वसेयुः-गोमयाहारिणो नित्यं चान्द्रायणपरायणा योगमार्गे मोक्षमेव प्रार्थयन्ते — भिक्षुको. ३
(अथ ह) हंसा निशायामतिपेतुः — छांदो. ४।१।२
हंसेति वर्णद्वयेनान्तःशिखोपवीतित्वं निश्चित्य...चतुर्विंशतितत्त्वापादनतन्तुकत्वं नवतत्त्वमेकमेव — परब्र. ९
हंसे तु सकृदेव स्यात् परमहंसे न विद्यते (स्नानं) — ना. प. ४।२३
हंसो जटाधारी त्रिपुण्ड्रोर्ध्वपुण्ड्रधारी असङ्क्लृप्तमाधुकराशी कौपीनखंडतुंडधारी [ना.प.५।५+ — १ सं.सो. २।१३
हंसो भगवाञ्छुचिरप्रतिरूपः — चाक्षुषो. २
हंसो भगवाञ्छुचिरूपः प्रतिरूपः — अक्ष्यु. २
हंसो विशोको ऽजरः पुराणो ऽनीयमानो ऽहमस्मि नाम — ब्रा. मं. २४
हंसो हंसमभ्युवाद हो होऽयि भल्लाक्ष भल्लाक्ष जानश्रुतेः पौत्रायणस्य समं दिवा ज्योतिराततं तन्मा प्रसाङ्क्षीः — छांदो. ४।१।२
हानिरस्योपजायते — भ. गी. २।६५
हानोपादानचेष्टादि ध्यानकर्म — शांडि. १।४।९
हारे त्वा शूद्र तवैव सह गोभिरस्त्विति — छांदो. ४।२।३
हास्यनिष्ठीवनास्फोटमुखभाष्यविजृम्भणम् । पादप्रसारणं गीतं न कुर्याद्गुरुसन्निधौ — शिवो. ७।१३
हिक्का कासस्तथा श्वासः शिरःकर्णाक्षिवेदनाः । भवन्ति विविधा रोगाः पवनव्यत्ययक्रमात् — यो. चू. ११७

हिङ्कार इति त्र्यक्षरं प्रस्तार इति त्र्यक्षरं तत्समम् छांदो. २।१०।१

हितं मितं च भोक्तव्यं स्तोकं स्तोकमनेकधा वराहो. ५।९

हिता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते (आत्मा) बृह. २।१।१९

हितानाम हृदयस्य नाड्यो हृदयात् पुरीततमभिप्रतन्वन्ति कौ. त. ४।१९

हिताहितं मनोरामं वचः शोकावहं तु यत् । श्रुत्वाऽपि न शृणोतीव बधिरः स प्रकीर्तितः ना. प. ३।६७

हित्वा पापमवाप्स्यसि भ. गी. २।३३

हित्वेकारं तुरीयस्वरं सवादौ सूर्याचन्द्रमस्केन कामेश्वर्येवागस्त्यसंज्ञा त्रि. ता. १।१६

हिरण्मयं पुरुषं ज्योतीरूपं तपन्तम् चाक्षुषो. ४

हिरण्मयं यस्य विभाति सर्वं व्योमान्तरे रश्मिमिवांशुनाभिः एका. उ. ८

हिरण्मयं वेदविदां वरिष्ठं यमध्वरे ब्रह्मविदः स्तुवन्ति एका. उ. १०

हिरण्मयं सौम्यतनुं स्वभक्तायाभयप्रदम् गोपालो. २।२३

हिरण्मयः पुरुष एकहंस: स: बृह.४।३।११,१२

हिरण्मयः सर्वेभ्यो भूतेभ्यो ददर्श १ ऐत. १।३।१

हिरण्मयी अरणी याभ्यां निर्मन्थतामश्विनौ बृह. ६।४।२२

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् । तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये [बृह.५।१५।१+ मैत्रा. ६।३५

हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम् । तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः मुण्ड. २।२।९

हिरण्मयो ह वा अमुष्मिँल्लोके सम्भवति १ ऐत. १।३।१

हिरण्मयोऽहं शिवरूपमस्मि [कैव. २० +२बिल्वो. १३

हिरण्यगर्भस्तदाज्ञया सूक्ष्माण्यपाक्षयत् पैङ्गलो. १।५

हिरण्यगर्भस्त्रिरूप ईश्वरवद्व्यक्तचैतन्यः नृसिंहो. ९।४

हिरण्यगर्भस्तैजसः सूक्ष्मश्च उकारः यो. चू. ७५

हिरण्यगर्भः स्थूलोऽन्तर्द्वितीयः पाद उच्यते ना. प. ८।१३

हिरण्यगर्भस्य कारणं परमात्मानमण्डपरिपालकनारायणमभ्येति त्रि. म. ना. ३।४

हिरण्यगर्भं जनयामास पूर्वं स (सा) नो बुद्ध्या शुभया संयुनक्तु [श्वेताश्व. ३।४+ गुह्यका. ५६

हिरण्यगर्भं पश्यति जायमानं स नो देवः शुभया स्मृत्या संयुनक्तु महाना. ८।१२

हिरण्यगर्भं पश्यति जायमानं स नो बुद्ध्या शुभया संयुनक्तु श्वेताश्व. ४।१२

हिरण्यगर्भः स्थूलोऽन्तर्द्वितीयः पाद उच्यते ना. प. ८।१४

हिरण्यगर्भादीनहं जायमानान् पश्यामि भस्मजा. २।५

हिरण्यगर्भाधिष्ठितविक्षेपशक्तितस्तमोद्रिक्ताऽहङ्काराभिधा स्थूलशक्तिरासीत् पैङ्गलो. १।३

हिरण्यगर्भो भगवानेष च्छन्दसि सुष्टुतः । सोऽहं योगरतिर्ब्रह्मन्योगशास्त्रेषु शब्दितः ना. महो. ५८

हिरण्यगर्भो लोकादिश्चतुर्वक्त्रो निरुक्तगः । ब्रह्मा सनातनो देवो मम बह्वर्थचिन्तकः ना. महो. ३९

हिरण्यज्योतिर्यस्मिन्नयमात्माऽधिक्षियंति भुवनानि विश्वा सुबालो. २।१

हिरण्यज्योतिः शरीरस्य मध्ये चित्सु. ११।८

हिरण्यदन्तो बभसोऽनसूरिर्महान्तमस्य महिमानमाहुः छांदो. ४।३।७

हिरण्यबाहुं हिरण्यरूपं हिरण्यवर्णं हिरण्यनिधिमद्वैतं...भगवन्तं शिवं प्रणम्य मुहुर्मुहुरभ्यर्च्य... कृताञ्जलिपुटः पप्रच्छ भस्मजा. १।१

हिरण्यबाहुं हिरण्यवर्णं हिरण्यरूपं पशुपाशविमोचकं पुरुषं कृष्ण-

पिङ्गलमूर्ध्वरेतं विरूपाक्षं... रुद्रसूक्तैरभिषिच्य... भस्मजा. २।४
हिरण्ययोवेतसोमध्यआसाम् [त्रिसु.३ महाना. १२।३
हिरण्यवर्णः शकुनो हृद्यादित्ये प्रतिष्ठितः मैत्रा. ६।३४
हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह [ऋ. खि. ५।८७।१ श्री. सू. १
हिरण्यवर्णो हिरण्यश्मश्रुरानखामेभ्यो दीप्यमान इव आर्षे. ६।२
हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः महाना. ५।१५
(तत्र) हिंसा नाम मनोवाक्कायकर्मभिः सर्वभूतेषु सर्वदा क्लेशजननम् शांडि. १।१।३
हीनान्नपानवस्त्रः स्यात्सर्वदा गुरोः । न यथेष्टं सन्निष्ठेस्कलहं च विवर्जयेत् शिवो. ७।१४
हीयतेऽर्थाद्य उ प्रेयो वृणीते कठो. २।१
हुतमन्नं समं नयति (समुन्नयति मा. पा.) प्रश्नो. ३।५
हुतमहुतं दत्तमदत्तं सर्वमसर्वं विश्वमविश्वं कृतमकृतं परमपरं परायणं च त्वम् [अशिरः.३।१+ चतुर्वे. ८
हुताशनश्चापि हि सर्वभक्षः ...
हृ इत्येकमक्षरमभिहरन्ति...(मा.पा.) बृ. ह. ५।३।१
हृत्पद्मं वेदिकातत्रलिङ्गमोङ्कारमिष्यते शिवो. १।२४
हृत्पद्मकर्णिकामध्ये स्थिरदीपनिभाकृतिम् । अङ्गुष्ठमात्रमचलं ध्यायेदोङ्कारमीश्वरम् ध्या. बिं. १९
हृत्पद्ममध्ये सर्वं यत्तत्प्रज्ञाने प्रतिष्ठितम् आ. प्र. १
हृत्पुण्डरीकमध्यस्थं चैतन्यज्योतिरव्ययम् त्रि. ब्रा. २।१५६
हृत्पुण्डरीकमध्यस्थां प्रातःसूर्यसमप्रभाम् । पाशाङ्कुशधरां सौम्यां वरदाभयहस्तकाम् ॥ त्रिनेत्रां रक्तवसनां भक्तकामदुघां भजे १ देव्यु. १८
हृत्पुण्डरीकमध्ये तु भावयेत्परमेश्वरम् । साक्षिणं बुद्धिवृत्तस्य परमप्रेमगोचरम् मैत्रे. १।१३
हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्य मध्ये विशदं विशोकम् कैव. ६
हृत्स्थं ज्ञानासिनाऽऽत्मनः भ. गी. ४।४२
हृदयग्रन्थिरस्तित्वे छिद्यते ब्रह्मचक्रकम् । संशये समनुप्राप्ते ब्रह्मनिश्चयमाश्रयेत् ते. बिं. ६।१०१
हृदयग्रन्थिहीनोऽस्मि हृदयाम्भोजमध्यगः मैत्रे. ३।१७
हृदयं चाहृदयं च यद्वै वाङ्नाभविष्यन्न धर्मो नाधर्मो व्यज्ञापयिष्यत् छांदो. ७।२।१
हृदयं चाहृदयं चान्नं च रसं चेमं च लोकममुं च विज्ञानेनैव विजानाति छांदो. ७।७।१
हृदयमेव सम्राडिति होवाच बृह. ४।१।७
हृदयमेवान्ववक्रामति बृह. ४।४।१
हृदयमेवायतनमाकाशः प्रतिष्ठा बृह. ४।१।७
हृदयस्त्वं भूतभव्यः पुराणो ह्येको वीरो वेदगुणैकवेद्यः २ रुद्रो. ६०
हृदयस्य दश छिद्राणि भवन्ति येषु प्राणाः प्रतिष्ठिताः सुबालो. ४।१
हृदयस्य मध्ये लोहितं मांसपिण्डं, यस्मिंस्तद्दहरं पुण्डरीकं कुमुदमिवानेकधा विकसितं सुबालो. ४।१
हृदयस्य रेतो मनः १ ऐत. १।३।१
हृदयं कुण्डली भस्म रुद्राक्षगणदर्शनम् मुक्तिको. १।३७
हृदयं न हि सत्यं जानाति हृदये ह्येव सत्यं प्रतिष्ठितं भवति बृह. ३।९।२३
हृदयं निरभिद्यत २ ऐत. १।४
हृदयं निर्मलं कृत्वा चिन्तयित्वाऽप्यनामयम् । अहमेव परं सर्वमिति पश्येत्परं सुखम् पैङ्गलो. ४।९
हृदयं यूपः (यज्ञस्य) महाना. १८।१
हृदयं वै ब्रह्मेति बृह. ४।१।७
हृदयं ब्रह्मेत्याहुः पूर्वे: १ ऐत. १।४।१

हृदयं विश्वमस्य मुण्ड. २।१।४
हृदयं वै सम्राट् परमं ब्रह्म नैनं॰
हृदयं जहाति बृ. उ. ४।१।७
हृदयं वै सम्राट् सर्वेषां भूताना-
मायतनम् बृह. ४।१।७
हृदयं वै सम्राद सर्वेषांभूतानांप्रतिष्ठा बृह. ४।१।७
हृदयं ह्यष्टकपालानि निरुक्तो. २।१
हृदयाकाशे महोज्ज्वलज्ञानरूपा भवति शांडि. १।४।५
हृदयात्सम्परित्यज्य सर्ववासन-
पङ्क्तयः । यस्तिष्ठति गतव्यग्रः
स मुक्तः परमेश्वरः महो. ६।८
हृदयात्सर्वमिदं जायते सुबालो. १।५
हृदयादायता तावच्चक्षुष्यस्मिन्
प्रतिष्ठिता । सारणी सा तयो-
र्नाडी द्वयोरेका द्विधा सती मैत्रा. ७।११
हृदयादिकण्ठपर्यन्तं सस्वनं
नासाभ्यां शनैः पवनमाकृष्य
यथाशक्तिः कुम्भयित्वा इडया
विरेच्य गच्छंस्तिष्ठन्कुर्यात् । तेन
श्लेष्महरं जठराग्निवर्धनं भवति शांडि. १।७।१४
हृदयादिव सृष्टो हृदयादिव निर्मित
इति हृदये ह्येव रेतः प्रतिष्ठितं
भवति बृह. ३।९।२२
हृदयाद्धृदयं मृत्योः चित्यु. १५।२
हृदयानि व्यदारयन् भ. गी. १।१९
हृदयान्मनः (निरभिद्यत) २ ऐत. १।४
हृदयाम्बुरुहासीनं ध्यायेद्वा
विष्णुरूपिणम् त्रि. ब्रा. १५३
हृदयेन हि रूपाणि जानाति बृह. ३।९।२०
हृदयेन हि श्रद्धां जानाति हृदये
ह्येव श्रद्धा प्रतिष्ठिता भवति बृह. ३।९।२१
हृदयेनात्तसर्वेहो मुक्त एवोत्तमाशयः मुक्तिको. २।१९
हृदये व्यज्यते घोषो गर्जत्पर्जन्य-
सन्निभः । तत्र स्थिता सुरेशान
मध्यमेत्यभिधीयते यो. शि. ३।४
हृदये ह्येव रूपाणि प्रतिष्ठितानि
भवन्ति बृह. ३।९।२०
हृदये ह्येव रेतः प्रतिष्ठितम् बृह. ३।९।२२

हृदये ह्येव श्रद्धा प्रतिष्ठिता भवति बृह. ३।९।२१
हृदये ह्येव सत्यं प्रतिष्ठितं भवति बृह. ३।९।२३
हृदये ह्येव सम्राट् सर्वाणि भूतानि
प्रतिष्ठितानि भवन्ति बृह. ४।१।७
हृदयोर्ध्वभागे चित्तसंयमात्
महर्लोकज्ञानम् शांडि. १।७।५२
हृदाकाशे चिदादित्यः सदा भासति
भासति । नास्तमेति न चोदेति
कथं सन्ध्यामुपास्महे मैत्रे. २।१४
हृदा पश्यन्ति मनसा मनीषिणः चित्यु. ११।११
हृदा मनीषा मनसाऽभिक्लृप्ता ये तां
विदुरमृतास्ते भवन्ति गुह्यका. ६०
हृदा मनीषा मनसाऽभिक्लृप्तां य एनां
विदुरमृतास्ते भवन्ति गुह्यका. ६६
हृदा मनीषी मनसाऽभिक्लृप्तो य
(एवं एनं-विदुः) एतद्विदु-
रमृतास्ते भवन्ति [कठो.६।९+ श्वेताश्व. ३।१३
+४।१७+ म. ना. १।११+ त्रि. म.ना. ३।४
हृदासन-नाभि-कण्ठ-सर्वाङ्गानि
स्थानानि पैङ्गलो. २।३
हृदा हृदिस्थं मनसा य एनमेवं
विदुरमृतास्ते भवन्ति श्वेताश्व. ४।२०
हृदि चित्तस्य संयमात्स्वर्लोकज्ञानम् शांडि. १।७।५२
हृदि दक्षिणाग्निः (शारीरयज्ञस्य) गर्भो. ११
हृदि प्रतीष्या कवयो मनीषेति
उपैतं... [बृ. जा. १।२+ नृ. पू. १।१
हृदिस्था देवताः सर्वा हृदि प्राणाः
प्रतिष्ठिताः । हृदि प्राणः स्थितो
नित्यमपानो गुदमण्डले यो. चू. २१
हृदिस्था देवताः सर्वा हृदि प्राणे
प्रतिष्ठिताः । हृदयं पुरुषोऽसि
त्वं तिस्रो मात्राः परश्च सः २ ब्रह्मो. ५४
हृदिस्था देवताः सर्वा हृदि
प्राणाः प्रतिष्ठिताः । हृदि
प्राणाश्च ज्योतिश्च त्रिवृत्सूत्रं
च तद्विदुर्बुधाः ब्रह्मो. ४
हृदि सर्वस्य धिष्ठितम् भ. गी. १३।१८

हृदिस्था देवताः सर्वा हृदि प्राणाः
प्रतिष्ठिताः । हृदि त्वमसि
यो नित्यं तिस्रो मात्राः परस्तु
सः [अ. शिरः. ३।४+ बटुको. १८

हृदिस्थाने अष्टदलपद्मं वर्तते ध्या. बि. ६४

हृदि स्थाने स्थितं पद्मं तस्य
वक्त्रमधोमुखम् १ यो. त. १३७

हृदिस्थाने स्थितं पद्मं तच्च पद्म-
मधोमुखम् । ऊर्ध्वनालमधो
बिन्दुस्तस्य मध्ये स्थितं मनः २ योगत. ९

हृदि ह्येष आत्मा । अत्रैतदेकशतं
नाडीनां प्रश्नो. ३।६

हृदीन्द्रियाणि मनसा संनिरुध्य
ब्रह्मोडुपेन प्रतरेत विद्वान् श्वेताश्व. २।८

हृद्देशेऽर्जुन तिष्ठति भ. गी. १८।६१

हृद्द्वारं वायुद्वारं च मूर्धिन द्वारमथा-
परम् । मोक्षद्वारं बिलं चैव
सुषिरं मण्डलं विदुः अ. ना. २७

हृद्यन्तःकरणं ज्ञेयं शिवस्यायनं
परम् । हृत्पद्मं वेदिका तत्र
लिङ्गमोङ्कारमिष्यते शिवो. १।२४

हृद्याकाशमयं कोशमानन्दं परमा-
लयम् । स्वं योगश्च ततोऽस्माकं
तेजश्चैवाग्निसूर्ययोः मैत्रा. ६।२७

हृद्याकाशस्ते जोमयोऽमृतमयः
पुरुषोऽयमेव सः योऽयमात्मेद-
ममृतमिदं ब्रह्मेद१ सर्वम् बृह. २।५।१०

हृद्याकाशे परे कोशे दिव्योऽय-
मात्मा स्वपिति । यत्र सुप्तो
न कञ्चन कामं कामयते
न कञ्चन स्वप्नं पश्यति सुबालो. ४।४

हृद्यादित्यमरीचीनां पदं षण्णवतिः पा. ब्र. ४

हृद्येव तिष्ठ कल्पनारहितः क्रियां तु
कुर्वन्नकर्तृपदमेत्य शमोदितश्रीः अ. पू. ४।९१

हृद्रोगं मम सूर्य हरिमाणं च
नाशय [सूर्यता. २।१+ ऋ.सं. १।५०।११

हृदयमित्येकमक्षरमभिहरन्त्यस्मै
स्वाश्चान्ये च य एवं वेद बृह. ५।३।१

हृषीकेशं तदा वाक्यं भ. गी. १।२१

हृष्टरोमा धनञ्जयः भ. गी. ११।१४

हृष्यामि च पुनः पुनः भ. गी. १८।७६

हृष्यामि च मुहुर्मुहुः भ. गी. १८।७७

हे कृष्ण हे यादव हे सखेति भ. गी. ११।४१

हेतुद्वयं हि चित्तस्य वासना च
समीरणः । तयोर्विनष्ट एकस्मिं-
स्तद्द्वावपि विनश्यति योगकुं. १।१

हेतुनाऽनेन कौन्तेय भ. गी. ९।१०

हेतुमद्भिर्विनिश्चितैः भ. गी. १३।५

हेतुर्न जायतेऽनादेः फलं चापि
स्वभावतः । आदिर्न विद्यते
यस्य तस्य ह्यादिर्न विद्यते अ. शां. २३

हेतुस्तु सुखदुःखस्य योगो दृष्ट-
श्चतुर्विधः आयुर्वे. २

हेतुः प्रकृतिरुच्यते भ. गी. १३।२०

हेतोरादिः फलं येषामादिर्हेतुः
फलस्य च । हेतोः फलस्य
चानादिः कथं तैरुपवर्ण्यते अ. शां. १४

हेतोरादिः फलं येषामादिर्हेतुः
फलस्य च । तथा जन्म भवेत्तेषां
पुत्राज्जन्म पितुर्यथा अ. शां. १९

हेतोः किं नु महीकृते भ. गी. १।३५

हेमप्रख्यामिन्दुखण्डान्तमौलिं
शङ्खारिष्टाभीतिहस्तां त्रिने-
त्राम् । हेमाब्जस्थां पीतवस्त्रां
प्रसन्नां देवीं दुर्गां दिव्यरूपां
नमामि वनदु. २

(अथ ह) हेममासन्यं प्राण-
मूचुस्त्वं न उद्गायेति, तथेति ।
तेभ्य एष प्राण उदगायत बृह. १।३।७

हेमाभया द्विभुजया सर्वालङ्कृतया
चिता । श्लिष्टः कमलधारिण्या
पुष्टः कोसलजात्मजः रा. पू. ४।९

हेरम्बतत्त्वे परमात्मसारे नो वै
योगाग्नैव तपोबलेन । नैवायुध-
प्रभावतो महेशि वृत्रं पुरा
त्रिपुरं दैवयोगात् हेरम्बो. ३

हैरण्यो गोपवेषमब्राभ्रं
कल्पद्रुमाश्रितम् गो. पू. १।५
होता ऋक्‌षु सामम्यमुद्गाता.. कौ. त. २।६
होता भोक्ता हविर्मन्त्रो यज्ञो विष्णुः
प्रजापतिः । सर्वः कश्चित्प्रभुः
साक्षी योऽमुष्मिन्भाति मण्डले मैत्रा. ६।१६
होतृषदनाद्धैवापि दुरुद्गीथ-
मनुसमाहरति छांदो. १।५।५
होत्रर्त्विजाऽग्निना वाचा, वाग्वै यज्ञस्य
होता, तद्येयं वाक्सोऽयमग्निः स
होता स मुक्तिः साऽतिमुक्तिः बृह. ३।१।३
होमशेषं तु निर्वृत्य पूर्णपात्रोदकं
तथा । पूर्णमसीति यजुषा
जलेनान्येन बृंहयेत् बृ. जा. ३।१७
ह्रस्वो दहति पापानि दीर्घः सम्पत्प्रदो
ऽव्ययः । अर्धमात्रा समायुक्तः
प्रणवो मोक्षदायकः ध्या. बि. १७
(तस्य) ह्रादुनयो विस्फुलिङ्गाः
[छां. उ. ५।५।१४ बृह. ६।२।१०
ह्रियते ह्यवशोऽपि सः भ. गी. ६।४४
ह्रिया देयम् । भिया देयम् ।
संविदा देयम् तैत्ति. १।११।३
ह्रीर्नाम वेदलौकिकमार्गकुत्सित-
कर्मणि लज्जा शांडि. १।२।१
(श्री-) ह्रीश्च ते लक्ष्मीश्च पत्न्यौ ।
अहोरात्रे पार्श्वे । नक्षत्राणि
रूपम् । अश्विनौ व्यात्तम चित्त्यु. १३।३
[+वा. सं. ३१।२२+ . तै.आ. ३।१३।२.
ह्रीं आनो दिवो बृहतः पर्वतादा
सरस्वती यजतागन्तु यज्ञम् सरस्व. ८
ह्रीं पद्मावत्यन्नपूर्णे माहेश्वरी स्वाहा त्रि.म.ना. ७।९
ह्रौं (ह्स्रौं) हयग्रीवायं नमो
ह्रौं (ह्स्रौम्) त्रि. म. ना. ७।९
ह्वयामि वां ब्रह्मणा तूर्तमेतम चित्त्यु. १४।३

अयं कोश आमोदर्दैः पूर्णगात्रो मनोहारिसिद्धान्तवाक्यैः श्रुतीनाम् ।
ददात्वात्मतोषं विपश्चिद्वरेभ्यो यथा हेमकुम्भोऽमरेभ्योऽमृतासः ॥

इत्युपनिषद्वाक्यमहाकोशस्योत्तरार्धः समाप्तः ।

*परिशिष्टम् ।

—— : o : ——

ॐ

ॐकार स्वरूपं मन्मस्तकम् — २ तारो. १
ॐ क्रतो स्मर कृतं स्मर — ईशा. १७

ॐ खं ब्रह्म खं पुराणं वायुरं
खमिति — बृह. ५।१।१

ॐ चत्वारिंशत्संस्कारसम्पन्नः
सर्वतो विरक्तः...साधन-
चतुष्टयसम्पन्न एव संन्यस्तुमर्हति — १ सं. मो. २।१

